ગુજરાત રાજ્યના શિક્ષણવિભાગના પત્ર-ક્રમાંક
મશબ/1219/450/છ, તા.03/07/2019-થી મંજૂર

# दर्शनम् २

## मध्यमा १

## (ધોરણ 11)

**प्रतिज्ञापत्रम्**

भारतं मम देशः ।
सर्वे भारतीयाः मम भ्रातरः भगिन्यः च सन्ति ।
मम मानसे देशस्पृहा अस्ति । समृद्धिसहितं
विविधतापरिपूर्णं तस्य संस्कृतिगौरवम् अनुभवामि ।
अहं सदा तत्पात्रं भवितुं यत्नं करिष्यामि ।
अहं मम पितरौ आचार्यान् गुरुजनान् च प्रति
आदरभावं धारयिष्यामि ।
अहं मम देशाय देशबान्धवेभ्यः च मम निष्ठाम् अर्पयामि ।
तेषां कल्याणे समृद्धौ च एव मम सुखम् अस्ति ।

**मूल्यम् : ₹ 18.00**

नमसो मा ज्योतिर्गमय
**गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्**
**'विद्यायनम्', सेक्टर 10-ए, गांधीनगरम् - 382010**

© गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, गान्धीनगरम्
अस्य पाठ्यपुस्तकस्य सर्वेऽधिकाराः गुजरातराज्यपाठ्यपुस्तकमण्डलहस्तकाः सन्ति। अस्य पाठ्यपुस्तकस्य कश्चिदपि भागः केनापि रुपेण गुजरातराज्य-पाठ्यपुस्तकमण्डलनियामकस्य लिखितानुमत्या विना प्रकाशयितुं न शक्यते।

**विषय-मार्गदर्शनम्**

डॉ. श्रीनन्दकिशोर महेता

**लेखनम्**

श्री भगीरथः त्रिवेदी (कन्वीनर)

डॉ. जानकीशरण आचार्यः

डॉ. उमा महेश्वरी

**समीक्षणम्**

डॉ. कश्यपभाई डी. त्रिवेदी

श्री चिन्तनः जोषी

डॉ. नारायण पतिः

**भाषाशुद्धिः**

डॉ.चिंतनकुमारः दवे

**संयोजनम्**

डॉ. क्रिष्ना दवे

(विषय-संयोजकः -अंग्रेजी)

**निर्माणायोजनम्**

श्री हरेन शाह

(उपनियामकः - शैक्षणिकः)

**मुद्रणसंयोजनम्**

श्री हरेश एस. लीम्बाचीया

(उपनियामकः- उत्पादनम्)

## प्रस्तावना

प्राच्यगुरुकुलपरम्परानुसारम् अध्ययनं कुर्वतां-छात्राणां कृते प्राचीनार्वाचीनयोः अध्ययनाध्यापनयोः पद्धत्योः समन्वयं कृत्वा गुजरात राज्य-माध्यमिकोच्चतर माध्यमिक शिक्षणसमितिः (बोर्ड) द्वारा नूतना-अभ्यासक्रमसंरचना कृता अस्ति। गुजरातसर्वकारद्वारा प्रमाणिताः मानिताः च अभ्यासक्रमाः सन्ति ।

गुजरातसर्वकारद्वारा प्राप्तमान्यतायाः **दर्शनम् २ मध्यमा १ (धोरण 11)** इति विषयस्य नूतनाभ्यासक्रमानुसारं सज्जीकृतमिदं पुस्तकं-प्रकाशनात् प्राक् विषयज्ञैः सर्वाङ्गीणतया-समीक्षितं संसूचितपरिवर्तनानुसारं हस्तलिखितेषु लेखेषु योग्यतया संशोधनानन्तरं प्रकाशितमस्ति ।

प्रस्तुतं पाठ्यपुस्तकं कक्षानुसारम् उपयोगि परिशुद्धं च कर्तुं मण्डलद्वारा कृते प्रयत्नेऽपि न्यूनतापरिपूर्णार्थं विद्वद्भिः सूचिताः सूचनाः सादरं स्वीकरणीयाः एव ।

**पी. भारती** (IAS)
नियामकः — कार्यवाहकःप्रमुखः
ता.06-07-2019 — गान्धीनगरम्

**प्रथमावृत्ति : 2019**

**प्रकाशक** : गुजरातराज्यशालापाठ्यपुस्तकमण्डलम्, 'विद्यायन', सेक्टर 10-ए, गान्धीनगरप्रातिनिध्येन पी.भारती, नियामकः

**मुद्रक** :

# मूलभूतकर्तव्यानि

**प्रत्येकं भारतीयनागरिकस्य कर्तव्यानि निम्नानुसारं स्युः। ***

( क ) संविधान प्रति प्रामाणिकत्वम् आदर्शत्वं संस्थानां राष्ट्रध्वजस्य राष्ट्रीयगीतस्य च आदरः।

( ख ) स्वातन्त्र्याय अम्मीयराष्ट्रियसत्याग्रहं प्रेरयताम् आदर्शानां हृदये प्रतिष्ठापनम् अनुसरणं च।

( ग ) भारतस्य सार्वभौमत्वस्य एकतायाः अखण्डिततायाश्च समर्थनं च।

( घ ) देशस्य रक्षणं राष्ट्रियसेवायै उद्घोषाणायां जातायां तदनुसरणञ्च।

( च) धार्मिक-भाषाकीय-प्रादेशिकेभ्यः धार्मिकेभ्यो वा भेदेभ्यः परं स्थित्वा, समस्तभारतीयेषु साम्मनस्यसमानबन्धत्वभावनायाः वृद्धिः, स्त्रीणां गौरवहानिकारकव्यवहारत्यागश्च।

( छ ) अस्माकं समन्वितसंस्कृतेः समृद्धदायस्य मूल्यं ज्ञात्वा तदवग्रहः।

( ज ) वनानां तडागानां नदीनाम् अन्यवन्यपशुपक्षिसहितं प्राकृतिकपर्यावरणरक्षणं तद्वर्धनं तथैव जीवमात्रं प्रति अनुकम्पाभावः।

( झ ) वैज्ञानकिमानसाय मानवतावादाय जिज्ञासायै भावनाभिगमाभिबोधः।

( ट ) सामान्यसम्पत्तिरक्षणं हिंसायाः त्यागश्च।

( ठ ) राष्ट्रं पुरुषार्थस्य सिद्धेश्च अधिकाधिकमुन्नतसोपानानि प्रति सततं प्रगतिशीलं स्यात्तदर्थं वैयक्तिकसामूहिकप्रवृत्तीनां समस्तक्षेत्रेषु श्रेष्ठत्वम् आसादयितुं प्रयत्नः।

(ड) मात्रा पित्रा अथवा अभिभावकेन षड्वर्षतः चतुर्दशवर्षं यावत् (६. तः १४) वयसे बालकाय अथवा पाल्याय शिक्षणलाभाः देयाः।

* भारतीयं संविधानम् : अधिनियमः 51–क

# अनुक्रमणिका

## सांख्यदर्शनम्


| | | |
|---|---|---|
| १. | सांख्यदर्शनपरिचयः | 1 |
| २. | साङ्ख्यदर्शनग्रन्थकर्तॄणां परिचयः | 7 |
| ३. | साङ्ख्यदर्शनग्रन्थानां परिचयः | 12 |
| ४. | साङ्ख्ययोगयोः परस्परसम्बन्धः | 16 |
| ५. | सांख्यकारिका-१ (१-१०) | 21 |
| ६. | सांख्यकारिका-२ (११-२०) | 31 |
| ७. | सांख्यकारिका-३ (२१-३०) | 37 |


## योगदर्शनम्


| | | |
|---|---|---|
| ८. | योगदर्शनपरिचयः, स्वरूपं प्रकाराश्च | 43 |
| ९. | योगदर्शनस्य ग्रन्थकर्तॄणां परिचयः | 48 |
| १०. | अष्टाङ्गयोगः | 54 |
| ११. | तत्त्वविभागः पञ्चकर्मस्वरूपञ्च | 58 |
| १२. | पातञ्जलयोगसूत्रस्य प्रथमपादः-१ (सू. १-२५) | 64 |
| १३. | पातञ्जलयोगसूत्रस्य प्रथमपादः-२ (सू. २६-५१) | 69 |
| १४. | पातञ्जलयोगसूत्रस्य द्वितीयपादः (सू. १-२५) | 72 |


●

# सांख्यदर्शनम्

## १ सांख्यदर्शनपरिचयः

**प्रस्तावना** - भारतीयवाङ्मयस्य उत्तमाङ्गरूपेण वर्तते दर्शनशास्त्रम् । शास्त्रमिदं समग्रजीवनस्य साक्षात् विवेकं कारयति । आस्तिकदर्शनेषु सांख्यदर्शनस्य महद्वैशिष्ट्यं वर्तते । प्राणिमात्रं दुःखनिवारणाय चेष्टते, परं लौकिकेन उपायेन निवृत्तमपि दुःखं पुनः आयति । ऐकान्तिकात्यन्तिकरूपेण दुःखनिवारणाय सांख्यदर्शनस्य भारतीयदर्शनेषु महत्त्वपूर्णं स्थानं वर्तते । अस्य दर्शनस्य प्रवर्तकः महर्षिः महामुनिः भगवान् कपिलः अस्ति । श्वेताश्वतरोपनिषदि उक्तम् ''ऋषिं प्रसूतं कपिलं यस्तमग्रे ज्ञानैर्बिभर्त्ति जायमानं च पश्येत्'' (5.2) इति । भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां ''सिद्धानां कपिलो मुनिः'' (10.26) इति उक्त्वा कपिलमहर्षेः महत्त्वम् उक्तम् । इदं सांख्यदर्शनम् अतिप्राचीनं विद्यते । अत्र प्रकृतिपुरुषयोः विवेकज्ञानेन दुःखनिवृत्तिः भवतीति स्वीक्रियते । अस्मिन प्रकरणे सांख्यशब्दस्य स्वरूपम्, सांख्यदर्शनस्य तत्त्वानि, पुरुषस्य स्वरूपम् प्रकृतेः स्वरूपम् इत्यादिविषयाणां विवेचनं प्रस्तूयते, येन सांख्यदर्शनस्य सहजः बोधः स्यात् ।



महर्षिः कपिलः

**सांख्यशब्दार्थविचारः**

''सांख्यम् इति पदं सम्-उपसर्गपूर्वकं ''चक्षिङ् ख्याञ्'' इति धातोः ''अण्'' प्रत्यये सति निष्पद्यते । यस्य अर्थः भवति ''सम्यक् ख्यानम्'' अर्थात् ''सम्यक् ज्ञानम्'' इति । एतदेव प्रकृतिपुरुषविवेकः, विवेकख्यातिः, विवेकबुद्धिः, सत्त्वपुरुषान्यताख्यातिः इत्यपि उच्यते । अमरकोषकारेण ''संख्यावान्'' इति पदं पण्डितपदपर्यायत्वेन स्वीकृतः ''संख्यावान् पण्डितः कविः'' इति । अस्मिन् शास्त्रे पञ्चविंशतितत्त्वानां विवेकज्ञानेन कैवल्याख्यमोक्षप्राप्तिः भवति इति प्रतिपादितम् । अतः केषाञ्चन विदुषाम् इदं कथनमस्ति यत् सांख्यशब्दस्य निष्पत्तिः संख्याशब्दात् भवति । ''संख्यायन्ते गण्यन्ते तत्त्वानि यस्मिन् तत् सांख्यम्'' इति । यथोक्तं महाभारते -

**संख्यां प्रकुर्वते चैव प्रकृतिं च प्रचक्षते ।**
**तत्त्वानि च चतुर्विंशतिः तेन सांख्याः प्रकीर्तिताः ॥ इति । ( महा. भा. शा. 12.306.43 )**

सम्यक् ख्यानं संख्या, संख्यैव सांख्यम् । प्रकृतिपुरुषविवेकात्मविशिष्टं ज्ञानम् इत्यर्थः । श्रीमद्भागवते इदं दर्शनम् ''**तत्त्वसंख्यानम्**'' इति नाम्नापि प्रसिद्धमस्ति - ''**कपिलस्तत्त्वसंख्याता भगवानात्ममायया**'' इति । श्रीमद्भगवद्गीतायां ''**सम्यग् ज्ञानम्**'' इत्यर्थे पदमिदं प्रयुक्तम् - ''**एषातेऽभिहिता सांख्ये बुद्धिर्योगेत्विमां शृणु**'' इति । भगवत्पादाः शङ्कराचार्याः विष्णुसहस्रनामभाष्ये ''**विशुद्धात्मज्ञानम्**'' इति रूपेण सांख्यशब्दस्य अर्थं वर्णयन्ति । मत्स्यपुराणे सांख्यशब्दनिर्वचनम् - ''**सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते**'' इति श्रूयते । श्रीमद्भागवतटीकायां श्रीधरस्वामिनः ''**सम्यक् ख्यायते प्रकाश्यते वस्तुतत्त्वम् अनया इति संख्या, सम्यक् ज्ञानं तस्यां प्रकाशमानम् आत्मतत्त्वं सांख्यम्**'' इतिरूपेण संख्याशब्दात् सांख्यपदं निष्पद्यते इति वदन्ति । सांख्यदर्शनस्य प्रवर्तकः विष्णोः अवतारभूतः परमर्षिः कपिलः अस्ति इति विदुषां मतम् । अयं कपिलमुनिः कर्दमदेवहूत्योः पुत्रः आसीत् । स्वमातुश्च देवहूतेः आत्मज्ञानाय सांख्यशास्त्रम् उपदिदेश ।

**सांख्यदर्शनस्य प्राचीनता**

आस्तिकदर्शनेषु सांख्यदर्शनम् अतिप्राचीनं सारगर्भितञ्चेति विदुषामैकमत्यमस्ति । अस्य दर्शनस्य मूलस्रोतांसि वैदिकवाङ्मये, संहिताब्राह्मणग्रन्थेषु, उपनिषत्सु, गीतायाम्, स्मृतिषु, इतिहासपुराणादिषु च उपलभ्यन्ते । वेदेषु नासदीय-हिरण्यगर्भ-पुरुषसूक्तादिषु सांख्यदर्शनस्य कानिचन तत्त्वानि श्रूयन्ते । यथा -

''**द्वा सुपर्णा सयुजा सखाया समानं वृक्षं परिषस्वजाते ।**
**तयोरन्यः पिप्पलं स्वाद्वत्त्यनश्नन्नन्योऽभिचाकशीति ॥**'' (मुण्डकोपनिषदि 3.1.1)

इति ऋग्वेदस्य 1.164.20 मन्त्रेऽस्मिन् सेश्वरसांख्यतत्त्वानि उपलभ्यन्ते । बृहदारण्यकोपनिषदि ''**असङ्गो ह्यं पुरुषः**'' (4.3.15) इतिमन्त्रः ''पुरुषस्तु पुष्करपलाशवत् निर्लेपः'' इति सांख्यमतस्य उपोद्बलकोऽस्ति । ''**इदं महत् भूतमनन्तमपारं विज्ञानघनः एव एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति**'' (2.4.12) इति रूपेण सांख्यशास्त्रस्य ''महत्'' इत्यादीनि पारिभाषिकानि पदानि श्रूयन्ते । छान्दोग्योपनिषदि च सांख्यदर्शनप्रतिपादितः सत्कार्यवादः श्रूयते । यथा ''**सदैव सोम्येदमग्र आसीदेकमेवाद्वितीयम्**'' (छा. उ. 6.2.1) इति । ''**यथा सोम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्यात्**'' इति मन्त्रे मृत्तिकापिण्डात् मृत्तिकापात्राणि इव एकस्मात् सतः एव अस्य नानरूपात्मकस्य जगतः सृष्टिः जायते इति सांख्यमतं दृश्यते । अपि च तत्रैव सांख्यप्रतिपादितमूलप्रकृतेः त्रिगुणानां वर्णनं प्राप्यते - ''**त्रीणि रूपाणि इत्येव सत्यम्**'' छा. उ. 6.1.3) इति । श्वेताश्वतरोपनिषदि स्पष्टरूपेण सांख्यप्रतिपादितायाः मूलप्रकृतेः वर्णनम् उपलभ्यते । यथा -

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानाः सरूपाः ।**
**अजो ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥** (श्वे. उ. 5.4)

इत्यत्र सांख्यशास्त्रप्रतिपादितानां सत्त्वरजस्तमोगुणानां स्वरूपम् अथ च गुणत्रयाणां साम्यावस्थारूपप्रकृतेः स्वरूपं साक्षात् उल्लिखितं वर्तते । तत्रैव ''**संयुक्तमेतत्क्षरमक्षरं च व्यक्ताव्यक्तं भरते विश्वमीशः**''(1.8), ''**ज्ञाज्ञौ द्वावजावीशनीशावजाह्येका**'' (1.9), ''**क्षरं प्रधानममृताक्षरं हरः**'' (1.10), ''**मायां तु प्रकृतिं विद्यात्**'' (4.10) इत्यादिवाक्येष्वपि सांख्यसिद्धान्ताः दृश्यन्ते । कठोपनिषदि ''**महतः परमव्यक्तमव्यक्तात् पुरुषः परः, पुरुषान्न परं किञ्चित्**'' (3.11) इतिरूपेण सांख्यदर्शनप्रतिपादितस्य अव्यक्तस्य पुरुषस्य च उल्लेखः प्राप्यते । भगवद्गीतायाम् अपि -

''**प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।**
**अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ॥**'' (3.27)

इति मन्त्रेण ''प्रकृतिः कर्त्री'' इति सांख्यसिद्धान्तः अनूदितः । गीतायां तु सांख्ययोगो नाम पृथक् अध्यायोऽपि वर्तते यत् सांख्यदर्शनस्य महत्त्वं सूचयति । अपि च ''**एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां श्रुणु**'' (2.29), ''**एकं सांख्यं च योगं च यः पश्यति स पश्यति**'' (5.5). ''**अन्ये सांख्येन योगेन कर्मयोगेन चापरे**'' (13.24) इत्यादिना गीतायां प्रयुक्तस्य सांख्यपदस्य अर्थम् आचार्यशङ्करः इत्थं करोति - ''**सांख्ये परमार्थवस्तुविवेकविषये**'' (2.39) इति । महर्षिव्यासविरचिते महाभारतेऽपि सांख्यशास्त्रस्य प्रशंसा इत्थं दृश्यते - ''**नास्ति सांख्यसमं ज्ञानं नास्ति योगसमं बलम्**'', ''**अखिलमेव तत्त्वज्ञानं सांख्यगतमेव**'', ''**लोके यदिहास्ति किञ्चित् सांख्यगतं तच्च महन्महात्मन्**'' इति ।

इत्थं वेदोपनिषत्सु एवमन्यत्र च पुराणादिषु सर्वत्र क्वचित् साक्षात् क्वचिच्च परम्परया सांख्यशास्त्रीयतत्त्वानाम् उल्लेखः प्राप्यते । तस्मात् इदं सांख्यदर्शनम् अति प्राचीनम् अस्ति ।

**सांख्यदर्शनतत्त्वानि** -

सांख्यदर्शने पञ्चविंशतितत्त्वानि स्वीकृतानि सन्ति, येषां विवेकज्ञानेन दुःखत्रयस्य ऐकान्तिकात्यन्तिकनिवृत्तिः भवति । तानि तत्त्वानि संक्षेपतः चतुर्धा विभक्तुं शक्यन्ते । (1) मूलप्रकृतिः, (2) प्रकृतिविकृतिः, (3) अप्रकृतिविकृतिः, (4) विकृतिश्च इति । यथोक्तं सांख्यकारिकायाम् -

''**मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥**'' इति (सां. का. - 3)

तत्र एका मूलप्रकृतिः ''अविकृतिः'' वर्तते अर्थात् सा कस्यापि तत्वस्य कार्यं नास्ति, परं सा सम्पूर्णसृष्टेः मूलकारणम् अस्ति । इयं प्रकृतिः यदि कारणवती स्यात् तर्हि तत्कारणस्यापि किमपि कारणान्तरं स्यात् । तस्यापि किमपि अन्यत् कारणं स्यात् इति अनवस्था प्रसज्येत । प्रधानम्, अव्यक्तम् इति पदवाच्यायाः अस्याः मूलप्रकृतेः महत्, अहङ्कारः, शब्दतन्मात्रम्, स्पर्शतन्मात्रम्, रूपतन्मात्रम्, रसतन्मात्रम्, गन्धतन्मात्रम् इति सप्त प्रकृतिविकृतयः जायन्ते । इमानि सप्त तत्त्वानि कार्यकारणोभयात्मकानि सन्ति । सांख्यदर्शनानुसारं विकृतयः षोडश सन्ति । तद्यथा पञ्च कर्मेन्द्रियाणि, पञ्च ज्ञानेन्द्रियाणि, एकं मनः, पञ्च महाभूतानि इति । एतेभ्यः षोडशतत्त्वेभ्यः न किमपि तत्त्वान्तरं जायते । अतः इमानि तत्त्वानि विकृतयः उच्यन्ते । पुरुषतत्त्वं न कस्यापि कार्यं न वा कस्यापि कारणं विद्यते । सः ''**पुष्करपलाशवत् निर्लेपः**'' भवति । प्रकृतिपुरुषौ उभावपि आदिरहितौ वर्तेते । इदमेव अभिप्रेत्य भगवता श्रीकृष्णेन श्रीमद्भगवद्गीतायां ''**प्रकृतिं पुरुषञ्चैव विद्ध्यनादि उभावपि**'' (13.19) इति अवादि ।

अधोदर्शितेन रेखाचित्रेण सांख्यतत्त्वानि अवगन्तुं शक्यन्ते –




**प्रकृतेः स्वरूपम्** –

प्रलयावस्थायां प्रकृतिः पुरुषश्च इति द्वे तत्त्वे व्यापके नित्ये च स्तः इति सांख्यवादिनः वदन्ति । प्रकृतिः जडस्वरूपा, पुरुषस्तु चेतनः । सांख्यसूत्रेषु प्रकृतेः स्वरूपम् इत्थं वर्णितम् – ''**सत्त्वरजस्तमसां साम्यावस्था मूलप्रकृतिः**'' इति । इयं प्रकृतिः बहुभिः नामभिः व्यपदिश्यते । यथा मूलप्रकृतिः, प्रधानम्, अव्यक्तम्, अविकृतिः, गुणमयी, सत्त्वरजस्तमसां साम्यावस्था, त्रिगुणात्मिका, प्रसवधर्मिणी इत्यादि । यदा चेतनस्य पुरुषस्य प्रकाशः अस्यां प्रकृतौ निपतति तदा प्रकृतौ विद्यमानेषु सत्त्वरजस्तमोरूपेषु गुणेषु विक्षोभः जायते । तथा च एते गुणाः परस्परम् अभिभवार्थं चेष्टन्ते, तस्मात् सृष्टिः जायते । इयं प्रकृतिः पूर्णतया स्वतन्त्रा नित्या च अस्ति । सा स्वव्यापारं कर्तुं कुत्रापि आश्रिता न भवति । सम्पूर्णस्य जगतः उत्पत्तिः मूलप्रकृतितः भवति तथापि तस्याः किमपि कारणं नास्ति । अतः सा ''**अहेतुमत्**'' इति उच्यते । अत्यन्तं सूक्ष्मत्वात् तस्याः प्रत्यक्षं न भवति । तस्मात् शेषवदनुमानात् एतस्याः ज्ञानं जायते । तदुक्तं सांख्यकारिकायाम् –

''**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।**
**महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥**'' इति । (सां. का. – 8)

यथा वटवृक्षं दृष्ट्वा कारणभूतं बीजम् अनुमीयते तथैव महदादि कार्यं दृष्ट्वा कारणभूता प्रकृतिः अनुमीयेत इत्यर्थः । अपि च सांख्यकारिकायां प्रकृतिं साधयितुं पञ्चयुक्तयः उक्ताः वर्तन्ते । तद्यथा –

''**भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।**
**कारणकार्यविभागात् अविभागाद्वैश्वरूप्यस्य ॥**'' इति (सां. का. – 15)

अत्र महदादिभेदानाम् परिमाणात्, समन्वयात्, शक्तितः प्रवृत्तेः, कारणकार्यविभागात्, वैश्वरूप्यस्य अविभागात् इति पञ्चहेतुभिः मूलप्रकृतिः साधिता अस्ति । एकस्मादेव मूलकारणात् अव्यक्तात् उत्पन्नम् इदं जगत् व्यक्तनाम्ना व्यपदिश्यते ।

यद्यपि इदं व्यक्ततत्त्वम् अव्यक्तात् भिन्नम् अस्ति तथापि केचन धर्माः उभयोरपि समानाः वर्तन्ते । तद्यथा - त्रिगुणत्वम्, अविवेकित्वम्, विषयत्वम्, सामान्यत्वम्, अचेतनत्वम्, प्रसवधर्मित्वम् इति ।

''**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥**'' (सां. का. - 11)

सांख्यकारिकायाम् इयं प्रकृतिः ''**नृत्याङ्गना**'' रूपेण उक्ता वर्तते । यथा काचित् नृत्याङ्गना दर्शकेभ्यः सकृत् नृत्यं दर्शयित्वा ततः निवर्तते तथैव इयं प्रकृतिरपि पुरुषं प्रति स्वस्वरूपं प्रकटय्य तस्मात् पुरुषात् निवृत्ता भवति -

''**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**
**पुरुषस्य तथाऽऽत्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥**'' इति (सां. का. - 59)

**पुरुषस्य स्वरूपम्** -

सांख्यदर्शने ''**न प्रकृतिर्न विकृतिः पुरुषः**'' इतिरूपेण पुरुषः पुष्करपलाशवत् निर्लेपः अस्तीति स्वीक्रियते । पुरुषोऽयं ''आत्मा'', ''ज्ञः'' इति नाम्नाऽपि अभिधीयते । अयं शुद्धः, चैतन्यस्वरूपः, निष्क्रियः, उदासीनश्च वर्तते । पुरुषस्तु जगत्कर्त्र्याः प्रकृतेः साक्षिरूपेण विद्यते । अस्मिन् पुरुषे न कश्चित् विकारो जायते, तस्मात् सः अविकारी इत्युच्यते । यद्यपि कामः, सङ्कल्पः, श्रद्धा, अश्रद्धा, विचिकित्सा इत्यादिक्रियाः आत्मनि प्रतीयन्ते तथापि इमाः आत्मनि न वर्तन्ते । सांख्यमतानुसारम् आत्मनि कर्तृत्वस्य प्रतीतिः अयोगोलके अग्निप्रतीतिवत् भ्रान्तिः अस्ति । सांख्यदर्शने अयं पुरुषः अनाश्रितत्व-अलिङ्गत्व-स्वतन्त्रत्व-निरवयवत्व-त्रिगुणरहितत्व-विवेकित्व-अविषयत्व-असामान्यत्व-चेतनत्व-अप्रसवधर्मित्व-साक्षित्व-कैवल्यत्व-मध्यस्थत्व-उदासीनत्व-द्रष्टृत्वादिधर्मयुक्तो भवतीति अभ्युपगम्यते ।

''**तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।**
**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥**'' (सां. का. - 19)

शरीरेन्द्रियबुद्ध्याद्यतिरिक्तः आत्मा नास्ति, उपलम्भाभावात् इति वक्तुं न शक्यते । प्रधानपुरुषादीनां सूक्ष्मत्वेन अनुपलब्धिः भवति, न तु अभावात् । अतः सांख्यकारिकायां पुरुषोऽयं पञ्चभिः हेतुभिः साधितः

''**संघातपरार्थत्वात् त्रिगुणादिविपर्यादधिष्ठानात् ।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥**'' इति (सां. का. - 17)

यत्र सुखदुःखमोहादयः सम्मिलिताभवन्ति स संघातः प्रधानमहदहङ्कारादिजडवर्गः । अयं संघातः परप्रयोजनाय भवति, अतः जडवर्गातिरिक्तः कश्चन चेतनः अवश्यं स्यात् । सः अस्ति पुरुषः । यथा चेतनसारथिं विना जडस्य रथस्य प्रवृत्तिः न भवति तथैव जडात्मिकायाः प्रकृतेः प्रवृत्तिः चेतनेन अन्तरा न भवति, अतः प्रधानातिरिक्तः पुरुषः अस्ति । संसारस्य सर्वे विषयाः भोग्याः सन्ति, अतः एषां कश्चित् भोक्ता एतेभ्यः विलक्षणः अवश्यं स्यात्, सः अस्ति पुरुषः । शास्त्राणां मुमुक्ष्वादीनां च कैवल्यार्थं प्रवृत्तिरपि पुरुषास्तित्वं साधयति । किञ्च समग्रप्रपञ्चोऽयं त्रिगुणात्मकः भोग्यश्च वर्तते, अस्य भोक्ता कश्चित् त्रिगुणातीतः स्यात्, सः पुरुषः अस्ति इत्येवंरूपेण पुरुषस्य अस्तित्वं प्रतिपाद्य सः पुरुषः अनेकः इति सांख्यदर्शने स्वीक्रियते । यथा -

''**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥**'' इति (सां. का. - 17)

जननमरणकरणानां प्रतिपुरुषं भिन्नत्वेन नियमात्, सर्वेषाम् एकस्मिन्नेव काले प्रवृत्त्यभावात्, सत्त्वरजस्तमोगुणानां तरतमभावात् पुरुषाः अनेके सन्तीति सिद्ध्यति । जडात्मिकायाः प्रकृतेः सम्पूर्णमपि कार्यं पुरुषस्य मोक्षार्थं भवति । यथा वत्सविवर्ध्यर्थम् अचेतनं क्षीरं स्वतः एव प्रवर्तते तथैव इयमचेतना प्रकृतिरपि पुरुषस्य भोगोपवर्गरूपप्रयोजनाय प्रवर्तते । यथोक्तं कारिकायाम् -

''**औत्सुक्यनिवृत्यर्थं यथा क्रियासु प्रवर्तते लोकः ।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥**'' इति (सांख्यकारिका, 58)

यदा तु अयं पुरुषः तत्त्वाभ्यासपूर्वकं विशुद्धज्ञानात् संशयभ्रमादिरहितो भूत्वा प्रकृतेः स्वरूपं पश्यति तदा सा प्रकृतिः

अमुं पुरुषं प्रति स्वकार्यरूपं प्रपञ्चं तथैव विनिवर्तयति यथा काचित् नृत्याङ्गना सकृत् नृत्यं दर्शयित्वा पुनः तान् दर्शकान् प्रति न प्रवर्तते । एवं विशुद्धज्ञानात् अयं पुरुषः प्रकृतिं प्रति प्रेक्षकवत् उदासीनः सन् तिष्ठति –

**''एवं तत्त्वाभ्यासात् नास्मि न मे नाहमित्यपरिशेषम् ।**
**अविपर्ययाद् विशुद्धं केवलमुत्पद्यते ज्ञानम् ।।''** इति (सां. का. – 64)

इत्थं प्रकृतेः स्वरूपं विज्ञाय अयं पुरुषः सर्वकर्मणां फलभोगानन्तरं कैवल्यं प्राप्नोति । पुनः अस्मिन् संसारे आगमनं न भवति । इयमेव पुरुषस्य दुःखत्रयाणाम् एकान्तिकात्यन्तिकनिवृत्तिः मोक्षावस्था वा ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) सांख्यदर्शनस्य प्रवर्त्तक अस्ति –
(क) जैमिनिः (ख) कपिलः (ग) बादरायणः (घ) गौतमः

(2) सांख्यदर्शने दुःखनिवृत्तिः केन स्वीक्रियते ?
(क) कर्मणा (ख) वेदज्ञानेन (ग) विवेकज्ञानेन (घ) स्वर्गप्राप्त्या

(3) सांख्यदर्शने प्रकृतिविकृतयः सन्ति –
(क) पञ्च (ख) सप्त (ग) एकादश (घ) पञ्चविंशतिः

(4) सत्त्वरजस्तमसां साम्यवस्था किम् उच्यते –
(क) प्रकृतिः (ख) पुरुषः (ग) बुद्धिः (घ) मनः

(5) सांख्यमते तामसाहङ्कारात् उत्पद्यते –
(क) मनः (ख) कर्मेन्द्रियाणि (ग) ज्ञानेन्द्रियाणि (घ) तन्मात्राणि

(6) भेदानां परिमाणात् समन्वयात् इत्यादिहेतुभिः कस्य सिद्धिः भवति ?
(क) पुरुषस्य (ख) व्यक्तस्य (ग) दुःखत्रयस्य (घ) प्रधानस्य

**2. रिक्तस्थानं पूरयत ।**

(1) सांख्यमते द्वे नित्ये तत्त्वे स्तः – (1) .......... (2) .......... ।
(2) सांख्यदर्शने .......... तत्त्वानि सन्ति ।
(3) गुणत्रयाणां विषमावस्था .......... उच्यते ।
(4) .......... कैवल्यार्थं प्रवृत्तेश्च ।
(5) प्रधानपुरुषसंयोगात् .......... भवति ।
(6) न प्रकृतिर्न विकृतिः .......... ।
(7) महतः परम् .......... परः ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) षोडशकः | (1) अप्रसवधर्मी |
| (2) कैवल्यम् | (2) कर्त्री |
| (3) पुरुषः | (3) कपिलः |
| (4) सांख्यसूत्रम् | (4) हिरण्यगर्भः |
| (5) प्रकृतिः | (5) मोक्षः |
| | (6) विकारः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) त्रयो गुणाः के सन्ति ?

(2) सांख्यदर्शने मोक्षप्राप्तिः कथं भवति ?

(3) सर्गादौ मूलप्रकृतेः किं तत्त्वं जायते ?

(4) अनादी कौ स्तः ?

(5) श्रीमद्भागवते सांख्यदर्शनं केन नाम्ना प्रसिद्धम् ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) मूलप्रकृतेः कारणान्तरं किमर्थं न स्वीक्रियते ?

(2) अचेतना प्रकृतिः कथं चेतनवत् प्रतीयते ?

(3) महदादीनां कारणस्वरूपं किम् ?

**6. टिप्पणीं लिखत ।**

(1) सांख्यशब्दार्थः ।

(2) पुरुषबहुत्वम् ।

(3) प्रकृतिः ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) सांख्यमतानुसारं पञ्चविंशतितत्त्वानां निरूपणं कुरुत ।

(2) सांख्यमतानुसारं मोक्षप्राप्तिः कथं भवति ?

(3) सांख्यदर्शनस्य प्राचीनतां लिखत ।

●

# २ साङ्ख्यदर्शनग्रन्थकर्तॄणां परिचयः

**प्रस्तावना -**



षडास्तिकदर्शनेषु साङ्ख्यदर्शनस्य महत्त्वम् अनितरसाधारणमस्ति । यतो हि अस्मिन् दर्शने प्रकृतिपुरुषयोः वर्णनादिकं सम्यक् अवगन्तुं शक्यते । का प्रकृतिः ? कः पुरुषः ? तयोः कस्सम्बन्धः ? इत्यादि प्रश्नानां समाधानं साङ्ख्यदर्शनपठनेनैव ज्ञातुं प्रभवामः । परन्तु तत्पूर्वं किमर्थमिदं साङ्ख्यदर्शनं रचितम् ? तेन सामान्यव्यवहारे किमपि परिवर्तनं भवति उत न ? इत्यादि प्रश्नानाम् उत्तरं साङ्ख्यदर्शनग्रन्थ-कर्तॄणां परिचयद्वारा एव प्राप्यते ।

अतः पाठेऽस्मिन् साङ्ख्यदर्शनस्य कर्तुः महर्षेः कपिलस्य, भाष्यकारस्य विज्ञानभिक्षोः, साङ्ख्यकारिकाकार-स्य ईश्वरकृष्णस्य परिचयः प्रदत्तोऽस्ति ।

---

**ईश्वरकृष्णः**

'साङ्ख्यकारिका' साङ्ख्यदर्शनस्य अध्येतॄणां महदुपकारकग्रन्थः वर्तते । सांख्यकारिकायाः कर्ता ईश्वरकृष्णः अस्तीत्यत्र नास्ति विप्रतिपत्तिः विद्वत्तल्लजानाम् । यतो हि ईश्वरकृष्णेन स्वयमेव साङ्ख्यकारिकायाः एकसप्ततितमे पद्ये स्वस्य कर्तृत्वपरिचयः कारितः । तद्यथा -

**शिष्यपरम्पराऽऽगतमीश्वरकृष्णेन चैतदार्याभिः ।**
**संक्षिप्तमार्यमतिना सम्यग्विज्ञाय सिद्धान्तम् ॥**

शिष्यपरम्परया सम्प्राप्तस्य अस्य साङ्ख्यतत्त्व-ज्ञानस्य संशयविपर्ययविकल्परहितं स्वरूपं ज्ञात्वा तत्त्वदर्शिना श्रीमदीश्वरकृष्णेन पञ्चविंशतितत्त्वानां ज्ञानं आर्याच्छन्दसि संगृहीतमस्ति ।

**मतवैविध्यम्**

बौद्धपरम्परायां विन्ध्यवासनामकः कश्चित् आसीत् । स एव ईश्वरकृष्णः विन्ध्यवास इति मनुते । परन्तु अभेदकथनाय प्रमाणाभावात् विन्ध्यवास एव ईश्वरकृष्णः इति प्रमाणयितुं न शक्यते ।

चीनभाषायाम् अनूदिते साङ्ख्यसप्ततिनामकग्रन्थे लिखितं यत् - ईश्वरकृष्ण एव साङ्ख्यसप्ततिग्रन्थस्य रचयिता वर्तते । यदि चीनभाषायां पेम्पोलीवर्षपदं प्रकाशयति तर्हि विन्ध्यवास-ईश्वरकृष्णौ अभिन्नौ इति मतं दृढं भवति ।

परन्तु उदयवीरशास्त्री कथयति यत् 'विन्ध्यवास' नामके ग्रन्थे ईश्वर-विन्ध्यवासयोः मतभेदः विचाराः च भिन्नाः वर्तन्ते, तेन च तयोः ऐक्यं न कदापि संभवितुमर्हतीति ।

**कालनिर्णयः**

ईश्वरकृष्णस्य कालनिर्णये बहवः मतभेदाः वर्तन्ते । ए. बी. कीथ इति पाश्चात्यविदुषः मते ईश्वरकृष्णस्य ई.स. 300 समयः अस्ति । महामहोपाध्यायेन श्रीगोपीनाथकविराजेन ईश्वरकृष्णस्य कालः ई.स. 200 दर्शितः। श्रीकालीपदभट्टाचार्यस्तु प्रथमशताब्दीसम्भवोऽयमिति मनुते ।

माठरवृत्तौ लिखितं यत् कपिलात् आसुरिणा प्राप्तमिदं ज्ञानम्, ततः पञ्चशिखेन तस्मात् भार्गवचोलुकवाल्मीकहारित देवलप्रभृतिपर्यन्तमागतम् । ततः ईश्वरकृष्णेन प्राप्तम् । अत एव षष्टितन्मात्राभिः संक्षिप्तमस्ति ।

एतेभ्यः ज्ञानं समवाप्य ईश्वरकृष्णेन साङ्ख्यकारिकाः रचिताः । तेन स्वयमेव प्रतिपादितं यत् -

**सप्तत्यां किल येऽर्थाः तेऽर्थाः कृत्स्नस्य षष्टितन्त्रस्य ।**

**आख्यायिकाविरहिताः परवादविवर्जिताश्चापि ॥** (सां. का. - 72)

अनेन ज्ञायते यत् ईश्वरकृष्णस्य षष्ठितन्त्रे महती श्रद्धा वर्तते । अत एव तत्सर्वं मूलत्वेन स्वीकृत्य कारिकाः रचिताः इति ।

**श्रीविज्ञानभिक्षुः । ( सांङ्ख्यदर्शनस्य भाष्यकारः )**

महर्षिकपिलप्रणीतस्य साङ्ख्यदर्शनस्य अनेकाः टीकाः व्याख्यानानि च उपलभ्यन्ते । परन्तु विज्ञानभिक्षुकृत-साङ्ख्यदर्शनस्य भाष्यम् 'साङ्ख्यप्रवचनभाष्यम्' अनितरसाधारणं विशिष्टं प्रसिद्धञ्चास्ति ।

**कालनिर्णयः**

अस्य विज्ञानभिक्षोः समयनिर्धारणं भावगणेशनामक शिष्यस्याधारेण भवति । अस्य उल्लेखः काश्यामेकस्मिन् निर्णयपत्रे प्रतिपादितोऽस्ति । निर्णयपत्रमिदम् ई.स. 1583 समये लिखित मस्ति । यत्र बहूनां विदुषां हस्ताक्षराण्यपि सन्ति । तत्र प्रथमः भावगणेशः स च विज्ञानभिक्षुशिष्यः । ई.स. 1550 तः 1600 मध्यस्थः इति प्रमाणयितुं शक्यते । तेन विज्ञानभिक्षो समयः ई.स. 16 शताब्दी भवति ।

**भाष्यकारः**

अस्य षडध्यायात्मककपिलसूत्रस्य भाष्यकर्ता विज्ञानभिक्षुः एकः वेदान्ती सन्यासी वर्तते । अस्य सन्यासिनः विज्ञानभिक्षोः यत्पाण्डित्यं तत्तेषां गभीरार्थवाग्वैभवप्रदर्शनेन एव साङ्ख्यसूत्रप्रवचनभाष्ये दार्शनिकाः विद्वांसश्च अनुभवन्ति । तेन भाष्यकारेण अत्र प्रवचनभाष्ये प्राचीनार्वाचीनदार्शनिकमतान्यनुभवता साङ्ख्यवेदान्तयोः विरोधं परिहृत्य, तयोरैक्यं प्रदर्शितम् । इदं साङ्ख्यदर्शनं वेदान्तदर्शनस्य एव एकम् अपरं रूपं वा प्रदर्शितम् । इत्ययं विषयः साङ्ख्यप्रवचनभाष्यस्य अध्ययनेन अनुभूयते भावुकैः ।

तत्र च श्रीविज्ञानभिक्षुमहोदयानाम् इदमपि कथनमस्ति यत् - योगदर्शनसाङ्ख्यप्रवचनयोः नास्ति किमपि महदन्तरम् ।

**व्याख्याशैली**

अस्य साङ्ख्यदर्शनप्रवचनभाष्यस्य शैली अति गभीरापि रमणीया, तत्त्वप्रकाशिका, गूढार्थयोगिनी, सरला, सुबोधा सरसा च वर्तते । येन च तत्वज्ञानं सरलेन सुखेन च भवेत् इति ।

**कृतयः**

(1) साङ्ख्यप्रवचनसूत्रभाष्यम्, (2) साङ्ख्यसारः, (3) व्यासभाष्यमधिकृत्य - योगवार्तिकम्, (4) ब्रह्मसूत्रमधिकृत्य - विज्ञानामृतभाष्यम्

**महत्त्वम्**

षडध्यायात्मकमिदं साङ्ख्यदर्शनं प्रायः सर्वत्र पठनपाठनसम्प्रदाये वर्तते । तद्दर्शनस्य सम्यक् ज्ञानमवाप्तव्यमस्ति चेत् विज्ञानभिक्षोः साङ्ख्यदर्शनप्रवचनभाष्यमध्येतव्यमेव । तेन च साङ्ख्यस्य सिद्धान्तानां सम्यक् ज्ञानं भवेत् ।

उक्तञ्च महाभारते -

**सङ्ख्या प्रकुर्वते चैव प्रकृतिञ्च प्रकाशते ।**

**तत्त्वानां चतुर्विंशतिस्तेन साङ्ख्याः प्रकीर्तिताः ॥** (महा.भा.शा- 306-43)

**श्री कपिलमुनिः । ( साङ्ख्यदर्शनस्य प्रवर्तकः )**



साङ्ख्यदर्शनस्य आद्यः प्रवर्तकः देवहूतिकर्दमयोः पुत्रः महर्षिकपिलः । ब्रह्मावर्ते अस्य जन्म अभवत् । संपूर्णे संस्कृतवाङ्मये अनेके कपिलनामधारिणो भवन्ति । यथा श्वेताश्वतरोपनिषदि एकः ब्राह्मणपुत्रः कपिलः, भगवद्गीतायामुक्तः कपिलर्षिः, रामायणे महाराजसगरस्य षष्टिसहस्त्रदग्धपुत्रेषु एकः कपिलः, श्रीमद्भागवतोक्तः कपिलश्चेति ।

एतेषु नामसु श्रीमद्भागवतोक्तः देवहूतिकर्दमयोः पुत्रः कपिल एव साङ्ख्ययोगस्य प्रवर्तक इति दार्शनिका अङ्गीकुर्वन्ति । असौ भगवतः पञ्चमावतारो सप्तपुत्रेषु कपिलो अन्यतम इति निगदितः । यथा –

**श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा ।**
**धृतिम्प्रकाशकश्चैव कपिलश्चापि सप्तमम् ॥**
**वपुष्यतः सुताः सप्त शाल्मलेशस्य चाभवन् ।**

(मा. पु 286-26)

विष्णुपुराणमपि कृतयुगस्यान्तिमभाग एव कपिलस्य समय इति प्रमाणमुपस्थापयति । यथा–

**कृते युगे परं ज्ञानं कपिलादिस्वरूपधृक् ।**
**ददाति सर्वभूतानां सर्वभूतहिते रतः ॥**

(वि. पु 3-2-54)

**कालनिर्णयः**

महामुनि श्रीकपिलः ई. पू. 2000 तमे वर्षे स्वास्तित्वं लभमानः साङ्ख्यशास्त्रं रचितवान् इति ऐतिह्यविदः स्वीकुर्वन्ति । तत्रापि साङ्ख्यदर्शनस्य सूत्रद्वयं समुपलब्धम् अस्तीत्यपि श्रूयते ।

**(1) 'तत्त्वसमासः'** – प्रथमं सूत्रम्, **(2) 'सांङ्ख्यप्रवचनम्'** – द्वितीयं सूत्रम् ।

एतेषां महामुनि श्री कपिलमहोदयानां प्रथम शिष्य 'आसुरिः' आसीत् इति कर्णाकर्णिकया श्रूयते । अस्य च मुनेः आसुरेः कोऽपि ग्रन्थः नोपलभ्यते, वचनानि तु ग्रन्थान्तरेषु प्राप्यन्ते । अस्य च आसुरमुनेः शिष्यः श्रीपञ्चशिख्याचार्यः आसीत् । यदस्य पञ्चशिखाचार्यस्य मुनेः केवलमेक एव स्वेनैव लिखितः 'षष्टितन्त्र' नामको ग्रन्थः । परन्तु सोऽप्यधुना नोपलभ्यते ।

**सांङ्ख्यदर्शनग्रन्थाः**

सांङ्ख्यदर्शनस्य मूलग्रन्थः कः ? इत्ययं विवद्मानः विषयः । केचन **तत्त्वसमासः** नामकः ग्रन्थः कपिलेन प्रणीतः साङ्ख्यदर्शनस्य मूलग्रन्थः इति वदन्ति । अन्ये च **साङ्ख्यप्रवचनम्** इति । केचन **'षष्टीतन्त्रम्'** इति साङ्ख्यदर्शनस्य प्रसिद्धः ग्रन्थः कपिलेन रचित इत्यस्मिन् विषये प्रमाणानि उपलभ्यन्ते ।

**साङ्ख्यरूपेण सङ्कल्पो वैष्णवः कपिलादृषेः ।**
**उदितः यादृशः पूर्वं तादृशं श्रृणु मेऽखिलम् ॥**
**षष्टिभेदं स्मृतं तन्त्रं साङ्ख्यं नाम महामुनेः ॥**
**प्राकृतं वैकृतञ्चेति मण्डले द्वे समासतः ॥**

**( अहि. सं – 8-9 )**

आचार्यः भास्करोऽपि वेदान्तसूत्रे लिखति –

**''यदि ब्रह्मैवोपादानकारणं च, ततः कपिलमहर्षिप्रणीत षष्ठीतन्त्राख्यस्मृतेरनवकाशो निर्विषयत्वम्''**

(2-1-1) इति ।

शङ्कराचार्योऽपि वेदान्तसूत्रे प्रतिपादयति –

**''स्मृतिश्च तन्त्राख्या परमर्षिप्रणीता''** (2-1-1) इति ।

भामतीव्याख्याकारेण वाचस्पतिमिश्रेणापि उक्तं यत् –

**''तन्त्र्यते व्युत्पाद्यते मोक्षशास्त्रमनेन इति तन्त्रं तदेवाख्याः यस्यां सा स्मृतिः तन्त्राख्या परमर्षिणा कपिलेनादि विदुषा प्रणीता इति ।''**

**कपिलशिष्यपरम्परा**

कपिलमुनिः स्वशिष्याय आसूरये साङ्ख्यं शिक्षयामास । आसूर्यनन्तरं पञ्चशिखः, ईश्वरकृष्णः, भार्गवः उल्लुकः, वाल्मीकिः, हारीतः, वार्षगण्यः, वसिष्ठः, गर्ग इत्येते साङ्ख्यवाङ्मयस्य उपबृहणं कृतवन्तः ।

साम्प्रतं साङ्ख्यदर्शनमधिकृत्य अनेके ग्रन्थाः समुपलभ्यन्ते । यथा – तत्त्वसमासः, षष्ठीतन्त्रम्, अनिरुद्धवृत्तिः, पञ्चशिखिसूत्रम्, साङ्ख्यकारिका इत्यादयः ।

साङ्ख्यस्य मूलसूत्राणां त्रयः व्याख्याकाराः भाष्यकाराः वा प्रसिद्धास्सन्ति । यथा – अनिरुद्धः (1100 ई.), महादेवः (1300 ई.), विज्ञानभिक्षुः (1400 ई.) च ।

साङ्ख्यदर्शनस्य प्रसिद्धेषु ग्रन्थेषु ईश्वरकृष्णेन रचिता साङ्ख्यकारिका अतीव सुलभा सुबोधगम्या अस्ति । अत एव पठनपाठनसम्प्रदाये साङ्ख्यकारिकायाः समावेशः विद्वद्भिः कृतः अस्ति । साङ्ख्यकारिकायाः सप्त व्याख्यानानि साम्प्रतं समुपलभ्यन्ते । यथा – 'माठरवृत्तिः' (आचार्यमाठरेणरचिता), 'युक्तिदीपिका', 'गौडपादभाष्यम्', 'जयमङ्गला', 'चन्द्रिका' (नारायणतीर्थरचिता), 'तत्त्वकौमुदी' (वाचस्पतिमिश्रेण रचिता), 'सुवर्णसप्तशास्त्रम्' (पारमार्थरचितम्) च ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्त्वा उत्तरं लिखत ।**

(1) साङ्ख्यकारिकाकारः अस्ति ।

(क) कपिलर्षिः (ख) कणादः (ग) जैमिनिः (घ) ईश्वरकृष्णः

(2) विज्ञानभिक्षुः वर्तते ।

(क) सूत्रकारः (ख) वार्तिककारः (ग) भाष्यकारः (घ) कारिकाकारः

(3) साङ्ख्यदर्शनस्य प्रणेता वर्तते ।

(क) महर्षिः कपिलः (ख) माठरः (ग) बादरायणः (घ) गर्गः

(4) षडध्यायात्मकमस्ति ।

(क) माठरवृत्तिः (ख) गर्गभाष्यम् (ग) कपिलसूत्रम् (घ) तत्त्वकौमुदी

(5) कपिलमुनेः प्रथमशिष्यः अस्ति ।

(क) आसुरिः (ख) ईश्वरकृष्णः (ग) महादेवः (घ) पञ्चशिखः

(6) तत्त्वकौमुदी ग्रन्थस्य प्रणेता अस्ति ।

(क) महादेवः (ख) वाचस्पतिः (ग) नारायणः (घ) माठरः

**2. रिक्तस्थानं पूरयत ।**

(1) सङ्ख्यां प्रकुर्वते ............. प्रकीर्तिताः ।

(2) चन्द्रिकाग्रन्थस्य रचयिता ........... वर्तते ।

(3) विज्ञानभिक्षोः समयः ............ अस्ति ।

(4) वेदान्तसूत्रस्य प्रणेता ............ वर्तते ।

(5) देवहूतिकर्दमयोः पुत्रः ............ ।

(6) श्वेतश्च हरितश्चैव ............ अभवत् ॥

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) विज्ञानभिक्षुः | (1) माठरवृत्तिः |
| (2) श्रीकपिलः | (2) साङ्ख्यकारिका |
| (3) ईश्वरकृष्णः | (3) प्रवचनभाष्यम् |
| (4) माठराचार्यः | (4) सूत्राणि |
| (5) भास्करः | (5) सुवर्णसप्तशास्त्रम् |
| | (6) वेदान्तसूत्रम् |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) विज्ञानभिक्षोः कति कृतयः सन्ति ?

(2) साङ्ख्यदर्शनस्य आद्यप्रवर्तकः कः ?

(3) ईश्वरकृष्णप्रणितकारिकायाः किम् नाम ?

(4) साङ्ख्यदर्शनानुगुणं कति तत्त्वानि प्रसिद्धानि ?

(5) ईश्वरकृष्णस्य कः समयः ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) नारायणतीर्थेन रचिताः कृतयः काः ?

(2) शङ्कराचार्येण वेदान्तसूत्रे किम् उक्तम् ?

(3) साङ्ख्यशास्त्रस्य त्रयः भाष्यकाराः के ?

**6. टिप्पणीं लिखत ।**

(1) ईश्वरकृष्णः ।

(2) श्रीकपिलर्षिः ।

(3) विज्ञानभिक्षुः ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) साङ्ख्यदर्शनस्य आद्यप्रवर्तकः महामुनि-कपिलस्य परिचयं कारयत ।

(2) साङ्ख्यकारिकाकारं परिचयं कारयत ।

(3) साङ्ख्यदर्शनपरम्परायाः परिचयं कारयत ।

●

# ३ साङ्ख्यदर्शनग्रन्थानां परिचयः

**प्रस्तावना** -

आस्तिकदर्शनेषु सांख्यदर्शनस्य स्थानम् अतिविशिष्टं वर्तते । अस्मिन् शास्त्रे प्रकृतिपुरुषयोः लक्षणवर्णनादिकं सम्यक् प्राप्यते । प्रकृत्या एव महदादिनाम् उत्पत्तिरिति विषयाः सांख्यदर्शनपठनेनैव ज्ञायते । पुनश्च यथा अस्माभिः व्यवहारे त्रैगुण्यं अनुभूयते सांख्यदर्शनमपि तथैव अनुभावयति, यतः तत्कारणीभूतायाः प्रकृतेरपि त्रिगुणात्मकत्वादिति ।

---

**साङ्ख्यकारिका ॥**

समुपसर्गात् **'ख्या'** - प्रकथने इति धातोः **'आङ्'** प्रत्यये, **'टाप्'** प्रत्यये च साङ्ख्यशब्दस्य निष्पतिः । ततः **'तस्येदम्'** इत्यनेन सूत्रेण **'अण्'** प्रत्यये **'साङ्ख्यम्'** इति शब्दस्य निष्पत्तिः भवति ।

समुपसर्गात् **'चक्षिङ्'** - व्यक्ते स्पष्टीकरणे च इति धातोरपि साङ्ख्यशब्दः निष्पद्यते । एवं सङ्ख्यायन्ते गण्यन्ते येन तत्साङ्ख्यं सङ्ख्यायते प्रकृतिपुरुषान्यथाख्यातिरूपः अवबोधः सम्यक् ज्ञायते येन तत्साङ्ख्यमिति । **'सङ्ख्या चर्चा विचारणा'** इत्यमरः । सङ्ख्यायाः वर्णनं यत्र क्रियते तत् साङ्ख्यम् इति । महाभारते उक्तमस्ति । यथा–

**सङ्ख्यां प्रकुर्वते चैव प्रकृतिञ्च प्रचक्षते ।**
**तत्त्वानां चतुर्विंशतिस्तेन साङ्ख्याः प्रकीर्तिताः ।** (महा. भा.शा. 306–43)

महामुनिना श्रीकपिलेन प्रणीतं साङ्ख्यदर्शनमिदं सकलन्यायमीमांसाप्रभृतिदर्शनेभ्यः अतीवप्राचीनमिति च कर्णाकर्णिकया परम्परया श्रूयते । साङ्ख्यदर्शनं समधिकृत्य अनेकैः विद्वद्भिः व्याख्यानानि टीकाश्च समारचिताः । तत्र पञ्चशिखाचार्यप्रणीतं षष्ठितन्त्रम्, तत्त्वसमासः प्रथिताः । आचार्यमाठरेण कृतं माठरवृत्तिः, नारायणतीर्थरचिता जयमङ्गला, चन्द्रिका, वाचस्पतिमिश्रकृता तत्त्वकौमुदी इत्यादयः । एतेषु बहुष्वपि ग्रन्थेषु सत्स्वपि साङ्ख्यसिद्धान्तमर्मज्ञानां साङ्ख्यानां मानसेषु ईश्वरकृष्णाविरचिता साङ्ख्यकारिका एव राराजते ।

अत एव एषा साङ्ख्यकारिका पठनपाठनसम्प्रदाये साम्प्रतमपि उपलब्धा समादृता च वर्तते । अस्याः कारिकायाः लोकप्रियता प्रामाणिकता तु प्रसिद्धा एव । भगवत्पादशङ्काराचार्येण स्वीये शारीरकभाष्ये साङ्ख्यसिद्धान्तानां व्याख्यावसरे साङ्ख्यकारिका एव उद्धृता बहुत्र । तेनैव अस्याः कारिकायाः प्राचीनता प्रामाणिकता च सिद्ध्यति ।

न केवलमेतावता अपि तु षष्ठशताब्द्यां चीनीभाषायामपि इयमनूदिता । तत्र कारिका इयं हिरण्यसप्ततिः, स्वर्णसप्ततिः नाम्ना वा प्रसिद्धा वर्तते। सामान्यतया ईश्वरकृष्णस्य समयः चतुर्थशतकम् इति विदुषाम् उद्घोषः । तदाधारीकृत्य अस्याः कारिकायाः समयः चतुर्थशतकम् एव इति अनुमातुं शक्यते ।

इयं हि साङ्ख्यकारिका द्विसप्ततिभिः आर्याभिः बद्धा वर्तते । अत्र साङ्ख्यराद्धान्तत्त्वेन त्रिविधं प्रमाणं, पुरुषः, प्रकृतिः, मोक्षः, सत्कर्मवादः, पुरुषजडत्वम्, सृष्टिक्रमः, सदसत्ख्यातिः इत्यादयः विषयाः निरूपिताः । अस्याः कारिकायाः अनेकाः टीकाः व्याख्यानानि च उपलभ्यन्ते । तासु वृत्तिषु माठरवृत्तिः अत्यन्तं प्राचीनत्वं भजते ।

दुःखानाम् आत्यन्तिकनिवृत्तिरेव साङ्ख्यदर्शनस्य मुख्यः प्रतिपाद्यविषयः, प्रकृतिपुरुषविषयक–भेदज्ञानजन्यमुक्तिलाभ एव अस्य प्रयोजनं भवति । अत्र पञ्चविंशतितत्त्वानां विमर्शः क्रियते । एतेषां सम्यक् ज्ञानेन मोक्षो लभ्यते इति दर्शनस्यास्य प्रमुखः सिद्धान्तः । तत्रोच्यते -

**पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे वसेत् ।**
**जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥**

अत्रोक्तानि पञ्चविंशति तत्त्वानि यथा - पुरुषः, प्रकृतिः, महत्, अहङ्कारः, पञ्चतन्मात्राणि, मनः, पञ्चज्ञानेन्द्रियाणि, पञ्चकर्मेन्द्रियाणि, पञ्चमहाभूतानि इति । एतेषां चत्वारो विभागाः दर्शिताः ।

(1) केवलप्रकृतिः (प्रकृतिः प्रधानं वा), (2) प्रकृतिविकृत्युभयात्मकानि तत्त्वानि । (महत्, अङ्कारः,पञ्च तन्मात्राणि च), (3) केवलविकृतयः (एकादशेन्द्रियाणि पञ्चमहाभूतानि च) (4) न प्रकृतिः न विकृतिः (पुरुषः) ।

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ॥** (सां. का. - 3)

अत्र द्विसप्ततिकारिकासु अन्तिमाः तिस्रः साङ्ख्यशास्त्रस्य आचार्यपरम्परां निरूपयन्ति । अत्र गौडपादाः एकोनसप्ततिकारिकाणां कृते एव भाष्यं व्यलिखन् । अन्ये च सप्तति शब्देन साङ्ख्यकारिकाः सप्ततिः 70 इति वदन्ति । एका लुप्ता इति विदुषां निर्णयः । साङ्ख्यदर्शनस्य सिद्धान्ताः ईश्वरकृष्णेन कारिकामाध्यमेन निरूपितास्सन्ति । सूत्रग्रन्थस्तु आद्यग्रन्थत्वेन सर्वमान्यः अस्ति । तेन साङ्ख्यसूत्राणां प्राचीनता स्वीकृतिश्च सिद्ध्यति एव ।

**साङ्ख्यकारिकायाः व्याख्यानानि ॥**

**(1) साङ्ख्यकारिकाभाष्यम्** - इयं टीका गौडपादभाष्यनाम्ना प्रसिद्धा । साङ्ख्यकारिकायाः प्राचीनतमेयं टीका, नात्र कस्या अप्यन्यस्याः टीकायाः उल्लेखः इत्येव प्राचीनत्वं द्योतयति ।

**समयः** - अस्याः टीकायाः समयः ई. सप्तमशताब्दी निर्धार्यते ।

**(2) माठरवृत्तिः** - माठराचार्योऽस्याः टीकायाः कर्ता । कुत्रचित् अस्याः टीकायाः गौडपादभाष्यसाम्यं दृश्यते । युक्तिदीपिकाकारः कुत्रचित् खण्डनं कृतवानस्याः तेन हेतुना युक्तिदीपिकातः प्राचीनेयं टीका इति विज्ञायते ।

**समयः** - अस्याः माठरवृत्तेः समयः पञ्चमशताब्द्याः मध्यभागः वर्तते इति ऐतिह्यविदः कथयन्ति ।

**(3) जयमङ्गला** - श्रीशङ्कराचार्यनाम्ना साङ्ख्यकारिकायाः सम्प्राप्ता टीका जयमङ्गलाख्या प्रसिद्धा वर्तते । वाचस्पतिमिश्रः स्वतत्त्वकौमुदीनामिकायां टीकायामस्याः बहुशः उल्लेखं कृतवान् । अत्र टीकेयं द्विसप्ततिकारिकासु समुपलभ्यते ।

**(4) साङ्ख्यतत्त्वकौमुदी** - टीकेयं सर्वथा पाण्डित्यपूर्णा तैनैव लोकमानसविलासिनी जाता । वाचस्पतिमिश्रोऽस्याः टीकायाः कर्ता । स च अष्टमशताब्द्यामासीत् । तेनास्याः समयः स एव । अस्यां टीकायां साङ्ख्यसिद्धान्तानां सरलं सूक्ष्मं विवेचनं कृतमस्ति ।

**(5) युक्तिदीपिका** - 1138 ई. वर्षे टीकेयं कलकत्तातः प्राप्ता, यया चास्माकं गौरवं संवर्धितं वर्तते । इत्थं साम्प्रतं प्रचलितसाङ्ख्यशास्त्रस्य मूलभूतेयं साङ्ख्यकारिका समुपलब्धास्ति।

**साङ्ख्यप्रवचनभाष्यम् ॥**

साङ्ख्यदर्शनस्य मूलभूतानि कपिलग्रथितानि यानि सूत्राणि सन्ति, तेषामेव सूत्राणां प्रसिद्धं भाष्यमिदं शोभते । भाष्यस्यास्य रचयिता वेदान्ती संन्यासी विज्ञानभिक्षुः वर्तते । सदानन्दः यतिः स्वस्य अद्वैतब्रह्मसिद्धिनामके स्वीये ग्रन्थे विज्ञानभिक्षुं सस्मार । भाष्यस्य अस्य पद्यान्यपि तत्र तत्र अवतारितवान् । तेन अस्य समयः चतुर्थशताब्दी इति सिद्ध्यति । केचन ऐतिह्यविदः सप्तदशशताब्द्यां वा अस्य ग्रन्थस्य समयनिर्धारणं कुर्वन्ति । भाष्यस्य शैली नातिगम्भीरा, नातिक्लिष्टा, सर्वजनसुबोधा, साङ्ख्यशास्त्रस्य तत्त्वानां सूत्रभावबोधिनी वर्तते ।

भाष्यमिदं श्रीकपिलविरचिते षडध्यायात्मके साङ्ख्यदर्शने परिपूर्णा प्राप्यते । तथास्य प्रचारः, प्रसारो बहुत्र अभ्यासे सूत्रैः सह एव सुबद्धः दृश्यते ।

**प्रथमः विषयाध्यायः** आत्यन्तिकदुःखनिवृत्तिरूपस्य परमपुरुषार्थस्य मोक्षस्य सर्वादौ विवेचनं विधाय तदुपयोगित्वञ्च प्रतिपादितम् । ततः बन्धहेतुपरीक्षाणां लक्षणादिकं निरूप्य अविवेकस्य विनाशहेतवः सम्यक् निरूपिताः सन्ति । ततश्च प्रासङ्गिकस्य साङ्ख्याभिमतस्य प्रमेयभागस्य प्रत्यक्षाद्यनुमानस्य च निरूपणं सरलया भाषया कृतम् । ततः उपादानकारणादिकं विमृश्य पुनः मोक्षस्य विवेचनं कृतमस्ति । ततः प्रमेयसिद्धिविचाराः, सत्कार्यवादः, पुरुषजडत्वम्, भोक्तृत्वञ्च इत्यादि विषयाः निरूपितास्सन्ति ।

**द्वितीयोऽध्यायः** प्रकरणत्रयात्मकः प्रधानकार्याध्यायः वर्तते । अत्र सृष्टिप्रयोजनम्, सृष्टिप्रक्रिया, स्वसिद्धान्तानुसारिणी दर्शिता । ततः इन्द्रियाणां भौतिकत्वं सम्यक् निराकृतम् ।

**तृतीयः वैराग्याध्यायः** वर्तते । अत्र महाभूतानां वर्णनम्, स्थूलसूक्ष्मभेदेन द्विविधशरीराणाम् उपादानवर्णनं च निरूपितमस्ति । ततः सामान्यविषयाभ्यां मुक्तिसाधनानि विविच्य, बन्धहेतुविपर्ययस्य तत्कारणशक्त्यादीनां स्वरूपं सुबोधतया प्रतिपादितम् । ततः परं परमप्रयोजनस्य समाप्तौ स्वतः एव प्रधानस्य निवृत्या मोक्षसिद्धिः इति प्रतिपादनाय विवेकसिद्धिः तदुपायाश्च वर्णिताः सन्ति ।

**चतुर्थः आख्यायिकानामकः** अध्यायोऽस्ति । अत्र विवेकज्ञानसाधनवर्णनात्मकम् एकमेव प्रकरणं निरूपितमस्ति ।

**पञ्चमाध्यायः परपक्षनिर्णयनामकः** अस्ति । अध्याये अस्मिन् 'अविद्यातः बन्धनम्' इति वेदान्तमतखण्डनम् , वेदनित्यत्वखण्डनम्, स्फोटनिराकरणम्, नैयायिकमतखण्डनादिविषयाः निरूपिताः । अत्र षोडशप्रकरणानि सन्ति ।

**षष्ठाध्याये सारभूतः शास्त्रार्थः** सङ्कलितो वर्तते । प्रथमं आत्मत्वस्य निरूपणं कृतम्, ततः जगत्कारणत्वं विचार्य, पुरुषबहुत्वविवेचनं कृत्वा उपसंहारः कृतः ।

भाष्यमिदं सम्पूर्णेषु षडध्यायेषु द्विचत्वारिंशत् प्रकरणेषु पूर्णरूपेण प्राप्यते । साङ्ख्यशास्त्रमतज्ञानाय श्रीविज्ञानभिक्षुकृतं साङ्ख्यप्रवचनभाष्यम् इदम् उपादेयमेव आपतति ।

**साङ्ख्यसूत्राणि**

इदञ्चास्ति साङ्ख्यदर्शनं सकलभारतीयदर्शनेभ्योऽतीव प्राचीनं दर्शनम् । प्राचीनतमं दर्शनमित्यपि सर्वेऽपि दार्शनिकाः समभ्युपगच्छति । इदञ्च शास्त्रं प्रकृति-पुरुष-तत्संयोगानाञ्च नित्यत्वप्रतिपादनपरं सत् तदतिरिक्तस्य सर्वस्याप्यनित्यत्वं प्रतिपादयतीति द्वैतभेदप्रतिपादकमस्ति ।

साङ्ख्यशास्त्रस्य ये केऽपि ग्रन्थाः प्राप्यन्ते तेषां मूलस्य गवेषणे, इमानि सूत्राण्येव कारिकया सह समायान्ति । साङ्ख्यशास्त्रस्य आकारग्रन्थत्वेन सर्वेऽपि विद्वांसः साङ्ख्यसूत्राण्येव अङ्गीकुर्वन्ति । न्याय-वैशेषिकादि-दर्शनानां मूलग्रन्थाः यथा सूत्रबद्धाः सन्ति तथा एव साङ्ख्यदर्शनस्यापि ग्रन्थः सूत्रबद्धोऽस्ति । इमानि हि साङ्ख्यसूत्राणि षडध्यायेषु विभक्तानि सन्ति । तत्र च सप्तविंशत्युत्तरपञ्चशतं (527) सूत्राणि वर्तन्ते ।

प्रथमाध्यायात् तृतीयाध्यायपर्यन्तं साङ्ख्यशास्त्रस्य अस्य प्रमुखाः सिद्धान्ताः निगदिताः वर्तन्ते । तदनु चतुर्थाऽध्याये दृष्टान्तानां निरूपणं प्राप्यते । ततः प्रमाणाख्ये अध्याये तत्तद्दर्शनविचारान् युक्तियुक्तं खण्डनं कृत्वा स्वसिद्धान्ताः सम्यक् प्रतिपादिताः सन्ति । अन्तिमाध्याये षष्ठाध्याये पुनः प्रकृति-पुरुष-मोक्षादि पूर्वोक्ताः विचाराः उपसंहारत्वेन संकलय्य निरूपिताः वर्तन्ते । एतेषां सूत्राणां रचनापद्धतिः, विषयगम्भीरता, सरलारीतिः इत्यादयः ईश्वरकृष्णरचितसाङ्ख्यकारिकायामपि द्रष्टुं शक्यते ।

साङ्ख्यसूत्रमधिकृत्य अनेकाः टीकाः लिखिताः प्रकाशिताश्च । तासु टीकात्रयं साम्प्रतं समुपलभ्यते । यथा - अनिरुद्धवृत्तिः, साङ्ख्यवृत्तिसारः, साङ्ख्यप्रवचनभाष्यम् ।

**(1) अनिरुद्धवृत्तिः** । महादेवः वेदान्ती स्ववृत्तौ प्रतिपादयत् -

**''दृष्ट्वाऽनिरुद्धवृत्तिं बुद्ध्वा साङ्ख्यीय सिद्धान्तम् ।**
**विरचयति वृत्तिसारवेदान्त्यादिर्महादेवः ॥''**

अनेन स्पष्टी भवति यत् इयं वृत्तिः साङ्ख्यसूत्राणां अतिप्राचीनतमा वर्तते । तथा च अस्याः समयः एकादशशताब्दः अस्ति ।

**(2) साङ्ख्यवृत्तिसारः** । आचार्यानिरुद्धकृतवृत्याधारेण महादेव वेदान्तिना एव साङ्ख्यसूत्रस्य टीका रचिता वर्तते । तदर्थमेव एतस्य नाम वृत्तिसारः इति । समयश्चास्य त्रयोदशशताब्दिरिति मन्यते ।

**(3) साङ्ख्यप्रवचनभाष्यम्** । सांख्यसूत्राणां प्रथितमिदं भाष्यम् अनितरसाधारणमस्ति । अस्य भाष्यस्य कर्ता विज्ञानभिक्षुः । स च एकः वेदान्ती संन्यासी आसीत् । अत्र च भाष्ये साङ्ख्यदर्शनानां मूलभूतानि तत्त्वानि संगृह्य विशिष्टार्थः प्रतिपादितोऽस्ति ।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) साङ्ख्यसूत्राणि सन्ति ।

(क) 528 (ख) 529 (ग) 527 (घ) 525

(2) साङ्ख्यप्रवचनभाष्यकारः अस्ति ।

(क) कपिलः (ख) महादेवः (ग) विज्ञानभिक्षुः (घ) एकोऽपि न

(3) साङ्ख्यदर्शने अध्यायाः सन्ति ।

(क) सप्त (ख) दश (ग) पञ्च (घ) नव

(4) साङ्ख्यकारिका: वर्तन्ते ।

(क) 78 (ख) 72 (ग) 75 (घ) 79

(5) अनिरुद्धवृत्तिकार: अस्ति ।

(क) श्रीहर्ष: (ख) महादेव: (ग) कश्यप: (घ) पार्थ:

(6) साङ्ख्यप्रवचनभाष्यस्य तृतीयाध्यायस्य नाम अस्ति ।

(क) आख्यायिका (ख) वैराग्यम् (ग) प्रकरणाध्याय: (घ) विषयाध्याय:

**2. रिक्तस्थानं पूरयत ।**

(1) पञ्चमाध्याय: .......... नामकोऽस्ति ।

(2) सङ्ख्यां प्रकुर्वते ........... प्रकीर्तिता: ।

(3) साङ्ख्यकारिका ............ छन्दसि वर्तते ।

(4) ईश्वरकृष्णरचिता ........... अस्ति ।

(5) ईश्वकृष्णस्य समय: ............ शतक: वर्तते ।

(6) साङ्ख्यतत्त्वकौमुदी ............. रचिता अस्ति ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) युक्तिदीपिका | (1) विज्ञानभिक्षु: |
| (2) साङ्ख्यकारिका | (2) श्रीकपिल: |
| (3) साङ्ख्यसूत्राणि | (3) गौडपादा: |
| (4) प्रवचनभाष्यम् | (4) चक्रवर्ती |
| (5) साङ्ख्यकारिकाभाष्यम् | (5) ईश्वरकृष्ण: |
| | (6) जयन्त: |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) विज्ञानभिक्षु: क: ?

(2) स्फोटनिराकरणं कस्मिन् अध्याये वर्तते ?

(3) साङ्ख्यतत्त्वकौमुदीकार: क: ?

(4) साङ्ख्यवृत्तिसार: क: ?

(5) भाष्यं कतिप्रकरणेषु विभक्तम् ?

**5. द्वित्रवाक्यै: उत्तरं लिखत ।**

(1) प्रथमाध्याये के विषया: निरूपिता: ?

(2) जयमङ्गलाकृति: केन विरचिता ?

(3) गौडपादभाष्यनाम्ना प्रसिद्धा का टीका अस्ति ?

**6. टिप्पणीं लिखत ।**

(1) साङ्ख्यकारिका । (2) साङ्ख्यप्रवचनभाष्यम् । (3) साङ्ख्यसूत्राणि ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) साङ्ख्यसूत्राणां वैशिष्ट्यं प्रतिपादयत ।

(2) साङ्ख्यकारिकाया: विषयान् संक्षिप्तरूपेण निरूपयत ।

(3) साङ्ख्यदर्शनग्रन्थान् परिचाययत ।

●

# ४ साङ्ख्ययोगयोः परस्परसम्बन्धः

**प्रस्तावना -**

ज्ञानादृते न मुक्तिः ।

**सर्व ज्ञानप्लवेनैव वृजिनं सन्तरिष्यसि ।**
**ज्ञानं लब्ध्वा परां शान्तिमचिरेणाधिगच्छति ।( श्री. भ. गी. - 4-36 )**

इत्यादि वचनानुगुणं जीवात्मना प्राप्यं वस्तु ज्ञानमेव इति निश्चीयते । तथा च ज्ञानस्य प्राप्तेरनन्तरम् अज्ञानात् मिथ्याज्ञानात् वा निवृत्तिः भवति । पुनश्च शास्त्रमिदं न्यायवैशेषिकमिव व्यवहारानुगुणं वर्तते । चराचरमिदं विश्वं सुखदुःखमोहात्मकमस्ति । कारणगुणाः कार्यगुणानारभन्ते - इत्यनेन न्यायेन विश्वस्य कर्तृत्वेन त्रयाणां सत्वरजस्तमोगुणानां कारणत्वं स्पष्टमिति ।

---

**गुणत्रयस्वरूपम् ।**

सम्यक् ख्यानं संख्या, संख्यैव सांख्यं प्रकृतिपुरुषविवेकात्मकं विशिष्टं ज्ञानमित्यर्थः । श्रीशङ्कराचार्याः विष्णुसहस्त्रनामभाष्ये सांख्यशब्दस्य विशुद्धात्मज्ञानम् इत्यर्थं प्रतिपादयन्ति । **शुद्धात्मतत्त्वविज्ञानं सांख्यमित्यभिधीयते** इति तेषां सांख्यशब्दनिर्वचनात्मिका कारिका वर्तते । मत्स्यपुराणे अपि संख्याशब्दस्य सांख्यवाचकत्वं वर्णितम् । यथा - **सांख्यं संख्यात्मकत्वाच्च कपिलादिभिरुच्यते** इति । देवतीर्थस्वामिनः इत्थं सांख्यशब्दार्थँ विश्लेषयन्ति - सम्यक् क्रमपूर्वकं ख्यानं कथनं यस्याः सा संख्या क्रमपूर्विका विचारणा, तादृशीं विचारणामधिकृत्य कृतं शास्त्रं सांख्यमिति ।

सांङ्ख्यशास्त्रे पञ्चविंशति तत्त्वानि सन्ति । प्रकृतिः, महत्, अहङ्कारः, पञ्चतन्मात्राणि (रुप-रस-गन्ध-स्पर्श-शब्दाः), मनः, पञ्चज्ञानेन्द्रियाणि (श्रोत्रम्, त्वक्, चक्षुः, रसना, नासा) पञ्च कर्मेन्द्रियाणि (वाक्, पाणिः, पादः, पायुः, उपस्थः) पञ्च महाभूतानि (पृथिवी, जलम्, तेजः, वायुः, आकाशम्ः) पुरुषः (जीवात्मा) ।

**मूलप्रकृतिरविकृतिः महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारः न प्रकृतिर्नविकृतिः पुरुषः ॥ ( सां. का. - 3 )**

तत्र मूलप्रकृतिः त्रिगुणात्मिका, विवेकवती, विषयरूपा, समान्या, अचेतना, प्रसवधर्मिणी इत्यादि अनेकैः नामभिः व्यवह्रीयते । प्रधानप्रकृतिमाश्रित्य त्रयः गुणाः वर्तन्ते । ते च सत्वरजस्तमोनामाख्याः । तथा च त्रयाणां गुणानां साम्यावस्थायां प्रलयो भवति, वैषम्यावस्थायां तु सृष्टिरुत्पद्यते । तथा च कालभेदेन एतेषां गुणानां न्यूनाधिक्यं भवति । यदा सत्वगुणस्य प्रधानता दृश्यते, तदा रजः तमः च न्यूनी भवतः । एवञ्च यदा रजोगुणस्य प्रधानता भवति, तदा सत्वम् तमः च न्यूनी भवतः । तमोगुणस्य प्रधानतायां तु सत्वरजसी न्यूनी भवतः । गुणानां स्वरूपमवगन्तुं कारिकाद्वयम् आरचितम् ग्रन्थकारैः । तद्यथा-

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ 12 ॥ ( सां. का. - 12 )**

सत्त्वम्, रजः तमश्चेति गुणाः यथासंख्यं प्रीति-अप्रीति-विषादस्वरूपाः भवन्ति । प्रीतिश्च अप्रीतिश्च विषादश्च प्रीत्यप्रीतिविषादाः । ते आत्मनः स्वरूपाणि येषां ते प्रीत्यप्रीतिविषादात्मकाः अर्थात् सत्त्वं सुखस्वरूपं, रजः दुःखस्वरुपं, तमः मोहस्वरुपमिति ।

प्रकाशप्रवृत्तिनियमार्थाः ते गुणाः भवन्ति । प्रकाशश्च प्रवृत्तिश्च नियमश्च प्रकाशप्रवृतिनियमाः येषां ते प्रकाशप्रवृत्ति-नियमाः । सत्त्वगुणस्य प्रकाशः प्रयोजनम्, रजोगुणस्य प्रवृत्तिः प्रयोजनम्, तमोगुणस्य प्रतिबन्धः प्रयोजनं भवति । एते गुणाः अन्योन्याभिभववृत्तयः, अन्योन्याश्रयवृत्तयः, अन्योन्यजननवृत्तयः, अन्योन्यमिथुनवृत्तयश्च भवन्ति ।

सत्त्वगुणे अभिवृद्धे सति इतरौ रजस्तमसी अभिभूयेताम् । तदा शान्तावृत्तिः भवति । एवं रजोगुणस्य उत्कटत्वे सत्वं तमश्च अभिभूयेताम् । तदा घोरावृत्तिः भवति । तमोगुणस्य अभिवृद्धे सत्वं रजश्च अभिभूयेताम् । तदा मूढावृत्तिः सम्भवति । इत्थं च गुणानाम् अन्योन्याभिभववृत्तयः ।

यद्यपि घटवत् भूतलम् इत्यत्र गुणानाम् आधाराधेयभावो न भवति तथापि यदपेक्षया यस्य क्रिया स तस्या आश्रयः ।

तथाहि–सत्वगुणः प्रवृत्तिनियमावाश्रित्य रजस्तमसोः प्रकाशेन उपकरोति, रजः प्रकाशनियममाश्रित्य सत्त्वतमसोः प्रवृत्या उपकरोति, एवञ्च तमः प्रकाशप्रवृत्तिम् आश्रित्य सत्त्वरजसोः नियमेन उपकरोति । इत्थं च गुणानाम् अन्योन्याश्रयवृत्तयः ।

सत्त्वादिगुणानां मध्ये कश्चित् एको गुणः अन्यतमम् आश्रित्य समुत्पादयति । सर्वेऽपि गुणाः परस्परं मिलित्वैव सर्वकार्यजनकीभूता भवन्ति । पारस्परिकसहयोगेनैव महदादिकार्योत्पादकाः भवन्ति इत्यर्थः । इत्थं च गुणानाम् अन्योन्यजनन–वृत्तयः ।

त्रयोऽपि गुणाः स्त्रीपुरुषवत् परस्परं सम्मिलिताः सन्ति । सत्त्वगुणः रजोगुणस्य सहचारी अस्ति । सत्त्वगुणस्य रजोगुणः सहचारी अस्ति । उभयोः तमोगुणः सहचारी अस्ति । गुणानाम् अनादित्वेन तेषां संयोगस्यापि अनादित्वं विज्ञेयम् । एतेषां पार्थक्यं न उपलभ्यते । सर्वकालावच्छेदेन परस्परम् एतेषां संयुक्तत्वात् ।

**अन्योऽन्यमिथुनाः सर्वे सर्वे सर्वत्र गामिनाः ।**
**रजसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।।**
**तमसश्चाऽपि मिथुने ते सत्वतमसी उभे ।**
**उभयोः सत्त्वरजसोर्मिथुनं तम उच्यते ।।**
**नैषामादिः सम्प्रयोगो वियोगो वोपलभ्यते ॥ ( देवी. भा. 3-8 )**
**सत्त्वं लघुप्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**
**गुरुवरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ 13 ॥**

लघुत्वं, प्रकाशकत्वञ्च सत्त्वगुणस्य लक्षणम् । उपष्टम्भकत्वं, चलत्वञ्च रजोगुणस्य लक्षणम् । गुरुत्वं, वरणकत्वञ्च तमोगुणस्य लक्षणम् ।

लघुत्वं च कार्योद्गमने हेतुः धर्मः । प्रकाशकत्वं च विषयावभासकत्वम् । उपष्टम्भकत्वं च उत्तेजकत्वम् । चलत्वं च क्रियात्वम् । गुरुत्वं च आधिक्यपरम् । वरणत्वं च सहायकम् ।

**अपवर्गस्वरूपम्**

धर्मार्थकाममोक्षेषु चतुर्विधपुरुषार्थेषु मोक्षैव परमपुरुषार्थः इति सर्वेऽपि दार्शनिकाः आमनन्ति । सांख्यैः मोक्षम् अपवर्गशब्देन व्यवह्रीयते । अप इत्युपसर्गपूर्वकं वृजु वर्जने धातोः निष्पन्नोऽयम् अपवर्गशब्दः संसारमूलस्य सकलस्य दुःखस्य आत्यन्तिकीं निवृत्तिम् उपपादयति । मोक्षः, अमृतम्, निःश्रेयसम् इत्यादिशब्दैः अपवर्गः ज्ञायते । प्रकृतिः महदादिभूतपर्यन्तं वस्तुनि किमर्थं सृजति ? प्रकृतिपुरुषविमोक्षार्थमेव । प्रकृतिः माता शिशुरिव अस्मान् पालयति । हिताय प्रवर्तते । पुरुषविमोक्षार्थं प्रयतते च ।

**वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।**
**पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ 57 ॥**
**औत्सुक्यनिवृत्यर्थं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।**
**पुरुषस्य विमोक्षार्थं प्रवर्तते तद्वदव्यक्तम् ॥ 58 ॥**
**रङ्गस्य दर्शयित्वा निवर्तते नर्तकी यथा नृत्यात् ।**
**पुरुषस्य तथात्मानं प्रकाश्य विनिवर्तते प्रकृतिः ॥ 59 ॥**
**प्रकृतेः सुकुमारतरं न किञ्चिदस्तीति मे मतिर्भवति ।**
**या दृष्टास्मीति पुनर्न दर्शनमुपैति पुरुषस्य ॥ 61 ॥**
**रुपैस्सप्तभिरेव बध्नात्यात्मानमात्मना प्रकृतिः ।**
**सैव च पुरुषार्थं प्रति विमोचयत्येकरूपेण ॥ 63 ॥**

यथा वत्सविवृद्ध्यर्थं क्षीरस्य प्रवृत्तिः तथा पुरुषकल्याणार्थं प्रकृतेः प्रवृत्तिः सम्भवति । यथा वा लोकः औत्सुक्यनिवृत्त्यर्थं

गमनागमनादि क्रियासु प्रवर्तते कृतकार्यश्च निवर्तते तद्वत् प्रधानं पुरुषस्य विमोक्षार्थं प्रवर्तते । यथा च नर्तकी श्रृंगारादिरसैः रत्यादिभावैश्च सुबद्धानि गीतादि नृत्यानि रङ्गस्य दर्शयित्वा कृतकार्या नृत्यान्निवर्तते तथा प्रकृतिरपि पुरुषं प्रति आत्मानं प्रकाश्य बुद्ध्यहंकारतन्मात्रादिभ्यः निवर्तते ।

एवं तर्हि अस्य मोक्षस्य निवर्तको हेतुः कः ? तथा च उक्तं देवमानुषतीर्यग्भावेन च नानाविधैः आत्मानं प्रकाश्य "**अहमन्यः**" "**त्वमन्यः**" इति विविच्य निवर्तते । यथा कश्चित् परोपकारी सर्वस्योपकुरुते आत्मनः प्रति उपकारमीहते एवं पुरुषस्य विमोक्षार्थं प्रकाश्य निवर्तते । लोके प्रकृतेः सुकुमारतरं न उपलभ्यते । यतो हि इयं प्रकृतिः अनेन पुरुषेण दृष्टास्मि इति अस्य पुंसः पुनर्दर्शनं न भवति ।

**तस्मान्न बाध्यतेऽद्धा न मुच्यते नापि संसरति कश्चित् ।**
**संसरति, बध्यते, मुच्यते च नानाश्रया प्रकृतिः ।।**

तस्मात् पुरुषो न बध्यते, न मुच्यते, नापि संसरति । दैवमानुषतिर्यगादि-नानाश्रया-प्रकृतिरेव बुद्ध्यहंकारादिरूपेण बध्यते, मुच्यते, संसरति च । यदि पुरुषस्य बन्धो नास्ति तर्हि मोक्षोऽपि नास्ति ।

सा च प्रकृतिः धर्मवैराग्यैश्वर्याधर्माज्ञानावैराग्यानैश्वर्यादि-सप्तभिः रूपैः स्वां बध्नाति । सा एव पुरुषं स्वीयां बहुप्रकारां प्रदर्श्य विमोचयति । तथा च आह -

**एवं तत्वाभ्यासान्नास्मि न मे नाहमित्यपरिशेषम् ।**
**अविपर्ययाद्विशुद्धं केवलमुत्पद्यते ज्ञानम् ॥**

पञ्चविंशतितत्वालोचनाभ्यासात् इयं प्रकृतिः, अयं पुरुषः एतानि पञ्चतन्मात्रेन्द्रियमहाभूतानि विविक्तं ज्ञानमुत्पद्यते । नाहम् एवं भवामि, मम शरीरं तत्, यतोऽहमन्यः, शरीरमन्यत् इत्येवम् अविपर्यात्मकं विशुद्धं केवलं पञ्चविंशतितत्वज्ञानम् उत्पद्यते । तेन विशुद्धेन कैवल्यज्ञानेन प्रेक्षकवत् साक्षीभूतः स्वस्थः पुरुषः निवृत्तबुद्ध्यहंकारकार्याप्रयोजनवशात् बन्धकेभ्यः धर्मादिभ्यः सप्तरूपेभ्यः विनिवृत्तां प्रकृतिं पश्यति ।

यद्यपि पुरुषस्य पञ्चविंशति-तत्वज्ञानं भवति, तथापि कदाचित् पूर्वसंस्कारवशात् धृतशरीरो योगी तिष्ठति । तथा घटनिर्माणानन्तरमपि वेगाख्यसंस्कारवशात् कुलालचक्रं भ्रमति । एवं सम्यग्ज्ञानाधिगमात् धर्मादिबन्धनहेतुषु निर्दग्धेषु सत्सु कारणाभावात् न पुनस्संसरति । एवं ज्ञानात् वर्तमानधर्माधर्मक्षयः । ज्ञानं तु अनागतं कर्म दहति । वर्तमानशरीरेण च यत् करोति तस्यापि संस्कारक्षयात् नाशे सति मोक्षः सम्भवति ।

**प्राप्ते शरीरभेदे चरितार्थत्वात् प्रधानविनिवृत्तौ ।**
**ऐकान्तिकमात्यन्तिकमुभयं कैवल्यमाप्नोति ॥**

**सांख्यः किं निरीश्वरः उत सेश्वरः ।**

सांख्याः निरीश्वराः उत सेश्वराः इति प्रश्नस्य यथायथम् उत्तरमवगन्तुं सांख्यशास्त्रस्य मुख्यं प्रमेयमवगन्तव्यमिति । केचिद् विद्वांसः पञ्चविंशतितत्त्वेषु ईश्वरस्य अनुक्तत्वात् सांख्याः निरीश्वराः तच्छास्त्रं निरीश्वरसांख्यमिति स्वाभिप्रायं प्रकटयन्ति । परंतु भगवता श्रीकृष्णेन गीतायां सांख्ययोगयोः ऐक्यं प्रतिपादितम् । तद्यथा -

**साङ्ख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः ।**
**एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ॥ (अ. 5-श्लो. 4)**
**यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।**
**एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥ (अ. 5-श्लो. 5)**

**पुरुषान्नापरं किञ्चत् सा काष्ठा सा परागति :** इति गीतावचनस्य सांख्यमतप्रतिपादनपरत्वं केचिद् वदन्ति । स्वयं गीतायाम् आत्मनः ईश्वरत्वं प्रतिपादयन् न पुरुषतत्त्वाधिकतत्त्वान्तरराहित्यम् । तद्वत् पुरुषस्तु पुष्करपलाशवन्निर्लेपः इत्यत्रस्थः पुरषशब्दः उभयपरः । निर्लिप्तायाः परमात्मन्यपि सत्वात् । अत एव साक्षी इति वदति श्रुतिः ।

वस्तुतस्तु सांख्याः कुत्रापि स्वग्रन्थेषु परमात्मानं न निरूपयन्ति । अतः ते निरीश्वरा इव भान्ति सर्वेषाम् । यथा मीमांसकाः न ईश्वरं साक्षात् निरूपयन्ति तथा एते सांख्याः अपि । अतः ईश्वरनिरूपणाभावात् ते ईश्वरं न स्वीकुर्वन्ति इति न भाव्यम् । अप्रस्तुततत्त्वस्य तत्र कारणत्वात् । पुनश्च आस्तिकदर्शनेषु सांख्यानां मीमांसाकानां गणनाप्यस्ति । तद् शास्त्रमपि आस्तिकदर्शनमेव भवति ।

अन्यथा मीमांसकानां सांख्यानां च आस्तिकत्वेन परिगणनं नाभविष्यत् । तथा च सिद्धं सांख्याः सेश्वराः इति ।

**स्वाध्यायः**

**1. प्रदतविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) गुणाः सन्ति ।

(क) 8 (ख) 9 (ग) 2 (घ) 3

(2) दर्शनानि सन्ति

(क) 5 (ख) 7 (ग) 6 (घ) 9

(3) साङ्ख्यदर्शने तत्त्वानि सन्ति ।

(क) 20 (ख) 10 (ग) 25 (घ) 27

(4) पुरुषार्थाः सन्ति ।

(क) 8 (ख) 4 (ग) 7 (घ) 3

(5) अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च भवन्ति ।

(क) गुणाः (ख) कार्याणि (ग) कारणानि (घ) किमपि न

**2. रिक्तस्थानं पूरयत ।**

(1) पुरुषान्नपरं ............ परागतिः ।

(2) प्राप्ते शरीरभेदे ............ कैवल्यमाप्नोति ॥

(3) सांख्यं ............ कपिलादिभिरुच्यते ।

(4) प्रकृतिः माता ........... अस्मान् पालयति ।

(5) रङ्गस्य दर्शयित्वा ........... प्रकृतिः ॥

**3. युग्मानि योजयत ।**

| **( अ )** | **( ब )** |
|---|---|
| (1) अपवर्गः | (1) कर्त्री |
| (2) प्रकृतिः | (2) सत्वम् |
| (3) गुणः | (3) मोक्षः |
| (4) तत्वानि | (4) पञ्च |
| (5) तन्मात्राणि | (5) अष्टाविंशतिः |
| | (6) पञ्चविंशतिः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) कति गुणाः सन्ति ?

(2) मोक्षप्राप्तिः कदा भवति ?

(3) कति तन्मात्राणि ? नामानि लिखत ।

(4) अनादी कौ ?

(5) अपवर्गशब्दस्य का व्युत्पत्तिः ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) गुणानाम् अन्योन्याश्रयवृत्तित्वं लिखत ।

(2) रङ्गस्य .............. ॥ कारिकां पूरयत ॥

(3) किन्नाम उपष्टम्भकम् ?

(4) सत्वं लघु ................ ॥ कारिकां पूरयत ॥

(5) महदादीनां कारणं किम् ?

**6. टिप्पणीं लिखत ।**

(1) अपवर्गः ।

(1) गुणत्रयस्वरूपम् ।

(1) पञ्चविंशति तत्त्वानि ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) साङ्ख्यानां सेश्वरत्वं कथम् ?

(1) यथाग्रन्थं गुणानां कार्याणि निरूपयत ।

(1) मूलप्रकृतिरविकृतिः ........... प्रपूर्य विवेचयत ।

●

# ५ सांख्यकारिका-१ (१-१०)

**प्रस्तावना** -

प्राणिमात्रस्य प्रवृत्तिः स्वदुःखनिवृत्तिपूर्वकं सुखप्राप्त्यर्थं भवति । भारतीयदर्शनानां चरमं लक्ष्यं वर्तते सर्वेषां प्राणिनां त्रिविधदुःखेभ्यः ऐकान्तिकात्यन्तिकनिवृत्तिः । यद्यपि संसारे सुखमपि अस्ति तथापि तत् सांसारिकवैषयिकं सुखं दुःखमिश्रितम् इति मत्वा विचारशीलेभ्यः मनीषिभ्यः हेयम् अस्ति । स्थूलदर्शिनां जनानाम् इयं मतिः भवति यत् यदि दुःखनिवृत्तये सरलोपायः विद्यते तर्हि क्लिष्टोपायस्य आश्रयः व्यर्थः एव । परं सांख्यदर्शनरीत्या लौकिकेन सरलोपायेन दुःखत्रयस्य ऐकान्तिकरूपेण आत्यन्तिकरूपेण च निवृत्तिः न भवति । अतः ऐकान्तिकात्यन्तिकदुःखत्रय-निवृत्तिपूर्वकं मोक्षप्राप्तिः सांख्यशास्त्रोक्तोपायेन एव भवति । अस्मिन् पाठे श्रीमद्-ईश्वरकृष्णविरचित-''सांख्यकारिका'' इति ग्रन्थानुसारेण दुःखत्रयपरिहारोपायः, सांख्यशास्त्रस्वीकृतप्रमाणप्रमेयादीनां विचारः, प्रधानादीनाम् अनुपलब्धिहेतवः, व्यक्ताव्यक्तयोः वैधर्म्यम् इति विषयाणां विवेचनं प्रस्तुतम् अस्ति ।

---

**दुःखत्रयपरिहारोपायः**

यदि वक्ता प्रतिपादयितुम् ईप्सितमर्थं प्रतिपादयति तर्हि श्रोता तमर्थं श्रोतुं प्रवर्तते, अन्यथा सः निष्प्रयोजनवद् अर्थं उन्मत्तप्रलापवत् परित्यजति । लोके यः अर्थः ज्ञातः सन् परमपुरुषार्थं साधयति, सः अर्थः जिज्ञास्यो भवति । दुःखं मानवजीवनस्य कटुसत्यम् अस्ति । अतः दुःखं नास्ति इति न कश्चिद् अपलपितुं शक्नोति । सर्वो जनः दुःखं निवारयितुम् इच्छति । अतः यः कश्चिद् विषयः मानवजीवने व्याप्तं दुःखं निवारयति, तं विषयं ज्ञानं वा प्राप्तुं कः न प्रवर्तते ? अर्थात् सर्वो हि जनः स्वदुःखनिवृत्तये प्रयतते एव । ऐकान्तिकरूपेण आत्यन्तिकरूपेण च दुःखत्रयं निवारयितुं सांख्यकारिकाकारः स्वग्रन्थस्य आदिमां कारिकाम् अवतारयति -

**दुःखत्रयाभिघाताज्जिज्ञासा तदपघातके हेतौ ।**
**दृष्टे साऽपार्था चेन्नैकान्तात्यन्तोऽभावात् ॥ 1 ॥**

**अन्वयः** - दुःखत्रयाभिघातात् तदपघातके हेतौ जिज्ञासा (भवति), दृष्टे सा अपार्था चेत् न, एकान्तात्यन्ततः अभावात् ।

**सरलार्थः** - दुःखत्रयेण सह आत्मनः असह्यसम्बन्धात् आध्यात्मिकादित्रिविधदुःखानां निवारकहेतौ जनानां जिज्ञासा स्वाभाविकी भवत्येव । यदि कश्चिद् एवं वदेत् यत् दुःखोच्छेदकैः औषध्यादिभिः लोकप्रसिद्धसुकरोपायैः एव आधिव्याधिनिवारणं भवेत् तर्हि विवेकरूपिणं दुष्करम् उपायं कः आश्रयेत् ? अर्थात् दृष्टे उपाये सति विवेकविषयिणी जिज्ञासा अपार्था अर्थात् व्यर्था एव । तर्हि एतत् कथनं वस्तुतः असङ्गतम् अस्ति । यतो हि लौकिकोपायैः दुःखनिवृत्तिः अनिवार्यतः सर्वदा असम्भवा । अतः दुःखत्रयस्य एकान्तात्यन्ततो रूपेण निवारणाय शास्त्रविषयिणी जिज्ञासा भवति एव । अतः सांख्यशास्त्रम् आरम्भणीयम् इति ।

दुःखानां त्रयम् इति दुःखत्रयम् । दुःखं त्रिविधं भवति - आध्यात्मिकम्, आधिभौतिकम्, आधिदैविकं च । आध्यात्मिकं दुःखं शारीरं मानसं चेति द्विविधम् । वातपित्तश्लेष्मादिप्रकोपाद् व्यतिक्रमाद् वा जायमानं ज्वराङ्गपीडादिकं दुःखं शारीरिकम् । काम-क्रोध-लोभवशाद् मोह-ईर्ष्या-भय-विषादादिवशाद् वा जायमानम् अतृप्त्यात्मकं दुःखं मानसं भवति । मनुष्य-पशु-पक्षि-सर्प-वृक्षादिनिमित्तात् जायमानं यद् दुःखं भवति तद् आधिभौतिकम् । देव-दानव-यक्ष-राक्षस-भूत-प्रेत-पिशाचादिजन्यं दुःखम् आधिदैविकम् । सांख्यशास्त्ररीत्या सर्वस्य अपि प्रपञ्चस्य त्रैगुण्यपरिणामात् सुखदुःखमोहात्मकत्वेन जगतः स्वीकाराच्च रजोगुणजन्यम् एव दुःखं भवति । अस्य दुःखस्य अनुभवः सर्वैः प्राणिभिः क्रियते, अतः मुमुक्षोः दुःखत्रयनिवारणाय तदपाघातके हेतौ जिज्ञासा भवति ।

दुःखम्
↓
↓ ↓ ↓
आध्यात्मिकम् आधिभौतिकम् आधिदैविकम्
↓
↓ ↓
शारीरम् मानसम् ।

अत्र कश्चित् एवं ब्रूयात् यत् दुःखत्रयस्य निवारणं प्रत्यक्षतया उपलभ्यमानेन औषधिसेवनादिलौकिकसाधनेन भवेत्, तेन सांख्यशास्त्रविषयिणी जिज्ञासा शान्ता भवेत् । शास्त्रज्ञानं खलु अनेकजन्माभ्यासपरम्परायाससाध्यतया अतिक्लेशकरम् । ''**अङ्के चेन्मधु विन्देत किमर्थं पर्वतं ब्रजेत् । इष्टस्यार्थस्य संसिद्धौ को विद्वान् यत्नमाचरेत्**'' इति लौकिकाभाषाणकरीत्या सुकरस्य लौकिकस्य उपायस्य विद्यमाने सति जनानां लौकिके एव उपाये जिज्ञासा भवेत् इति चेत् – न । यद्यपि दृष्टैः उपायैः दुखत्रयम् अपनेतुं शक्यम् तथापि लौकिकेन उपायेन दुःखत्रयम् एकान्ततोरूपेण अत्यन्ततोरूपेण च न निवर्तते । दुःखस्य अवश्यं निवृत्तिः एकान्तनिवृत्तिः, दुःखं पुनर्यथा न भवेत् तथा निवृत्तिः अत्यन्तनिवृत्तिः मनोज्ञस्त्रीपानभोजनादिलौकिकोपायैः दुःखनिवृत्तिः नियतरूपेण भवतीति निश्चितं नास्ति, यदि निवृत्तिः स्यादपि तर्हि सार्वकालिकी भवेत् इत्यपि निश्चितं नास्ति । किञ्चित् समयानन्तरं शरीरेषु ज्वरादिपीडा पुनः जायते एव । अतः लौकिकैः उपायैः एतादृश्यायाः एकान्तिकात्यन्तिकदुःखनिवृत्तेः अशक्यत्वात् विदुषां शास्त्रविषयिणी जिज्ञासा स्वाभाविकी भवत्येव ।

ननु लौकिकेन उपायेन दुःखत्रयस्य निवृत्तिः न भवति इति उक्तम् । परं वैदिकस्तु उपायः दुःखम् अवश्यं निवर्तयति । यज्ञानुष्ठानेन स्वर्गप्राप्तिः भवति, स्वर्गे च सर्वथा दुःखाभावः । दुःखविरोधिसुखम् एव स्वर्गः, यः यज्ञादिभिः सम्प्राप्यते । स च स्वर्गः नित्यः । अतः जन्मजन्मान्तरकल्पकल्पान्तरसाध्यभूतविवेकज्ञानेन किम् ? अतिसुकरत्वात् घटिकाप्रहरदिवसमासवर्षादिकालसाध्येन यज्ञानुष्ठानप्रयासेन एव भाव्यम् । अतः मुमुक्षभिः वैदिकोपायस्य यज्ञानुष्ठानस्य एव जिज्ञासा कर्तव्या इति चेत् न ।

**दृष्टवदानुश्रविकः स ह्यविशुद्धिक्षयातिशययुक्तः ।**
**तद्विपरीतः श्रेयान् व्यक्ताव्यक्तज्ञविज्ञानात् ॥ 2 ॥**

**अन्वयः** – आनुश्रविकः (अपि) दृष्टवत् (वर्तते), हि सः अविशुद्धिक्षयातिशययुक्तः (वर्तते), (अतः) तद्विपरीतः (उपायः) श्रेयान् (अस्ति), (यतः सः उपायः) व्यक्ताव्यक्तज्ञविज्ञानाद् (भवति) ।

**सरलार्थः** – यागादिक्रियाकलापरूपवैदिकोपायः अपि औषध्यादिलौकिकोपायतुल्यः अस्ति । यतः सः अविशुद्धिक्षयातिशययुक्तः वर्तते, अतः वैदिकयज्ञादिभिन्नः दोषरहितश्च प्रकृतिपुरुषविवेकसाक्षात्काररूपः उपायः एव दुःखनिवृत्त्यै प्रशस्यतरः वर्तते । स च महदादिपञ्चविंशतितत्त्वज्ञानात् सम्भवति ।

गुरुमुखात् उच्चारणानूच्चारणादिभिः अनुश्रूयते परम्परया इति अनुश्रवः अर्थात् वेदः । तत्र भवः आनुश्रविकः यागादिक्रियाकलापरूपः वैदिकः उपायः, दृष्टेन औषध्यादिलौकिकोपायेन तुल्यः एव अस्ति । अतः वैदिकोपायेनापि एकान्तिकात्यन्तिकदुःखनिवृत्तिः न भवति । यज्ञेषु पशुहिंसादिसम्बन्धात् सोमपानाच्च अयम् उपायः अविशुद्धियुक्तः अस्ति । कर्मफलस्य आशुतरविनाशित्वात् वैदिकोपायः क्षयी वर्तते । ''**क्षीणे पुण्ये मर्त्यलोकं विशन्ति**'' इति रीत्या शताप्सरसं पुरुषं दृष्ट्वा पञ्चाप्सरवान् पुरुषः अवश्यं दुःखितः भवति । सुखस्यापि तारतम्यवत्त्वात् एकापेक्षया अन्यस्य अतिशयवत्त्वं भवति एव । अतिशये च सति पुनः दुःखम् अवश्यं भवति ।

यतो हि वैदिकोपायादपि दुःखत्रयस्य आत्यन्तिकनिवृत्तिः न भवति । अतः वेदप्रतिपाद्यात् उपायात् विपरीतः यागादिभिन्नः वैदिकक्रियागतदोषरहितः सत्त्वपुरुषान्यताप्रत्ययरूपः सांख्यशास्त्रप्रतिपाद्यः व्यक्ताव्यक्तविज्ञानरूपः च उपायः श्रेयान् श्रेयोमार्गप्रतिपादकः प्रशस्यतरश्च वर्तते । व्यक्तं च अव्यक्तं च ज्ञः च – व्यक्ताव्यक्तज्ञाः, तेषां विज्ञानम् अर्थात् विवेकेन ज्ञानं व्यक्ताव्यक्तज्ञविज्ञानम्, तस्मात् व्यक्ताव्यक्तज्ञविज्ञानात् ऐकान्तिकात्यन्तिकदुःखनिवृत्तिः अवश्यं भवति । अनया कारिकया सांख्यशास्त्रस्य प्रयोजनम् उक्तं भवति ।




इदानीं सांख्यशास्त्राऽभिमतपञ्चविंशतितत्त्वानि चतुर्धा विभज्य परिगणयति ग्रन्थकारः –

**मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त ।**
**षोडशकस्तु विकारो न प्रकृतिर्न विकृति पुरुषः ॥ 3 ॥**

**अन्वयः** – मूलप्रकृतिः अविकृतिः (अस्ति), महदाद्याः प्रकृतिविकृतयः सप्त (सन्ति), विकारस्तु षोडशकः, पुरुषः न प्रकृतिः न विकृतिः (अस्ति) ।

**सरलार्थः** – कारणात्मिकामूलप्रकृतिः कस्माच्चिदपि नोत्पद्यते, महदाद्याः प्रकृतिविकृतयः सप्त स्वस्वकारणेभ्यः जायन्ते तथा स्वस्वकार्याणि जनयन्ति अपि । षोडशकः गणः कार्यात्मकः एव अस्ति । पुरुषः न कस्माच्चिदपि जायते नापि किमपि तत्त्वम् उत्पादयति ।

सांख्यशास्त्रीयपञ्चविंशतितत्त्वानां चतुर्धा विभागः अनेन प्रकारेण अवगन्तव्यः । प्रथमः भागः – केवलप्रकृतिरूपः । द्वितीयः भागः – केवलविकृतिरूपः । तृतीयः भागः – प्रकृतिविकृत्यात्मकः उभयात्मकः । चतुर्थः भागः – न प्रकृतिरूपः नापि विकृतिरूपः । तत्र प्रक्रियते उत्पद्यते कार्यादिकम् अनया इति प्रकृतिः प्रधानम् इत्यनर्थान्तरम् । सा सत्त्वरजस्तमसां साम्यावस्थारूपेण मूलप्रकृतिः अस्ति । ''**मूला च असौ प्रकृतिश्च इति मूलप्रकृतिः**'' सप्तानां प्रकृतीनाम् आद्यं मूलकारणं इत्यर्थः । अस्याः मूलप्रकृतेः किमपि कारणम् नास्ति । महत्तत्त्वम्, अहङ्कारतत्त्वं तथा शब्द–स्पर्श–रूप–रस–गन्ध इति पञ्चतन्मात्ररूपतत्त्वम् – इमाः सप्त प्रकृतिविकृतयः सन्ति । एतानि सप्त तत्त्वानि मूलप्रकृतितः उत्पद्यन्ते । तथा हि मूलप्रकृतितः महत्तत्त्वम् आविर्भवति, ततः अहङ्कारत्तत्त्वम्, ततः पञ्चतन्मात्राणि आविर्भवन्ति । एतानि कारणकार्यरूपात्मकत्वात् ''**प्रकृतिविकृतयः**'' उच्यन्ते । तथा च मनसः दशेन्द्रियाणाम् उत्पत्तिः अहङ्कारात् जायते, पञ्च तन्मात्राभ्यः अपि पञ्च महाभूतानि जायन्ते । ''**षोडशकस्तु विकारः**'' षोडशतत्त्वानि विकृतानि एव । तानि च महाभूतानि पृथिव्यप्तेजो वाय्वाकाशरूपाणि श्रोत्रत्वग्घ्राणचक्षुरसनानि ज्ञानेन्द्रियाणि वाक्पाणिपादपायूपस्थसंज्ञकानि पञ्च कर्मेन्द्रियाणि एकं

मनश्च । एतेभ्यः अन्यतत्त्वानि न जायन्ते अतः एतानि न प्रकृतयः । तर्हि पुरुषतत्त्वं कीदृशम् इति चेत् – **''न प्रकृतिर्न विकृतिः पुरुषः''** । अयं पुरुषः न कस्माच्चिदपि जायते, नापि किमपि तत्त्वम् उत्पादयति अतः अनुभय रूपम् अस्ति ।

| | | |
|---|---|---|
| **अनुभयरूपः** → | १ पुरुषः | १ ज्ञः |
| **प्रकृतिः** → | १ मूलप्रकृतिः | १ अव्यक्तम् |
| **प्रकृतिविकृतयः** → | १ महान्, १ अहङ्कारः, ५ तन्माणिः | २३ व्यक्तानि |
| **विकृतयः** → | १ मनः, ५ बुद्धीन्द्रियाणि,<br>५ कर्मेन्द्रियाणि, ५ महाभूतानि | |

**प्रमाणप्रमेयविचारः –**

यस्य कस्यचिदपि शास्त्रस्य प्रवृत्तिः उद्देशलक्षणपरीक्षापूर्विका भवति । सम्प्रति उद्दिष्टार्थप्रमाणीकरणाय प्रमाणसामान्यं निरूपयति ग्रन्थकारः –

**दृष्टमनुमानमाप्तवचनं च सर्वप्रमाणसिद्धत्वात् ।**
**त्रिविधं प्रमाणमिष्टं प्रमेयसिद्धिः प्रमाणाद्धि ॥ 4 ॥**

**अन्वयः** – दृष्टम् अनुमानम् आप्तवचनं च त्रिविधं प्रमाणम् इष्टम्, (अत्रैव) सर्वप्रमाणसिद्धत्वात्, हि प्रमाणात् प्रमेयसिद्धिः (भवति) ।

**सरलार्थः** – सांख्याचार्यैः प्रत्यक्ष-अनुमान-शब्दप्रमाणानि एव स्वीकृतानि । एतेषु त्रिप्रकारकेषु एव इतरेषां प्रमाणानाम् अन्तर्भावो भवति । यतः प्रमेयसिद्धिः प्रमाणाधीना अस्ति अतः प्रमेयनिरूपणात् पूर्वं प्रमाणनिरूपणं परमावश्यकम् अस्ति ।

दृष्टं नाम प्रत्यक्षम् । अनु-पश्चाद् मीयते इति अनुमानम् । उच्यते यत् तत् वचनम्, आप्तस्य वचनम् इति आप्तवचनम् अर्थात् शब्दः । एतत् त्रितयं प्रमाणम् अस्माकं सांख्यानाम् इष्टं स्वीकार्यत्वेनाभिलषितमिति तात्पर्यार्थः । प्रत्यक्षानुमानशब्दप्रमाणेभ्यः अतिरिक्तानाम् उपमानादीनां समेषां प्रमाणानाम् अत्र एव अन्तर्भावः भवति । प्रत्यक्षमेकं प्रमाणमिति चार्वाकाः, प्रत्यक्षमनुमानञ्चेति द्वे प्रमाणे इति बौद्धाः वैशेषिकाश्च, प्रत्यक्षानुमानागमाः त्रीणि प्रमाणानीति यौगिकाः, प्रत्यक्षानुमानागमोपमा न शब्दाः । प्रमाणानीति नैयायिकाः, एतद् अतिरिक्तम् अर्थापत्तिरपि इति प्राभाकराः, एतद् पञ्चप्रमाणसहिता अनुपलब्धिः प्रमाणमिति भाट्टाः, सम्भवैतिह्याभ्यां सहाष्टौ इति पौराणिकाः वदन्ति । यथोक्तम् –

**प्रत्यक्षमेकं चार्वाकाः कणादसुगतौ पुनः ।**
**अनुमानञ्च तच्चाथ सांख्या शब्दञ्च ते अपि ॥**
**न्यायैकदेशिनोप्येवम् उपमानञ्च केचन ।**
**अर्थापत्त्या सहैतानि चत्वार्याह प्रभाकरः ॥**
**अभावषष्ठान्येतानि भाट्टवेदान्तिनस्तथा ।**
**सम्भवैतिह्ययुक्तानि तानि पौराणिकाः जगुः ॥ इति ॥**

सर्वेषाम एतेषाम् अस्मदुक्तेषु त्रिषु एव प्रमाणेषु अन्तर्भावात् प्रमाणानि त्रीणि एव सन्तीति कारिकायाः भावः ।

सामान्योल्लेखपुरस्सरं विशेषोल्लेखो भवतीति धिया ग्रन्थकारः सम्प्रति सर्वप्रमाणेषु प्रत्यक्षप्रमाणं ज्येष्ठम् । तस्मात् तन्निरूपयति –

**प्रतिविषयाध्यवसायो दृष्टं त्रिविधमनुमानमाख्यातम् ।**
**तल्लिङ्गलिङ्गिपूर्वकमाप्तश्रुतिराप्तवचनं तु ॥ 5 ॥**

**अन्वयः** – प्रतिविषयाध्यवसायः दृष्टम्, (यत्) लिङ्गलिङ्गिपूर्वकम् अनुमानम् (तत्) त्रिविधम् आख्यातम्, आप्तश्रुतिः तु आप्तवचनम् ।

**सरलार्थः** – शब्द–स्पर्श–रूप–रस–गन्धग्राहकैः इन्द्रियैः साक्षात्कारानन्तरं जायमानं निश्चयात्मकं ज्ञानं प्रत्यक्षज्ञानम् उच्यते । तदेव दृष्टं प्रत्यक्षप्रमाणं वा निगद्यते । व्याप्यव्यापकपूर्वकं त्रिप्रकारम् अनुमानं सांख्यशास्त्रे प्रतिपादितम् अस्ति । वाक्यजनितवाक्यार्थज्ञानम् आप्तवचनम् अर्थात् शब्दप्रमाणं भवति ।

दृष्टं नाम प्रत्यक्षम् । अक्षम् अक्षं प्रति वर्तते इति प्रत्यक्षम् । प्रत्यक्षप्रमाणस्य लक्षणमस्ति ''**प्रतिविषयाध्यवसायः**'' इति । विषयं विषयं प्रति वर्तते इति प्रतिविषयम्, प्रतिविषये अध्यवसायः इति प्रतिविषयाध्यवसायः । अत्र प्रतिशब्दप्रयोगात् ''**इन्द्रियार्थसम्बन्धः**'' सूचितो भवति । अर्थात् इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं तत्र दृष्टं नाम प्रत्यक्षम् । अध्यवसायो नाम ''**इदम् इत्थम्**'' इत्याकारकं निश्चयात्मकं ज्ञानम् ।

अनुमानप्रमाणं प्रत्यक्षमूलकमस्ति । अतः प्रत्यक्षं निरूप्य अनुमानस्य लक्षणं वदति – ''**लिङ्गलिङ्गिपूर्वकम्**'' इति । लीनम् अर्थं गमयति इति लिङ्गं, व्याप्यं हेतुः इत्यर्थः । लिङ्गम् अस्य अस्तीति लिङ्गी, व्यापकं साध्यमिति । लिङ्गलिङ्गिपूर्वकं यस्य तत् अनुमानम् इत्यर्थः । तत् अनुमानं त्रिविधम् – पूर्ववत्, शेषवत्, सामान्यतोदृष्टम् इति । तत्र **प्रथमं पूर्ववद् अनुमानं** नाम कारणात् कार्यस्य अनुमानम् । यदि कश्चित् मेघं दृष्ट्वा पश्चाद् वृष्टिम् अपि पश्यति, स एव अपरस्मिन् काले मेघाच्छन्नम् आकाशं दृष्ट्वा ''**नूनं वृष्टिः भविष्यति**'' इति अनुमानं करोति । इदम् – ''**गगनं भविष्यद् वृष्टिमत्, घनगर्जनात्**'' पूर्ववद् अनुमानं भवति । कारणेन मेघेन कार्यस्य वृष्टेः अनुमानं भवति । अतः एतत् पूर्ववदनुमानस्य उदाहरणम् । यत्र कार्येण कारणम् अनुमीयते तत्र **द्वितीयं ''शेषवत्''** अनुमानं भवति । शेषो नाम कार्यम् । शेषः अस्य अस्तीति शेषवत् । यथा नद्याः मालिन्यं पूर्णत्वं फेनवत्त्वं शीघ्रवत्त्वं च दृष्ट्वा उपरिदेशे वृष्टिः जाता इति अनुमीयते । तथा च अनुमानप्रयोगः – ''**नदी वृष्टिमती, फेनतृणकाष्ठादिवहनशीलप्रवाहवत्त्वात्**'' इति । अनुमानस्य **तृतीयः भेदः** अस्ति – ''**सामान्यतोदृष्टम्**'' । यथा देवदत्तस्य गतिपूर्विकां देशान्तरप्राप्तिं दृष्ट्वा सम्बन्ध्यन्तरे सवितरि देशान्तरप्राप्तिदर्शनाद् अत्यन्तपरोक्षायाः गतेः अनुमानं सामान्यतोदृष्टम् अनुमानं भवति । देवदत्तः यदा गच्छति तदा देशान्तरं प्राप्नोति । अर्थात् कश्चित् देशात् देशान्तरं प्राप्नोति चेत् तत्र गमनं प्रत्यक्षं दृश्यते । सूर्यस्य यद्यपि गमनं प्रत्यक्षं न दृश्यते, तस्य देशान्तरप्राप्तिः तु दृश्यते । तेन देशान्तरप्राप्तिफलेन यत् सूर्यस्य गमनम् अनुमीयते तत् सामान्यतोदृष्टस्य उदाहरणम् भवति । तथा च अनुमानप्रयोगः – ''सूर्यः गतिमान् देशान्तरप्राप्तित्वात् चैत्रवत्'' इति ।

''आप्तश्रुतिः'' आप्तवचनं भवति । अर्थात् प्राप्ता–युक्ता इत्यर्थः । आप्ता च असौ श्रुतिश्चेति आप्तश्रुतिः । श्रुतिर्नाम वाक्यजनितं वाक्यार्थज्ञानम् अतः आप्तवचनं शब्दप्रमाणम् आगमप्रमाणं वा भवति । आप्तः अर्थात् यथानुभूतार्थवक्ता ।

**प्रमाणम्**

↓

प्रत्यक्षम् | अनुमानम् | आप्तवचनम्

अनुमानम् ↓

पूर्ववत् | शेषवत् | सामान्यतोदृष्टम्

सम्प्रति त्रिप्रकारकाणां प्रमाणानां कस्य प्रमाणस्य कः विषयः इति वदति –

**सामान्यतस्तु दृष्टादतीन्द्रियाणां प्रतीतिरनुमानात् ।**
**तस्मादपि चासिद्धं परोक्षमाप्तागमात्सिद्धम् ॥ 6॥**

**अन्वयः** – सामान्यतोदृष्टात् अनुमानात् तु अतीन्द्रियाणां प्रतीतिः (भवति), तस्मादपि असिद्धं च परोक्षम् आप्तागमात् सिद्धम् ।

**सरलार्थः** – प्रधानपुरुषादीनाम् अतीन्द्रियपदार्थानां ज्ञानं सामान्यतोदृष्टानुमानात् शेषवतोऽनुमानाच्च भवति । अनुमानाद् अपि येषां परोक्षपदार्थानां ज्ञानं न भवति तेषां ज्ञानम् आगमप्रमाणात् भवति ।

लौकिकविषयाणां ज्ञानं प्रत्यक्षप्रमाणेन भवति । अनुमानेन च तेषां विषयाणां प्रतीतिः भवति ये अतीन्द्रियाः भवन्ति । सांख्यशास्त्ररीत्या प्रकृतिः, पुरुषः, महान्, अहङ्कारः, पञ्च तन्मात्राणि च अतीन्द्रियाणि सन्ति । अतः **''महत्तत्त्वं सकरणकं कार्यत्वात् घटवत्''** इत्यनुमानेन प्रत्यक्षाविषयस्य अतीन्द्रियस्य महत्तत्वस्य सकरणकत्वं सिद्ध्यति । तथा च यः विषयः अनुमानेन अपि न सिध्यति तस्य विषयस्य सिद्धिः आगमप्रमाणेन भवति । यथा **''वज्रहस्तः पुरन्दरः''**, **''स्वर्गकामो यजेत''**, इत्येवमाद्याः विषयाः न प्रत्यक्षेण नापि अनुमानेन वा ज्ञायेरन् । अतः एतेषां विषयाणां ज्ञानं शब्दप्रमाणेन एव भवति ।

सम्प्रति विद्यमानस्य वस्तुनः उपलब्धिः कस्मात् न भवति इति वदति ग्रन्थकारः –

**अतिदूरात् सामीप्यादिन्द्रियघातान्मनोऽनवस्थानात् ।**
**सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिहाराच्च ॥ 7॥**

**अन्वयः** – अतिदूरात्, सामीप्यात्, इन्द्रियघातात्, मनोऽनवस्थानात्, सौक्ष्म्यात्, व्यवधानात्, अभिभवात्, समानाभिहारात् च (पदार्थस्य प्रत्यक्षं न भवति) ।

**सरलार्थः** – अत्यन्तदूरतया, अत्यन्तसमीपतया, इन्द्रियविकलतया, मनसः अनवधानतया, सूक्ष्मतया, व्यवहिततया, अभिभवतया, तुल्यवस्तुसम्मिश्रणतया च विद्यमानस्य अपि वस्तुनः उपलब्धिः न भवति ।

वस्तुतः विद्यमानानां पदार्थानां क्वचित् अनुपलब्धिः भवति । यथा सन्तः अपि इन्द्रवरुणाप्सरसयक्षप्रभृतयः प्रत्यक्षेण न उपलभ्यन्ते । अतः तेषां सिद्धिः आगमप्रमाणेन भवति । यदि कश्चित् एवं वदेत् ''यदि पदार्थः स्यात् तर्हि उपलभ्येत, नोपलभ्यते तर्हि नास्ति'' इति । कथनमेतत् योग्यं नास्ति । यतो हि विद्यमानस्य अपि वस्तुनः अनुपलब्धौ अष्टौ हेतवः सन्ति, ते अत्र कारिकायां प्रदर्शिताः सन्ति । यथा –

**अतिदूरात्** – अतिदूरे आकाशे उत्पतन् पक्षी अतिदूरतया सन् अपि प्रत्यक्षेण न उपलभ्यते । **अतिसामीप्यात्** – अत्यन्तसामीप्यात् नेत्रस्थम् अञ्जनं न उपलभ्यते । **इन्द्रियघातात्** – चक्षुरादिज्ञानेन्द्रियाणां दोषवशात् वस्तुनः उपलब्धिः न भवति । यथा कश्चित् बधिरः स्वसमीपोच्चारितशब्दराशिं न शृणोति । यथा वा अन्धः सूर्यं न पश्यति । **मनोऽनवस्थानात्** – विषयान्तरव्यापृतं मनः समीपस्थान् अपि विषयान् न गृह्णाति यथा कामाद्युपहतमनः जनः स्फीतालोकमध्यवर्तिघटं न पश्यति । **सौक्ष्म्यात्** – यदा वस्तु अत्यन्तसूक्ष्मं भवति, तदा वस्तुनः उपस्थितावपि प्रत्यक्षं न प्रवर्तते । यथा अतिसूक्ष्मत्वात् परमाणोः उपलब्धिः न भवति । **व्यवधानात्** – द्रष्टृदृश्ययोः मध्ये वस्त्वन्तरस्य विद्यमानत्वादपि द्रष्टा दृश्यं न पश्यति । यथा भित्तिजवनिकादिभिः अन्तरिताः विषयाः नोपलभ्यन्ते । **अभिभवात्** – सूर्यतेजसा अभिभूतनक्षत्रमण्डलस्य दिवसकाले दर्शनं न भवति । यद्यपि तानि नक्षत्राणि दिवसे वर्तन्ते एव, तथापि सूर्यप्रकाशेन तेषाम् अभिभवात् दिवसे दर्शनं न भवति । **समानाभिहारात्** – कस्यचिद् वस्तुनः स्वसजातीयपदार्थेन सह सम्मिश्रणं भवति चेत् पुनः पृथग्रूपेण उपलब्धिः न भवति । यथा जलबिन्दवः नदीजलेन सम्मिश्रिताः सन्तः पृथक् नोपलभ्यन्ते ।

तदेवं सिद्ध्यति यत् प्रत्यक्षेण न गृह्यते चेदपि वस्तुनः सर्वथा अभावो न भवति । अतः प्रधानस्य पुरुषस्य च प्रत्यक्षायोग्यतायां सत्याम् अपि तयोः प्रधानपुरुषयोः अभावनिश्चयः प्रामाणिकानां कृते युक्तियुक्तः नास्ति ।

**अनुपलब्धिहेतवः** –

पूर्वोक्तकारिकायां सामान्यरूपेण विद्यमानस्य वस्तुनः अनुपलब्धेः कारणानि उक्तानि । इदानीं प्रधानाद्युपलब्धौ एतेषु कारणेषु किं कारणम् अस्ति इति निरूप्यते –

**सौक्ष्म्यात्तदनुपलब्धिर्नाभावात् कार्यतस्तदुपलब्धेः ।**
**महदादि तच्च कार्यं प्रकृतिसरूपं विरूपं च ॥ 8॥**

**अन्वयः** – तदनुपलब्धिः सौक्ष्म्यात्, न अभावात्, कार्यतः तदुपलब्धेः, तच्च कार्यं – प्रकृतिस्वरूपं विरूपं च महदादि (अस्ति) ।

**सरलार्थः** – प्रकृतिपुरुषादितत्त्वानां निरवयवत्वाद् अर्थात् अतिसूक्ष्मत्वात् हेतोः अनुपलब्धिः भवति । यथा परमाण्वादौ अतिसूक्ष्मत्वात् हेतोः प्रत्यक्षं न प्रवर्तते तथैव सूक्ष्मे प्रधानादौ अपि प्रत्यक्षं न प्रवर्तते । प्रकृतिपुरुषादितत्त्वानि

नैव सन्ति, येन तेषाम् अप्राप्तिः भवति इति नास्ति । यतो हि कार्यम् आश्रित्य प्रकृत्यादीनाम् उपलब्धिः भवति । प्रकृतेः अनुरूपं प्रतिरूपं च कार्यं बुद्ध्यादि वर्तते ।

अनुपलब्धिः क्वचिद् अभावात् भवति, यथा गगनकुसुमस्य वन्ध्यापुत्रस्य वा । क्वचित्तु सतः अपि पदार्थस्य अनुपलब्धिः अतिदूरादिभिः अष्टभिः हेतुभिः भवति । प्रकृतेः उपलब्धिः अतिसूक्ष्मत्वात् न भवति । अतः प्रधानस्य उपलब्धिः न भवति, अतः तत् नास्ति इति न योग्यम् । यतो हि महदादिकार्यरूपेण तस्य उपलब्धिः भवति एव । ''**कारणसत्त्वे कार्यसत्त्वम्, कारणाऽभावे कार्याऽभावः**'' इति नियमेन कस्यचिदपि कार्यस्य उत्पत्तिः कारणं विना न भवति । महत्तत्त्वतः स्थूलभूतपर्यन्तं सर्वेऽपि पदार्थाः कार्यरूपाः । अतः एतेषां किमपि कारणम् अवश्यं भवितव्यम् । तत् कारणम् अस्ति प्रकृतिः, सा च प्रधानपदेन अभिधीयते । प्रकृतेः एतत् कार्यं सत्त्वरजस्तमोभेदेन प्रकृतिसरूपं विरूपं च भवति ।

**मूलप्रकृतिः (प्रधानम्, अव्यक्तम्)**

↓

(सौक्ष्म्यात्) अनुपलब्धिः      (कार्यतः) उपलब्धिः

↓

सरूपम् (सुखदुःखमोहात्मकरूपेण)      विरूपम् (अभिमानसङ्कल्पादिभेदेन)

सम्प्रति कार्यस्य उत्पत्तेः प्राक् अपि कार्यं सत् इति सांख्यशास्त्रोक्तं सत्कार्यवादं साधयति –

**असदकरणादुपादानग्रहणात् सर्वसम्भवाभावात् ।**
**शक्तस्य शक्यकरणात् कारणभावाच्च सत्कार्यम् ॥ 9॥**

**अन्वयः** – असदकरणात्, उपादानग्रहणात्, सर्वसम्भावाभावात्, शक्तस्य शक्यकरणात्, कारणाभावात् च कार्यं सत् (अस्ति) ।

**सरलार्थः** – कारणव्यापारात् प्रागपि कार्यं स्वकारणे सत् भवति, यतः अत्यन्तासत्पदार्थस्य कदापि अभिव्यक्तिः न भवति । तत्तत्कार्योत्पत्तये तत्तत्कारणस्य ग्रहणं क्रियते । न हि एकस्माद् एव कारणात् समस्तकार्याणाम् उत्पत्तिः सम्भवति । अपि तु निश्चितकारणाद् एव निश्चितकार्यस्य अभिव्यक्तिः भवति । यस्मिन् कारणे यस्य कार्यस्य उत्पादनक्षमता वर्तते तदेव कारणं गृह्यते । कारणे ये गुणाः प्राप्यन्ते ते कार्येऽपि अनुप्रविष्टाः भवन्ति इति दृश्यते, अतः कार्यकारणयोः कश्चित् सम्बन्धः अवश्यं भवति एव । एतावता एतत् सिद्ध्यति यत् कार्यस्य उत्पत्तेः प्रागपि कारणे कार्यस्य अस्तित्वं विद्यते ।

उत्पत्तेः पूर्वं कार्यस्य सत्ताविषये दार्शनिकानां मध्ये विवादः वर्तते । बौद्धाः वदन्ति यत् ''**असतः सज्जायते**'' अर्थात् असतः अभावात् सतां भावात्मकपदार्थानाम् उत्पत्तिः भवति । अपरे वेदान्तिनः वदन्ति यत् ''**एकस्य सतः विवर्तं कार्यजातं न वस्तुसत्**'' इति अर्थात् इदं जगत् ब्रह्मतत्त्वस्य विवर्तमेवास्ति । नैयायिकवैशेषिकाश्च ''**सतः असज्जायते**'' इति वदन्ति अर्थात् जगतः समवायिकारणं परमाणून् स्वीकुर्वन्ति, किन्तु ततः जायमानाणुसमुदायात्मकं घटपटादिकार्यम् असद् इति । सांख्यास्तु ''**सतः सज्जायते**'' इति स्वीकुर्वन्ति अर्थात् प्रत्येकं कार्यं सत् अस्ति तथा उत्पत्तेः प्रागपि स्वकारणे विद्यमानं भवति, कारणव्यापारात् तस्य अभिव्यक्तिः भवति । अयमर्थः अत्र ग्रन्थकारेण पञ्चभिः हेतुभिः प्रदर्शितः । तद्यथा – **(1) असदकरणात्** – यदि कार्यं कारणव्यापारात् प्राक् कस्यामपि अवस्थायां कुत्राऽपि विद्यमानं न स्यात् तर्हि तदुत्पत्तिः तथैव कर्तुं न शक्यते । यथा सहस्रशिल्पिनः मिलित्वा गगनाऽरविन्दम् उत शशशृङ्गं कर्तुं समर्थाः न भवन्ति । अतः अत्यन्तासतः नृशृङ्गस्य उत्पत्तिः न भवति । **(2) उपादानग्रहणात्** – उपादानं नाम समवायिकारणम् । प्रत्येकं कार्यं स्वोपादानेन अर्थात् समवायिकारणेन सह सम्बद्धम् एव भवति । यथा पटं निर्मातुमिच्छन् तन्तुवायः तन्तुमेव गृह्णाति नान्यत् । घटं निर्मास्यन् कुलालः मृत्तिकाम् एव गृह्णाति इति नियमः । अत्र यदि कश्चित् एवं तर्कं कुर्यात् यत् कारणेन सह सम्बन्धं विना

एव कार्योत्पत्तिः स्यात् तर्हि तत्र कः दोषः इति चेत् श्रूयताम् तृतीया युक्तिः - **(3) सर्वसम्भवाभावात्** - यदि सम्बन्धं विना कार्योत्पत्तिः स्यात् तर्हि कस्मात् अपि कारणात् कस्य अपि कार्यस्य उत्पत्तिः जायेत अर्थात् सर्वस्मात् सर्वेषाम् उत्पत्तिः भवेत्, किन्तु नैवं भवति । **(4) शक्तस्य शक्यकरणात्** - येन कारणेन यस्य कार्योत्पत्तिः शक्या तस्मात् एव कारणात् कार्यस्य उत्पत्तिः कर्तुं शक्यते, न अन्यस्मात् । अतः शक्तस्य कारणस्य विद्यमाने सति शक्तस्य कार्यस्य उत्पत्तिः, शक्ताभावे शक्याऽभावः स्वयम् एव सिद्ध्यति । **(5) कारणभावात्** - कार्यं कारणात्मकम् एव भवति अर्थात् कार्यं कारणात् न भिद्यते । यदि कारणं सत् अस्ति तर्हि कार्यम् अपि तदभिन्नं सद्रूपम् एव अस्ति । कारणस्य यादृशः स्वभावः भवति तादृशः स्वभावः कार्यस्य अपि भवति एव । यथा तिलेषु यत् स्निग्धत्वं चिक्कणत्वं वा तत् तैले अपि भवति ।




**व्यक्ताव्यक्तयोः वैधर्म्यम्** -

**हेतुमदनित्यमव्यापि सक्रियमनेकमाश्रितं लिङ्गम् ।**
**सावयवं परतन्त्रं व्यक्तं विपरीतमव्यक्तम् ॥ 10॥**

**अन्वयः** - व्यक्तं हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, अनेकम्, आश्रितम्, लिङ्गम्, सावयवं, परतन्त्रम् (अस्ति) । अव्यक्तम् (एतद्) विपरीतम् (अस्ति) ।

**सरलार्थः** - व्यक्तवर्गान्तःपातिनां तत्त्वानां समूहः उत्पत्तिशीलः, विनाशशीलः, सङ्कोचशीलः, क्रियाशीलः, अनेकशीलः, हेत्वाश्रयशीलः, लयशीलः, सावयवशीलः, पराधीनशीलः च भवति, अव्यक्तं च एतस्मात् व्यक्तात् भिन्नम् अस्ति ।

अस्यां कारिकायां व्यक्ताव्यक्तयोः वैधर्म्यम् उक्तम् अस्ति । प्रकृतिपुरुषातिरिक्तं महत्तत्त्वात् आरभ्य पृथिवीपर्यन्तं त्रयोविंशतितत्त्वानि व्यक्तसंज्ञकानि भवन्ति, तानि हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, अनेकम्, आश्रितम्, लिङ्गम्, सावयवं च भवन्ति । तत्र ''**हेतुमत्**'' हेतुर्नाम कारणम् । एतानि व्यक्ततत्त्वानि कस्माद् अपि कारणात् उत्पन्नानि भवन्ति अर्थात् एतेषां किमपि कारणम् अस्ति । अतः व्यक्तं हेतुमत् अस्ति । ''**अनित्यम्**'' अर्थात् विनाशि तिरोभावि इत्यर्थः । व्यक्ततत्त्वानाम् आविर्भावः तिरोभावश्च अर्थात् उत्पत्तिः विनाशश्च जायते । अतः व्यक्तम् अनित्यम् । ''**अव्यापि**'' यत् तत्त्वं सर्वगतं भवति तद् व्यापि उत व्यापकं भवति, तद्विपरीतं यत् तत्त्वं सर्वं परिणामिनं न व्याप्नोति अर्थात् सर्वगतं न भवति तत् अव्यापि भवति । ''**सक्रियम्**'' नाम परिस्पन्दवत् । क्रिया परिस्पन्दरूपा भवति । सृष्टिकाले सूक्ष्मतत्त्वम् अपि त्रयोदशप्रकारकैः अन्तःबाह्यकरणैः सह युक्तं सद् इतस्ततः संचरणस्वभावकं भवति अतः व्यक्तं सक्रियम् इति उच्यते । क्रियाशीलता व्यक्तस्य गुणः अस्ति । ''**अनेकम्**'' नाम व्यक्तमनेकधा भवति । यथा महद्-अहङ्कार-पञ्चतन्मात्र-पञ्चभूत-एकादशेन्द्रियाणीति । ''**आश्रितम्**'' नाम परतन्त्रम् अर्थात् स्वकारणाश्रितम् इत्यर्थः । महत्तत्त्वतः स्थूलभूतपर्यन्तं सर्वम् अपि व्यक्ततत्त्वं स्वकारणेषु तथैव आश्रितं भवति यथा वृक्षः वनाश्रितः भवति । ''**लिङ्गम्**'' नाम लयं गच्छति इति लिङ्गम् । व्यक्ततत्त्वं प्रलयकाले मूलप्रकृतौ लीनं भवति अतः लिङ्गम् इति । ''**सावयवम्**'' नाम अवयवेन सह वर्तते इति सावयवम् । अप्राप्तपूर्विकाप्राप्तिरूपसंयोगेन सह वर्तते इति सावयवम् । ''**परतन्त्रम्**'' अर्थात् यद् व्यक्ततत्त्वं यस्माद् उत्पद्यते,

तत् तस्य साहाय्येन एव स्वकार्यम् उत्पादयितुं शक्नोति, न तु स्वतन्त्ररूपेण । एतद्विपरीतम् अव्यक्तम् अस्ति अर्थात् अहेतुमत्, नित्यम्, व्यापकम्, निष्क्रियम्, एकम्, अनाश्रितम्, अलिङ्गम्, निरवयवम्, स्वतन्त्रम् इति ।

| | |
|---|---|
| **व्यक्तम्** → | हेतुमत्, अनित्यम्, अव्यापि, सक्रियम्, अनेकम्, आश्रितम्, लिङ्गम्, सावयवम्, परतन्त्रम् |
| **अव्यक्तम्** → | अहेतुमत्, नित्यम्, व्यापकम्, निष्क्रियम्, एकम्, अनाश्रितम्, अलिङ्गम्, निरवयवम्, स्वतन्त्रम् |

**स्वाध्यायः**

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) सांख्यदर्शनस्य प्रवर्तकः अस्ति -

(क) कणादः (ख) कपिलः (ग) पतञ्जलिः (घ) वेदव्यासः

(2) सांख्यकारिकाकारः कः ?

(क) जैमिनिः (ख) वाचस्पतिमिश्रः (ग) ईश्वरकृष्णः (घ) अन्नम्भट्टः

(3) ''आप्तवचनम्'' इत्यत्र आप्तः इति पदस्य अर्थः अस्ति -

(क) अधिवक्ता (ख) धर्मोपदेष्टा (ग) प्रवक्ता (घ) यथार्थवक्ता

(4) सांख्यमते व्यक्ततत्त्वानि सन्ति -

(क) 7 (ख) 25 (ग) 23 (घ) 3

(5) ''शेषवत्'' इति कस्य प्रमाणस्य भेदः ?

(क) सत् (ब) असत् (ग) मिथ्या (घ) शून्यम्

(6) ''परतन्त्रम्'' अस्ति -

(क) व्यक्तम् (ख) अव्यक्तम् (ग) ज्ञः (घ) न किमपि

**2. रिक्तस्थानं पूरयत ।**

(1) महदाद्याः .................... सप्त ।

(2) दुःखत्रयाभिघातात् .................... हेतौ ।

(3) .................... प्रमाणाद्धिः ।

(4) .................... दृष्टम् ।

(5) सामान्यतस्तु दृष्टात् .................... अनुमानात् ।

(6) न प्रकृतिः न विकृतिः .................... ।

(7) .................... प्रकृतिस्वरूपं विरूपं च ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) असदकरणात् | (1) पुरुषः |
| (2) आधिदैविकम् | (2) अव्यक्तम् |
| (3) स्वतन्त्रम् | (3) षोडशकः |
| (4) ज्ञः | (4) सत्कार्यम् |
| (5) विकारः | (5) दुःखम् |
| | (6) जिज्ञासा |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) जिज्ञासा इति पदस्य कः अर्थः ?

(2) किं नाम आधिभौतिकं दुःखम् ?

(3) सौक्ष्म्यात् कस्य अनुपलब्धिः भवति ?

(4) परोक्षं वस्तु कस्मात् प्रमाणात् सिद्ध्यति ?

(5) सांख्यमते कतिविधं प्रमाणं स्वीकृतम् ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) ''व्यक्ताव्यक्तज्ञविज्ञानात्'' इत्यस्य कः अर्थः ?

(2) ''मूलप्रकृतिः'' अविकृतिः किमर्थम् उच्यते ?

(3) विद्यमानम् अपि वस्तु कदाचित् प्रत्यक्षेण किमर्थ न उपलभ्यते ?

**6. टिप्पणीं लिखत ।**

(1) दृष्टवदानुश्रविकः ।

(2) प्रकृतिविकृतयः सप्त ।

(3) त्रिविधम् अनुमानम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) लौकिकेन वैदिकेन च उपायेन दुःखत्रयस्य निवृत्तिः किमर्थं न भवति ?

(2) सांख्यसिद्धान्तानुसारं सत्कार्यवादं साधयत ।

(3) व्यक्ताव्यक्तयोः वैधर्म्यं निरूपयत ।

•

# ६ सांख्यकारिका-२ ( ११-२० )

**प्रस्तावना** -

पूर्वस्मिन् पाठे सांख्यशास्त्रस्य प्रवृत्तेः कारणं प्रदर्श्य संक्षेपतः सांख्यशास्त्रीयानां प्रकृतिपुरुषादितत्त्वानां निरूपणं कृतम् । ततः प्रमेयसिद्ध्यर्थं प्रमाणानि तद्विषयांश्च निरूप्य प्रधानादीनां प्रत्यक्षतया अनुपलब्धेः कारणम् उक्तम् । तदनु सांख्यशास्त्रोक्तसत्कार्यवादं सप्रमाणं विविच्य व्यक्ताव्यक्तरूपदृश्यस्य परस्परं वैधर्म्यसाधर्म्ययोः प्रतिपादनं कृतम् । अस्मिन् पाठे सत्त्वरजस्तमसां गुणत्रयाणां च स्वरूपस्य ज्ञानं, तेषां प्रयोजनम्, त्रैगुण्यादिहेतोः सांख्यशास्त्रोक्तप्रधाने अविवेकित्वादिधर्माणां सिद्धिः, प्रकृतेः सृष्टिं प्रति प्रवृत्तेः प्रयोजनम्, पुरुषसिद्धिः इत्यादीनां विषयाणां विवेचनं प्रस्तुतं वर्तते ।

---

**त्रिगुणस्वरूपं प्रयोजनञ्च** -

अस्यां कारिकायां पुरुषेण सह तस्याः मूलप्रकृतेः साधर्म्यवैधर्म्ययोः विवेचनं प्रस्तूयते -

**त्रिगुणमविवेकि विषयः सामान्यमचेतनं प्रसवधर्मि ।**
**व्यक्तं तथा प्रधानं तद्विपरीतस्तथा च पुमान् ॥ 11 ॥**

**अन्वयः** -व्यक्तं तथा प्रधानं त्रिगुणम्, अविवेकि, विषयः, सामान्यम्, अचेतनम्, प्रसवधर्मि (भवति), तद्विपरीतः तथा च पुमान् (भवति) ।

**सरलार्थः** - व्यक्तं तथा प्रधानं त्रिगुणम्, अविवेकि, विषयः, सामान्यम्, अचेतनम्, प्रसवधर्मि च अस्ति । पुरुषस्तु व्यक्ताव्यक्ताभ्यां विपरीतः भवति अर्थात् निर्गुणः विवेकी, अविषयः, असामान्यम् = असाधारणम्, चेतनः, अप्रसवधर्मी च भवति ।

अत्र गुणपदेन सुखदुःखमोहानाम् एव ग्रहणं कर्तव्यम् । व्यक्ताव्यक्तयोः त्रिगुणत्वं समानम् अस्ति । उभयोः मध्ये सत्त्वरजस्तमसां त्रिगुणरूपवत्त्वेन उपस्थितिः जायते । यथा एते गुणाः मूलप्रकृतौ भवन्ति तथैव महदादिप्रकृतौ अपि समानरूपेण दृश्यन्ते । पुरुषे तु गुणानाम् अभावात् निर्गुणत्वात् सः एताभ्यां व्यक्ताव्यक्ताभ्यां भिन्नः अस्ति । प्रधाना मूलप्रकृतिः महदादिस्वकार्येभ्यः पृथग् भवितुं न शक्नोति तथैव महदादयः अपि स्वकारणात् मूलप्रकृतेः पृथग् भवितुं न शक्नुवन्ति । यतो हि कार्यकारणयोः अभेदः इति सांख्यसिद्धान्तः । अतः एते सर्वेऽपि पदार्थाः अविवेकिनः अर्थात् पृथग्भवने असमर्थाः सन्ति । पुरुषस्तु विवेकी । व्यक्तं तथा अव्यक्तं विषयः भवति अर्थात् पुरुषोपभोगयोग्यं भवति, पुरुषस्तु अविषयः एव भवति । अपि च व्यक्तं तथा अव्यक्तं सामान्यं भवति । यत् सामान्यरूपेण = साधारणरूपेण अनेकपुरुषैः गृह्यते तत् तत्त्वं सामान्यम् इति उच्यते । पुरुषस्तु असाधारणः अस्ति । व्यक्तं तथा अव्यक्तम् अचेतनम् अस्ति । चेतनं नाम स्वप्रकाश-सामर्थ्यम् । एतादृशं सामर्थ्यं यस्मिन् अस्ति तत् चेतनम्, यस्मिन् नास्ति तत् अचेतनम् इति । व्यक्ताव्यक्तोभयात्मिका प्रकृतिः आत्मानं प्रकाशयितुं न शक्नोति, तस्मात् अचेतनम् । पुरुषस्तु आत्मना सह बाह्यपदार्थान् अपि प्रकाशयति । व्यक्तं तथा अव्यक्तं प्रसवधर्मि अर्थात् परिणामि अस्ति । व्यक्ताव्यक्तोभयरूपप्रकृतौ अहर्निशं प्रसवः जायते । पुरुषश्च प्रसवधर्मात् परिणामाद् वा सदा रहितः अर्थात् अप्रसवधर्मी भवति ।

| | |
|---|---|
| **व्यक्तं तथा अव्यक्तम्** → | त्रिगुणम्, अविवेकि, विषयः, सामान्यम्, अचेतनम्, प्रसवधर्मि |
| **पुरुषः** → | निर्गुणः, विवेकी, अविषयः, असामान्यम्, चेतनः, अप्रसवधर्मी |

व्यक्तं तथा अव्यक्तं त्रिगुणात्मकम् अस्ति इति पूर्वकारिकायाम् उक्तम् । एतस्य गुणत्रयस्य स्वरूपं किम् ? प्रयोजनं च किम् ? एतस्य कार्यं किम् ? एतत्सर्वम् अस्यां कारिकायां निरूप्यते ।

**प्रीत्यप्रीतिविषादात्मकाः प्रकाशप्रवृत्तिनियमार्थाः ।**
**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयश्च गुणाः ॥ 12 ॥**

**अन्वयः** - गुणाः प्रीत्यप्रीतिविषादात्मकाः, प्रकाशप्रवृत्तिनियमार्थाः, अन्योन्याभिभवाश्रयजनन-मिथुनवृत्तयः च (भवन्ति) ।

**सरलार्थः** - एते सत्त्वरजस्तमांसि गुणाः यथासंख्यं प्रीत्यप्रीतिवषादात्मकाः = सुखदुःख-मोहस्वभावाः, प्रकाशप्रवृत्तिनियमार्थाः = आलोकप्रवृत्तिप्रतिबन्धार्थाः, अन्योन्याभिभवाश्रयजननमिथुनवृत्तयः = परस्परतिरस्कारक्रियावन्तः, परस्परम् आश्रयक्रियावन्तः परस्परं मिलित्वा सर्वे सर्वजनकाः, स्त्रीपुरुषवद् परस्परं संयोगशीलाः भवन्ति ।

''**प्रीत्यप्रीतिविषादात्मकाः**'' अर्थात् प्रीतिः सुखम्, प्रीत्यात्मकः सत्त्वगुणः । अप्रीतिः दुःखम् अप्रीत्यात्मकः रजोगुणः । विषादः मोहः विषादात्मकः तमोगुणः इति एतेषां गुणानां स्वरूपम् अस्ति । एतेषां प्रयोजनं तु ''**प्रकाशप्रवृत्तिनियमार्थाः**'' इति पदेन उक्तम् । सत्त्वस्य कार्यं प्रकाशरूपम्, रजसः प्रवृत्त्यात्मकम्, तमसश्च नियमनं प्रवृत्तेः अवरोधः इति कार्यमस्ति । एतेषां त्रिगुणानां व्यापारस्तु ''**अन्योन्याभिभवाश्रयजननमिथुनवृत्तयः**'' इति । अभिभवो नाम तिरस्कारः । धर्माधर्मकारणेषु सुखदुःखप्रयोजनेषु उद्भूतेषु एतेषु गुणेषु केनचिद् एकेन अन्ययोः द्वयोः तिरस्कारः भवति, अतः ''अन्योन्याभिभववृत्तयः'' इति । एकस्य गुणस्य क्रिया अपरं गुणम् अपेक्षते यथा सत्त्वगुणस्य प्रकाशनकार्यं रजस्तमसी आदाय एव सम्भवति अर्थात् कश्चित् अपि गुणः स्वक्रियां कर्तुम् अपरस्य गुणस्य अपेक्षां करोति अतः एते ''अन्योन्यजननवृत्तयः'' इति । अपि च एते त्रयः गुणाः परस्परं स्त्रीपुरुषम् इव मिथुनीभावं सम्प्राप्य स्वकार्यं जनयन्ति । अतः एतेः ''अन्योन्यमिथुनवृत्तयः'' इति ।

सम्प्रति त्रिगुणानां नामानि, स्वरूपं, प्रयोजनं च ग्रन्थकारः वदति -

**सत्त्वं लघु प्रकाशकमिष्टमुपष्टम्भकं चलं च रजः ।**
**गुरु वरणकमेव तमः प्रदीपवच्चार्थतो वृत्तिः ॥ 13 ॥**

**अन्वयः** - सत्त्वं - लघु प्रकाशकम् (सांख्यविद्भिः) इष्टम्, रजः - उपष्टम्भकं चलं च (इष्टम्), तमः - गुरु वरणकम् एव (इष्टम्) । (एतेषाम्) वृत्तिः च प्रदीपवत् अर्थतः (भवति) ।

**सरलार्थः** - सत्त्वगुणः अतीव लघुः एवं प्रकाशकः अस्ति। रजोगुणः उपष्टम्भकः अर्थात् संश्लेषजनकः एवं चञ्चलः अस्ति। तमोगुणः गुरुः अर्थात् भारयुक्तः तथा अवरोधकः अस्ति । परस्परविरुद्धानां एतेषां गुणत्रयाणां व्यापारः प्रदीपवत् सम्मिल्य एकप्रयोजनाय भवति ।

लघुत्वे सति प्रकाशकत्वं सत्त्वगुणस्य लक्षणम् । कस्यापि वस्तुनः ऊर्ध्वगमने सत्त्वगुणस्थं लाघवं हेतुरस्ति यथा अग्नेः ऊर्ध्वज्वलनम् । तच्च लाघवं गौरवप्रतिरोधि भवति । अपि च सत्त्वं प्रकाशकं भवति । इन्द्रियार्थयोः सन्निकर्षे सति अर्थस्य या प्रतीतिः भवति सा सत्त्वगुणकारणात् भवति । रजोगुणः उपष्टम्भकः-प्रेरकः प्रवर्तकः वा, सक्रियः च भवति । क्रियाशीलत्वम् अस्य धर्मः । सत्त्वतमोगुणौ स्वभावतः एव निष्क्रियौ भवतः । तयोः उभयोः स्वप्रवर्तनशक्तिः नास्ति । अतः एतौ गुणौ रजोगुणसाहाय्येन एव प्रवृत्तौ भवतः । अतः वस्तुषु या क्रियाशीलता दृश्यते सा रजोगुणकारणात् भवति । तमोगुणः गुरुः वरणकः अर्थात् आच्छादकः भवति अयं स्वनियामकशकत्या पदार्थानां क्रियां नियमयति ।

अत्र कदाचित् एवं शङ्का स्यात् यत् गुणानां परस्परविरोधित्वात् सुन्दोपसुन्दन्यायेन एतेषां परस्परं विनाशः एव स्यात् ? अत्रोच्यते - एतेषां वृत्तिः प्रदीपवत् भवति । यथा वर्त्तिः, तैलम्, अग्निश्च परस्परं विरोधिनः सन्ति, तथापि सर्वे सम्मिल्य प्रकाशात्मकं कार्यं कुर्वन्ति तथैव एते त्रयः गुणाः अपि परस्परं विरोधिनः सन्तः अपि पुरुषप्रयोजनाय मिलित्वा कार्यं कुर्वन्ति ।

**अव्यक्तसिद्धिः** -

**अविवेक्यादेः सिद्धिस्त्रैगुण्यात् तद्विपर्ययाभावात् ।**
**कारणगुणात्मकत्वात् कार्यस्याव्यक्तमपि सिद्धम् ॥ 14 ॥**

**अन्वयः** - (अव्यक्तादौ) अविवेक्यादेः सिद्धिः त्रैगुण्यात् (तथा) तद्विपर्ययाभावात् कार्यस्य कारणगुणात्मकत्वाद् अव्यक्तम् अपि सिद्धं (भवति) ।

**सरलार्थः** - व्यक्ताव्यक्तयोः त्रिगुणात्मकत्वात् तत्र अविवेकित्वादिधर्माणां सिद्धिः भवति अर्थात् अव्यक्तादिषु

त्रैगुण्याभावस्य अभावाद् अविवेकित्वादीनां सत्ता अनुमीयते। कार्यस्य कारणधर्मात्मकत्वाद् महदादीनां कारणभूता त्रिगुणात्मिका प्रकृतिः अपि सिद्धा भवति ।

मूलप्रकृतौ त्रयः भवन्ति । अतः साऽपि अविवेकिनी, विषया, सामान्या, अचेतना, प्रसवधर्मिणी च विद्यते । अव्यक्तादौ अस्य त्रैगुणस्य सिद्धिः अस्मादपि भवति यत् प्रकृतिविपरीते पुरुषतत्त्वे अविवेकितादिधर्माणां सर्वथा अभावः अस्ति, यतो हि पुरुषतत्त्वे त्रैगुण्यं नास्ति । अतः एवमनुमातुं शक्यते – यः अविवेकी नास्ति सः त्रिगुणात्मकस्य कार्यस्य कारणधर्मात्मकत्वाद् महदादीनां कारणभूता त्रिगुणात्मिका प्रकृतिः अपि सिद्धा भवति ।

**प्रकृतेः प्रवृत्त्युपपादनम् –**

**भेदानां परिमाणात् समन्वयात् शक्तितः प्रवृत्तेश्च ।**
**कारणकार्यविभागादविभागाद् वैश्वरूप्यस्य ॥ 15 ॥**
**कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदयाच्च ।**
**परिणामतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात् ॥ 16 ॥**

**अन्वय** – भेदानां कारणम् अव्यक्तम् अस्ति – परिमाणात्, समन्वयात्, शक्तितः प्रवृत्तेः, कारणकार्यविभागाद्, वैश्वरूप्यस्य अविभागात् च । (अव्यक्तं) त्रिगुणतः समुदयात् च प्रवर्तते । प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः सलिलवत् ।

**सरलार्थः** – महदादिकार्याणां सीमितपरिमाणात्, कार्यकारणयोः समानरूपत्वात्, कारणनिष्ठशक्तितः कार्याभिव्यक्तिसत्त्वात्, कार्यकारणयोः पार्थक्यात् तथा नानाविधैः कार्यैः सह कारणस्य अभिन्नत्वात्, बुद्ध्यादिसमस्तव्यक्तकार्याणाम् अव्यक्तं प्रधानं मूलकारणं सिद्धं भवति । इदम् अव्यक्तं त्रिगुणतः समुदयात् च प्रवर्तते । प्रतिप्रतिगुणाश्रयविशेषात् परिणामतः जलवत् इदं कार्यवैचित्र्यं प्राप्नोति ।

अस्यां कारिकायां ग्रन्थकारेण अव्यक्तम् अर्थात् मूलप्रकृतेः सत्तासिद्ध्यर्थं पञ्चयुक्तयः कथिताः । तथा हि ''**परिमाणात्**'' भेदानां नाम महदादिपृथिव्यन्तकार्याणां परिमितपरिमाणात् तेषां कारणं व्यापकपरिमाणवत् किमपि भवेत्, तत् अस्ति अव्यक्तम् । ''**समन्वयात्**'' – महदादिकार्याणि स्थूलदृष्ट्या यद्यपि विभिन्नानि धर्मवन्ति प्रतीयन्ते तथा एतेषु कश्चित् साधारणधर्मः सुखदुःखमोहात्मकधर्मः वर्तते । समानधर्माणां कार्याणां कारणं तद्धर्मवत् एव भवति । अतः महदादिकार्याणां कारणम् अव्यक्तम् अस्ति । ''**शक्तितः प्रवृत्तेः**'' – महदादिकार्याणि स्वानुरूपं प्रतिरूपं च कार्यम् उत्पादयन्ति । कारणशक्त्या एव कार्योत्पत्तिरूपा प्रवृत्तिः जायते । यत्कारणं कार्योत्पादने सामर्थ्यं न दधाति तस्मात् कार्योत्पत्तिः न जायते । अतः महदादिकार्याणां शक्तिमत् कारणम् अव्यक्तम् अस्ति । ''**कारणकार्यविभागात्**'' – प्रत्येक कार्यम् उत्पत्तेः प्राक् स्वकारणे सद्रूपेण तथैव विलीनं भवति यथा कूर्मशरीरे तस्य अङ्गानि । कारणात् कार्योत्पत्त्यनन्तरं कार्यकारणयोः भेदः दृश्यते । अतः महदादिकार्याणि अपि उत्पत्तेः प्राक् स्वकारणे सूक्ष्मरूपेण भवन्ति । अतः एतेषां कारणम् अव्यक्तम् अस्ति । ''**वैश्वरूप्यस्य अविभागात्**'' नानारूपेण अवस्थितं सम्पूर्णं कार्यं विश्वरूपम् इत्युच्यते । प्रलयावस्थायाम् अस्य तिरोभावः भवति, अतः तत्समये कार्यं कारणे अव्यक्तं भवति । कारणं हि कार्यस्य अव्यक्तावस्था । अतः एतस्य सम्पूर्णस्य महदादिप्रपञ्चस्य कारणम् अव्यक्तं सिद्धं भवति ।

इदम् अव्यक्तं समुदयात् त्रिगुणतः च प्रवर्तते । पुरुषसान्निध्यात् प्रकृतिः विक्षुब्धा भवति । त्रयः गुणाः विषमावस्थायां सन्तः सक्रियाः भवन्ति, तस्मात् मूलप्रकृतेः महदादिपदार्थानां सृष्टिः जायते । यद्यपि सत्त्वरजस्तमोगुणाः निश्चितस्वभावाः वर्तन्ते तथापि एतेभ्यः उत्पन्ना सृष्टिः नानारूपा अस्ति । अत्र कारणम् अस्ति विभिन्नवस्तूनाम् आश्रयः । नानापदार्थानाम् आश्रयणात् प्रकृतेः गुणाः अपि परिणामभेदेन परिवर्तिताः भवन्ति । यथा मेघमुक्तजनस्य स्वभावः स्वादश्च एकः एव भवति तथापि वर्षाकाले पृथिवीम् आश्रित्य तदेव जलं नारिकेलाम्रवृक्षादीन् आश्रित्य मधुराम्ललवणकटुकषायतिक्तभेदात् भिन्नं प्रतीयते । अतः प्रत्येकं गुणस्य विभिन्नमात्रासु सम्मिश्रणाद् एकस्मात् एव प्रधानात् नानाविधानि कार्याणि उत्पद्यन्ते ।

**पुरुषसिद्धिः –**

इत्थं व्यक्ताव्यक्ते संसाध्य सम्प्रति पुरुषसिद्धिः क्रियते अनया कारिकया–

**संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् ।**
**पुरुषोऽस्ति भोक्तृभावात् कैवल्यार्थं प्रवृत्तेश्च ॥ 17॥**

**अन्वयः** – पुरुषः अस्ति – संघातपरार्थत्वात्, त्रिगुणादिविपर्ययात्, अधिष्ठानात्, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च ।

**सरलार्थः** – महदादिपदार्थानां संघातस्य परप्रयोजनत्वात्, अत्रिगुणादिमत्वात् अर्थात् निर्गुणत्वात्, अधिष्ठातृत्वात्, भोग्यपदार्थानां भोक्तृभावात्, मुमुक्षूणां कैवल्यार्थं प्रवृत्तिदर्शनात् पुरुषः अस्ति ।

अस्यां कारिकायां पुरुषतत्त्वस्य सिद्ध्यर्थ पञ्च हेतवः प्रदर्शिताः । यथा ''**संघातपरार्थत्वात्**'' इति । महदादिपदार्थाः अन्यस्मै सन्ति, न तु आत्मनः कृते । अतः महदादिसमुदायस्य यः संघातः दृश्यते, तस्य संघातस्य प्रयोजनमपि महदादिभिन्नस्य कस्यचिदन्यस्य तत्त्वस्य कृते भवेत् । एतादृशं तत्त्वम् अस्ति पुरुषः । ''**त्रिगुणादिविपर्ययात्**'' इति हेतोः अपि पुरुषः अस्ति । लोके यानि वस्तूनि सन्ति तानि सर्वाणि अपि त्रिगुणात्मकानि सन्ति तथा न्यूनाधिकगुणयुक्तानि अपि सन्ति । वस्तुषु गुणानां न्यूनाधिक्यसम्भवाद् एतादृशं किमपि अन्यद् एव तत्त्वं भवेत् यत्र गुणानां सर्वथा अभावः स्यात् । एतादृशं त्रिगुणभावात्मकं तत्त्वम् अस्ति पुरुषः । ''**अधिष्ठानात्**'' इति हेतोः अपि पुरुषस्य सिद्धिः भवति । यथा रथात् रथसंचालकः सर्वथा भिन्नः भवति । तथैव सुखदुःखमोहात्मकानां वस्तूनाम् अधिष्ठाता तेभ्यः भिन्नं एव किञ्चित् अपरं तत्त्वं स्यात् । तत् तत्त्वम् अस्ति पुरुषः । ''**भोक्तृभावात्**'' इति । अनुकूलवेदनीयं सुखम्, प्रतीकूलवेदनीयं दुःखम् इति उभयम् अपि भोग्यम् एव अस्ति । एतस्य अनुभवः सर्वेषां भवति एव । अतः एतस्य भोगस्य सद्भावात् अपि एतस्य भोक्ता पुरुषः अस्ति इति सिद्ध्यति । ''**कैवल्यार्थं प्रवृत्तेः**'' इति हेतुः अपि पुरुषतत्त्वं साधयति । कैवल्यं नाम ऐकान्तिकात्यन्तिकदुःखनिवृत्तिः । शास्त्राणाम्, महर्षीणां तथा दिव्यज्ञानिनां कैवल्यार्थं प्रवृत्तिः दृश्यते । इयं प्रवृत्तिः सुखदुःखमोहात्मकबुद्ध्यादिषु न सम्भाव्यते । अतः बुद्ध्यादिभिन्नस्य पुरुषतत्त्वस्य अस्तित्वं सिद्ध्यति ।

अस्यां कारिकायां पुरुषतत्त्वस्य सत्तां प्रतिपाद्य सम्प्रति सांख्यसिद्धान्तानुसारं तस्य बहुत्वं प्रतिपाद्यते ।

**जननमरणकरणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च ।**
**पुरुषबहुत्वं सिद्धं त्रैगुण्यविपर्ययाच्चैव ॥ 18॥**

**अन्वयः** – जननमरणकरणानां प्रतिनियमाद् अयुगपत्प्रवृत्तेश्च त्रैगुण्यविपर्ययाच्च एव पुरुषबहुत्वं सिद्धं (भवति) ।

**सरलार्थः** – जन्मनः मरणस्य त्रयोदशविधकरणानां च प्रत्येकं शरीरे स्वतन्त्ररूपेण विद्यमानत्वात् तेषाम् समसमये प्रवृत्त्यभावात्, पुरुषेषु च सात्त्विकादिरूपेण भेदेनापि पुरुषबहुत्वं सिद्धं भवति ।

देवमनुष्यादियोनिभिः परस्परविलक्षणानां देहेन्द्रियाहङ्कारादिजन्यसुखदुःखादीनाम् अनुभवरूपवेदनाभिः सह पुरुषस्य सम्बन्धः जन्म इति उच्यते । तथा एतस्य सम्बन्धस्य पुरुषेण सह विच्छेदं नाम मरणम् । यदि पुरुषः एक एव स्यात् तर्हि एकस्य जन्मनि सति सर्वे जायेरन् तथा एकस्य मरणे सति सर्वे म्रियेरन् । एके अन्धे सति सर्वे अन्धाः भवेयुः । परं न तथा लोके भवति । अतः युक्तियुक्तम् इदमेव भाति यत् ''**जननमरणकरणानां प्रतिनियमाद्**'' प्रत्येकं शरीरे पुरुषाः भिन्नाः एव अवतिष्ठन्ते । ''**अयुगपत्प्रवृत्तेः**'' अपि पुरुषबहुत्वं सिद्ध्यति । सर्वेषां प्राणिनां कार्येषु प्रवृत्तिः अर्थात् चेष्टा अयुगपत् भवति । यद्यपि चेष्टा अन्तःकरणनिष्ठा भवति तथापि उपचारतः पुरुषसन्निधानात् सा पुरुषस्य स्वीक्रियते । यदि एकः एव पुरुषः स्यात् तर्हि एकस्य उत्थाने सर्वे उत्थिताः स्युः, एकस्य गमने सर्वेः गच्छेयुः इति । परं लोके दृश्यते यत् प्रत्येकं शरीरे एकस्मिन् एव समये भिन्नाः भिन्नाः क्रियाः भवन्ति । एतत् सर्वं पुरुषस्य बहुत्वस्वीकारे एव सम्भवति । अपि च ''**त्रैगुण्यविपर्ययात्**'' इति हेतोः अपि आत्मनः बहुत्वं सिद्ध्यति । लोके बहुप्रकारकाः जनाः दृश्यन्ते । यथा केचन सत्त्वप्रधानाः, केचन रजोप्रधाना, केचन च तमोप्रधानाः । अतः यदि एतेषां सर्वेषाम् अधिष्ठाता एकः एव पुरुषः स्यात् तर्हि तत्र गुणत्रयस्य वैषम्यं न स्यात् । इत्थम् एभिः युक्तिभिः पुरुषबहुत्वं सिद्ध्यति ।

**तस्माच्च विपर्यासात् सिद्धं साक्षित्वमस्य पुरुषस्य ।**
**कैवल्यं माध्यस्थ्यं द्रष्टृत्वमकर्तृभावश्च ॥ 19॥**

**अन्वयः** – तस्माद् विपर्यासात् च अस्य पुरुषस्य साक्षित्वम्, कैवल्यम्, माध्यस्थ्यम्, द्रष्टृत्वं सिद्धम् । अकर्तृभावः च (सिद्धः भवति) ।

**सरलार्थः** – व्यक्ताव्यक्तयोः त्रिगुणत्वादिनानाविधाः धर्माः पुरुषे न उपलभ्यन्ते । अतः पुरुषस्य साक्षित्वम्, केवलत्वम्, मध्यस्थत्वम्, द्रष्टृत्वम्, अकर्तृत्वं च सिद्धं भवति ।

अव्यक्तम् ''**त्रिगुणमविवेकि विषय...**'' इति कारिकोक्तरीत्या अचेतनम् अस्ति । पुरुषस्तु चेतनः, अविषयः च अस्ति । तस्मात् चेतनत्वात् पुरुषस्य **साक्षित्वं** तथा अविषयत्वात् **द्रष्टृत्वं** सिद्धं भवति । येन चेतनेन विषयः ज्ञातः दृष्टः वा सः एव साक्षी भवितुं शक्नोति । बुद्धिरूपे परिणता प्रकृतिः स्वगृहीतविषयं स्वप्रतिबिम्बितपुरुषात्मने समर्पयति । अतः पुरुषः तस्य साक्षी भवति । पुरुषे त्रिगुणाभावात् तस्मिन् दुःखानां सर्वथा अभावः अस्ति । अतः तस्य **कैवल्यधर्मः** अपि सिद्धः भवति । अपि च त्रैगुण्याभावाद् एव पुरुषे **मध्यस्थत्वरूपधर्मः** अपि उपचरितः भवति । अविवेकिता-सम्भूयकारिता प्रसवधर्मिता च गुणानाम् एव धर्मः अस्ति । पुरुषस्य विवेकित्वात् अप्रसवधर्मित्वात् च तस्य **अकर्तृभावः** अपि सिद्ध्यति ।

**तस्मात्तत्संयोगादचेतनं चेतनावदिव लिङ्गम् ।**
**गुणकर्तृत्वेऽपि तथा कर्तेव भवत्युदासीनः ॥ 20॥**

**अन्वयः** - तस्मात् तत्संयोगाद् अचेतनं लिङ्गं चेतनावद् इव, तथा गुणकर्तृत्वेऽपि उदासीनः कर्ता इव भवति ।

**सरलार्थः** - चैतन्यकर्तृत्वभिन्नाधिकरणत्वात् चेतनतत्त्वपुरुषसन्निधानात् जडभूतबुद्ध्यादिलिङ्गानि चैतन्यवत् प्रतिभासन्ते । तथैव बुद्ध्यादौ परिणतगुणानां कार्यदर्शनात् उदासीनः पुरुषः सक्रियः भवति ।

यतः चैतन्यस्य कर्तृत्वस्य च आधार पृथक्पृथग् अस्ति इति पूर्वकारिकायां युक्त्या साधितम् । तस्मात् प्रधानमहदादिकम् अचेतनम् अस्ति, पुरुषस्तु चेतनः । अतः पुरुषसंयोगादेव महदादि अचेतनतत्त्वं चेतनवत् प्रतीयते । यथा अयस्कान्तमणिसन्निधानात् अयसो लघुभागः चेतनवत् प्रतीयते । अपि च यद्यपि कर्तृत्वं बुद्धिरूपेषु परिणतसत्त्वरजस्तमोगुणेषु एव अस्ति, तथापि बुद्धौ उपरक्तिरूपसान्निध्येन इत्थं प्रतीयते यत् कर्तृत्वं पुरुषे अर्थात् चेतने एव विद्यते । वस्तुतः सांख्यसिद्धान्तानुरोधेन पुरुषः कर्ता नास्ति, तस्मिन् कर्तृत्वप्रतीतिः भ्रमात्मिका एव । अस्याः भ्रान्तेः कारणं प्रकृतिपुरुषयोः संयोगः एव ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) अप्रसवधर्मी अस्ति -
(क) प्रधानम् (ख) पुरुषः (ग) प्रकृतिः (घ) बुद्धिः

(2) प्रीत्यात्मकः कः गुणः ?
(क) सत्त्वम् (ख) रजः (ग) तमः (घ) न कोऽपि

(3) त्रैगुण्यविपर्ययः वर्तते -
(क) व्यक्ततत्त्वे (ख) अव्यक्ततत्त्वे (ग) पुरुषतत्त्वे (घ) बुद्धितत्त्वे

(4) भोक्तृभावात् कस्य सिद्धिः भवति ?
(क) पुरुषस्य (ख) प्रकृतेः (ग) सत्त्वगुणस्य (घ) ईश्वरस्य

(5) लघुप्रकाशकं च किम् भवति ?
(क) रजः (ख) तमः (ग) सत्त्वम् (घ) त्रिगुणम्

(7) कैवल्यार्थं प्रवृत्तिः केषां भवति ?
(क) महर्षीणाम् (ख) अज्ञानिनाम् (ग) मूलप्रकृतेः (घ) न कस्यापि

**2. रिक्तस्थानानि पूरयत ।**

(1) उपष्टम्भकं चलं च .................... ।

(2) भेदानां परिणामात् .................... प्रवृत्तेश्च ।

(3) .................... सिद्धं त्रैगुण्यविपर्ययाच्चैव ।

(4) प्रीत्यप्रीति .................. नियमार्था: ।

(5) कार्यकारणविभागात् .................. वैश्वरूप्यस्य ।

(6) तस्मात्तत्संयोगात् .................. लिङ्गम् ।

(7) त्रिगुणम् .................. प्रसवधर्मि ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) नियमार्थ: | (1) प्रकाशकम् |
| (2) माध्यस्थ्यम् | (2) प्रधानम् |
| (3) अचेतनम् | (3) अव्यक्तम् |
| (4) सत्त्वम् | (4) तम: |
| (5) अविवेकि | (5) पुरुष: |
| | (6) अभिभव: |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) प्रवृत्त्यर्थक: क: गुण: ?

(2) प्रदीपवत् अर्थत: वृत्ति: केषां भवति ?

(3) भेदानां कारणं किम् अस्ति ?

(4) ''अधिष्ठानात्'' इति हेतो: कस्य सिद्धि: भवति ?

(5) कस्य संयोगात् अचेतनं चेतनवद् प्रतिभाति ?

**5. द्वित्रवाक्यै: उत्तरं लिखत ।**

(1) व्यक्ताव्यक्तयो: साधर्म्यं लिखत ।

(2) पुरुषधर्मा: ।

(3) प्रधाने अविवेक्यादे: सिद्धि: कथं भवति ?

**6. टिप्पणीं लिखत ।**

(1) सङ्घातस्य परार्थत्वम् ।

(2) गुणानां वृत्तय: ।

(3) कैवल्यम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) सांख्यशास्त्ररीत्या पुरुषबहुत्वं साधयत ।

(2) उदासीन: पुरुष: कथं कर्ता इव भवति ?

(3) सांख्यशास्त्ररीत्या अव्यक्ततत्त्वस्य सिद्धि: कथं भवति इति साधयत ।

•

| ७ | सांख्यकारिका-३ ( २१-३० ) |
|---|---|

**प्रस्तावना** -

सांख्यदर्शनरीत्या सर्वेषां व्यक्ततत्त्वानां कारणं सत्त्वरजस्तमोरूपा मूलप्रकृतिः। विविधानां त्रिगुणात्मकव्यक्ततत्त्वानाम् आश्रयविशेषात् मूलप्रकृतिः सलिलवत् विविधरूपेण परिणमते । भोग्यरूपायाः अस्याः प्रकृतेः भोगार्थं चेतनः पुरुषः अस्ति । प्रकृतिपुरुषयोः संयोगः एव सृष्टिकारणम् । अस्मिन् प्रकरणे सांख्यसम्मतं सर्गकारणम्, बुद्धेः अभिमानस्य मनसश्च लक्षणम्, द्विविधः सर्गः, इन्द्रियाणां व्यापारः इत्यादिविषयाणाम् अध्ययनं प्रस्तूयते ।

---

**सर्गकारणम्** -

अचेतनप्रकृतेः चेतनपुरुषेण सह संयोगेन इयं सृष्टिः भवति । परं भिन्नपदार्थानां संयोगः कामपि अपेक्षां विना न भवति । अपि च पदार्थेषु परस्परापेक्षा तावत् न सम्भाव्यते यावत् तेषु परस्परम् उपकार्योपकारकभावरूपहेतुः न स्यात् । अतः अस्यां कारिकायां प्रकृतिपुरुषयोः संयोगहेतुः प्रदर्श्यते ।

**पुरुषस्य दर्शनार्थं कैवल्यार्थं तथा प्रधानस्य ।**
**पङ्ग्वन्धवदुभयोरपि संयोगस्तत्कृतः सर्गः ॥ 21॥**

**अन्वयः** - पुरुषस्य कैवल्यार्थं तथा प्रधानस्य दर्शनार्थम् उभयोः संयोगः पङ्ग्वन्धवद् (भवति), तत्कृतः सर्गः अपि (भवति) ।

**सरलार्थः** - पुरुषतत्त्वं कैवल्यार्थं प्रकृतिम् अपेक्षते एवं प्रकृतिरपि पुरुषस्य दर्शनार्थं प्रवृत्ता भवति । तस्मात् पङ्ग्वन्धवद् उभयोः संयोगः भवति । तयोः संयोगेन एव महदादिलक्षणभूता सृष्टिः उत्पद्यते ।

प्रकृतिपुरुषयोः सम्बन्धस्य प्रयोजनं दर्शनं कैवल्यं चास्ति । प्रकृतिः पुरुषस्य दर्शनम् इच्छति तथा पुरुषः कैवल्यम् अभीप्सति । सुखदुःखमोहात्मिका प्रकृतिः अचेतनत्वात् सुखदुःखानुभूतिं न करोति । अतः सा सुखदुःखानुभवाय चेतनं पुरुषम् अपेक्षते । एतदेव पुरुषेण तस्याः दर्शनम् इत्युच्यते । पुरुषोऽपि अमुं सम्बन्धम् अपेक्षते । प्रधानेन संयुक्तः पुरुषः प्रधानगतदुःखत्रयम् आत्मनः अवगच्छति । दुःखत्रयस्य आत्यन्तिकनिवृत्तिः एव कैवल्यम् उच्यते । इदं कैवल्यं प्रकृतिपुरुषयोः सत्त्वपुरुषान्यताप्रत्ययेन नामबुद्धिपुरुषयोः पृथक्त्वज्ञानेन विवेकाज्ञानेन एव भवितुमर्हति । अतः पुरुषः कैवल्यार्थं प्रकृतिम् अपेक्षते । वस्तुतः पुरुषे दर्शनशक्तिः विद्यते परं क्रियाशक्तिः नास्ति । प्रकृतौ च क्रियाशक्तिः वर्तते परं दर्शनशक्तिः नास्ति । अतः पङ्ग्वन्धवद् उभयोः संयोगः भवति । यथा कश्चन पङ्गुः गमने असमर्थः, अन्धश्च द्रष्टुमसमर्थः । तथापि अन्धः पङ्गुस्कन्धौ उपविशति । शरीरारूढपङ्गुदर्शितेन मार्गेण अन्धो याति । अतः पङ्गुः अन्धश्च परस्परं सम्मिल्य स्वकार्यं कर्तुं क्षमेते । एवं प्रकृतिपुरुषयोः अपि संयोगः भवति । तस्मात् संयोगादेव इदं निखिलं जगत् जायते ।

इदानीं सर्गविभागः प्रदर्श्यते -

**प्रकृतेर्महांस्ततोऽहंकारस्तस्माद् गणश्च षोडशकः ।**
**तस्मादपि षोडशकात् पञ्चभ्यः पञ्चभूतानि ॥ 22॥**

**अन्वयः** - प्रकृतेः महान्, ततः अहङ्कारः, तस्मात् षोडशकः गणः, तस्माद् अपि षोडशकात् पञ्च भूतानि च (उत्पद्यन्ते) ।

**सरलार्थः** - प्रधानात् महत्तत्त्वम्, ततः अहङ्कारतत्त्वं जायते । तस्माद् अहङ्कारात् इन्द्रियादिषोडशगणः उत्पद्यते । तत्र षोडशकगणे यानि पञ्च तन्मात्राणि सन्ति, तेभ्यः पञ्चमहाभूतानाम् उत्पत्तिः जायते ।

सांख्यशास्त्रे प्रकृतिः, प्रधानम्, कारणम्, अव्यक्तम्, गुणसाम्यम्, तमोबहुलम्, अव्याकृतम् - एते सर्वे प्रकृतिपर्यायाः सन्ति । अतः प्रकृतिपुरुषयोः संयोगेन या सृष्टिः जायते तत्रादौ मूलप्रकृतितः महत्तत्त्वं जायते । ततः अभिमानात्मकः अहङ्कारः, तस्मात् षोडशकः गणः उत्पद्यते । तस्मिन् गणे पञ्च तन्मात्राणि, पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकं च मनः अन्तर्भवति । किञ्च तस्मिन् षोडशकगणे यानि पञ्च तन्मात्राणि सन्ति, तेभ्यः पञ्च महाभूतानि जायन्ते ।

**सांख्यदर्शनरीत्या सृष्टिप्रक्रिया -**




**बुद्धेर्लक्षणं तत्प्रकाराः च -**

प्रधानात् सर्गादौ उत्पन्नस्य महत्तत्त्वस्य लक्षणं विधाय तद्धर्मान् निरूपयति ग्रन्थकारः -

**अध्यवसायो बुद्धिर्धर्मो ज्ञानं विराग ऐश्वर्यम् ।**
**सात्त्विकमेतद्रूपं तामसमस्माद्विपर्यस्तम् ॥ 23॥**

**अन्वयः** - अध्यवसायः बुद्धिः धर्मः ज्ञानं विरागः ऐश्वर्यम् - एतत् सात्त्विकं रूपम् । अस्मात् विपर्यस्तय तामसम् ।

**सरलार्थः** - निश्चयात्मिकान्तःकरणवृत्तिः एव बुद्धिः अस्ति । अस्याः अष्टौ गुणाः सन्ति । तेषु धर्मज्ञानविरागैश्वर्याख्याः चत्वारः सात्त्विकधर्माः । तथा अवशिष्टाः चत्वारः गुणाः तमोंऽशेभ्यः उत्पन्नाः एतेभ्यः भिन्नाः सन्ति ।

अध्यवसायः बुद्धेः लक्षणम् अस्ति । मया एतत्कर्त्तव्यम् इत्यादिरूपः अध्यवसायो निश्चयः । तथा च अयं घटः, अयं पटः इत्येवमध्यवस्यति या सा बुद्धिः । सा च बुद्धिः अष्टाङ्गिनी । यद्वा तस्याः अष्टौ धर्माः भवन्ति । तत्र सात्त्विकधर्माः सात्त्विकरूपाणि वा धर्मः, ज्ञानम्, वैराग्यम्, ऐश्वर्यञ्च इति । तपःस्वाध्यायदयादाननियमलक्षणः धर्मः । सत्त्वपुरुषान्यताप्रत्ययः ज्ञानम् । स्त्रीपुत्रवित्तादिषु अनुरागाभावः विरागः । ईश्वरभावः ऐश्वर्यम्, तच्च अणिमा, महिमा, लघिमा, गरिमा, प्राप्तिः प्राकाम्यम्, ईशित्वम्, वशित्वम् चेति अष्टगुणम् । एतानि चत्वारि धर्मज्ञानादीनि बुद्धेः सात्त्विकरूपाणि भवन्ति । बुद्धेः एतस्मात् सात्त्विकरूपात् विपरीतं तामसरूपम् अपि चतुर्विधं भवति - अधर्मः, अज्ञानम्, अवैराग्यम्, अनैश्वर्यञ्च । निषिद्धाऽऽचरणजन्यो अधर्मः, प्रकृतितत्कार्येभ्यः पुरुषस्य अभेदज्ञानम् अज्ञानम्, स्त्रीपुत्रादिविषयेषु रागः अवैराग्यम्, अणिमाद्यैश्वर्यस्य अभावः अनैश्वर्यम् इति ।

**बुद्धिः** –

**बुद्धिः**
↓
↓ ↓ ↓

सात्त्विकरूपम् — तामसरूपम्

सात्त्विकरूपम् ↓ धर्मः | ज्ञानम् | वैराग्यम् | ऐश्वर्यम्

तामसरूपम् ↓ अधर्मः | अज्ञानम् | रागः | अनैश्वर्यम्

इत्थं मूलप्रकृतितः जायमानस्य बुद्धितत्त्वस्य निरूपणं विधाय सम्प्रति क्रमप्राप्तम् अहङ्कारतत्त्वं विविच्यते –

**अभिमानोऽहंकारः तस्माद्द्विविधः प्रवर्तते सर्गः ।**
**एकादशकश्च गणस्तन्मात्रपञ्चकश्चैव ॥ 24॥**

**अन्वयः** – अभिमानः अहङ्कारः, तस्माद् द्विविधः सर्गः प्रवर्तते, एकादशकश्च गणः, तन्मात्रपञ्चकश्चैव ।

**सरलार्थः** – अहंभावयुक्तज्ञानविशेषः अहङ्कारः कथ्यते । तस्मात् अहङ्कारात् एकादशेन्द्रियाणि, तन्मात्रपञ्चकानि इति द्विप्रकारिका सृष्टिः जायते ।

अभिमानः अहङ्कारस्य लक्षणम् । इन्द्रियैः घटादिकम् आलोच्य, मनसा अभिमत्य, पश्चात् यन्मया चक्षुरादीन्द्रियैः आलोचितम्, यच्च मया मनसा मतम्, तत्र अहम् अधिकृतः, मदर्थाः एव अमी घटादयो विषयाः, मत्तो न अन्यः अत्र अधिकृतः इत्येवंरूपेण यः अहंभावयुक्तज्ञानविशेषः भवति, सः अहङ्कारः इत्युच्यते । अस्मात् अहङ्कारात् द्विधा सृष्टिः जायते – पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि तथा मनः इति एकादशानां समूहः तथा शब्द–स्पर्श–रूप–रस–गन्धात्मकानि पञ्च तन्मात्राणि ।

ननु एकस्मादेव अहङ्कारात् द्विप्रकारकतत्त्वोत्पत्तिः कथं जायते ? इन्द्रियाणां प्रकाशकत्वात् चैतन्यं तथा तन्मात्राणां विषयरूपत्वात् जाड्यमिति । अस्यां कारिकायाम् एकस्मात् कारणात् जायमानस्य कार्यस्य वैचित्र्यं कथम् उपपद्यते इति समाधीयते –

**सात्त्विक एकादशकः प्रवर्तते वैकृतादहंकारात् ।**
**भूतादेस्तन्मात्रः स तामसस्तैजसादुभयम् ॥ 25॥**

**अन्वयः** – वैकृताद् अहङ्कारात् सात्त्विकः एकादशकः, प्रवर्तते । भूतादेः तन्मात्रः (प्रवर्तते), सः तामसः (भवति), तैजसाद् उभयं (प्रवर्तते) ।

**सरलार्थः** – अहङ्कारतत्त्वस्य सत्त्वांशात् सत्त्वगुणबहुलैकादशेन्द्रियाणाम् उत्पत्तिः भवति । अस्याहङ्कारस्य तमोंऽशात् तमोगुणविशिष्टानि पञ्चतन्मात्राणि जायन्ते । अस्य रजोंऽशः उभयोः मध्ये प्रवृत्तिजनकः भवति ।

वैकृतं नाम सात्त्विकम् । यस्मिन् अहङ्कारो सत्त्वगुणः रजोगुणं तमोगुणं च अभिभूय प्राचुर्येण तिष्ठति, सः अहङ्कारः विकृतपदवाच्यो भवति । तस्मात् वैकृतादहङ्कारात् सात्त्विकानाम् एकादशेन्द्रियाणाम् उत्पत्तिः जायते । तेषु एकादशेषु इन्द्रियेषु पञ्च ज्ञानेन्द्रियाणि, पञ्च कर्मेन्द्रियाणि, एकञ्च मनः अन्तर्भवति । कारिकायां ''**भूतादेः**'' इति पदेन अहङ्कारस्य सा अवस्था गृह्यते यत्र तमोगुणः सत्त्वरजसी अभिभूय प्रबलो भवति । तस्मात् तमोगुणप्रधानात् अहङ्कारात् पृथिव्यप्तेजोवाय्वाकाशानां पञ्चमहाभूतानाम् उत्पत्तिः जायते । एतेषाम् उत्पत्तिः जडात्मकपञ्चतन्मात्रेभ्यः जायते अतः तानि जडात्मकानि । इयं जडता तमोगुणधर्मः । किं तर्हि रजोगुणः व्यर्थः ? इति चेत् – न । यतो हि सत्त्वगुणतमोगुणौ निष्क्रियौ स्तः । अतः रजोगुणः कार्यनिष्पादने वृद्धस्य यष्टिः इव प्रेरकरूपेण सहायको भवति । तैजस इति रजोगुणस्य एव अपरा संज्ञा । अतः सुष्ठूक्तम् – ''**तैजसाद् उभयम्**'' इति ।

**बुद्धीन्द्रियाणि चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि ।**
**वाक्पाणिपादयायूपस्थानि कर्मेन्द्रियाण्याहुः ॥ 26॥**

**अन्वयः** – चक्षुःश्रोत्रघ्राणरसनत्वगाख्यानि बुद्धीन्द्रियाणि (आहुः), वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि आहुः ।

**सरलार्थः** – चक्षुः–श्रोत्र–घ्राण–रसन–त्वग्–आख्यानि पञ्च ज्ञानेन्द्रियाणि, वाक्–पाणि–पाद–पायूपस्थानि कर्मेन्द्रियाणि च उच्यन्ते ।

इन्द्रियं द्विविधं भवति – अन्तरिन्द्रियं बाह्येन्द्रियं च । तत्र मनः अन्तरिन्द्रियम् अस्ति । बाह्येन्द्रियं पुनः ज्ञानकर्मभेदात् द्विविधम् । पञ्चधा ज्ञानेन्द्रियाणि सन्ति । तत्र रूपोपलब्धिसाधनं चक्षुः । शब्दोपलब्धिसाधनं श्रोत्रम् । गन्धोपलब्धिसाधनं घ्राणम् । मधुराम्ललवणकटुकषायतिक्तेति षड्विधरसोपलब्धिसाधनं रसना । शीतोष्णादि स्पर्शोपलब्धिसाधनं त्वग् इन्द्रियम् । वस्तुतः ज्ञानेन्द्रियक्रमस्तु श्रोत्रत्वग्चक्षुरसनघ्राणम् इत्येवंप्रकारेण स्यात् । परमत्र कारिकायां छन्दोभङ्गभिया नायं क्रमः आश्रितः । कर्मसाधकानि यानि पञ्च इन्द्रियाणि सन्ति तानि कर्मेन्द्रियाणि उच्यन्ते । तत्र वाक् वदति, हस्तौ नानाव्यापारं कुरुतः, पादौ गमनागमनम्, पायुः मलादीनां विसर्जनं करोति, उपस्थः मूत्रादीनां विसर्जनं प्रजोत्पत्त्या च आनन्ददायकोऽस्ति ।

**इन्द्रियाणि** –




इदानीं सात्त्विकाहङ्कारात् जायमानस्य मनसः निरूपणं क्रियते –

**मनसो लक्षणम्** –

**उभयात्मकमत्र मनः सङ्कल्पमिन्द्रियं च साधर्म्यात् ।**
**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च ॥ 27॥**

**अन्वयः** – अत्र सङ्कल्पकं मनः (अस्ति), उभयात्मकम् इन्द्रियं च साधर्म्यात्, नानात्वं गुणपरिणामविशेषाद्, बाह्यभेदाश्च (भवन्ति) ।

**सरलार्थः** – एकादशेन्द्रियेषु मनःसंज्ञकम् इन्द्रियम् सङ्कल्पविकल्पात्मकम् एवं ज्ञानकर्मेन्द्रियसमानधर्मयुक्तत्वात् उभयात्मकम् अस्ति । बाह्यजगतः विषयः इव इन्द्रियाणां वैविध्यं सत्त्वादिगुणानां विविधरूपेण परिणतस्वभावेन एव अस्ति ।

''**मनः षष्ठानीन्द्रियाणि**'' इति भगवद्गीतावचनात् मनसः इन्द्रियत्वं लभ्यते । मनसा अधिष्ठितानामेव चक्षुरादीनां वागादीनां च स्वस्वविषयेषु वचनादिषु च कार्येषु प्रवृत्तिकारणात् उभयात्मकत्वं ज्ञानेन्द्रियत्वं कर्मेन्द्रियत्वं च स्वीक्रियते । सङ्कल्पयति इति सङ्कल्पकं मनः । अत एव सङ्कल्पकत्वं मनसः लक्षणम् । अत्रायं प्रश्नः भवितुमर्हति यत् सात्त्विकाहङ्कारस्तु एकः एव । तस्माद् विविधानि एकादशविधानि इन्द्रियाणि कथं जायन्ते ? अत्र समाधीयते – ''**गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च**'' इति । यद्यपि एतेषां साधारणकारणं सात्त्विकाहङ्कारः एकः एव तथापि सहकारिकारणादृष्टविशेषाणां भिन्नत्वात् कार्येषु भेदः जायते । यथा एकस्मात् एव वृक्षात् फलपत्रादिनानाविधानि कार्याणि जायन्ते ।

**इन्द्रियाणां व्यापारः** –

अस्यां कारिकायां दशेन्द्रियाणाम् असाधारणवृत्तीनां निर्धारणं प्रदर्श्यते –

**रूपादिषु पञ्चानामालोचनमात्रमिष्यते वृत्तिः ।**
**वचनादानविहरणोत्सर्गानन्दाश्च पञ्चानाम् ॥ 28॥**

**अन्वयः** – रूपादिषु (यत्) आलोचनमात्रं (भवति तत्) पञ्चानां वृत्तिः इष्यते, पञ्चानां च वचनादानविहरणोत्सर्गानन्दाः (वृत्तयः इष्यन्ते) ।

**सरलार्थः** – चक्षुरादिपञ्चज्ञानेन्द्रियाणां रूपादिविषयेषु सन्निहितत्वात् तदाकारपरिणामाद् यः बोधः भवति स एव चक्षुरादिपञ्चज्ञानेन्द्रियाणाम् असाधारणधर्मः अस्ति । वागादिपञ्चकर्मेन्द्रियाणां व्यापारास्तु वचन–आदान–विहरण–उत्सर्ग–आनन्दाः इति सन्ति ।

शब्द-स्पर्श-रूप-रस-गन्धविषयाणां सन्निहितत्वे सति तेषां प्रकाशनमात्रम् एव पञ्चज्ञानेन्द्रियाणां व्यापारः । ज्ञानेन्द्रियाणां विषयाः यदा स्वप्रकाशकेन्द्रियसन्निकृष्टाः भवन्ति तदा इन्द्रियाणि तदाकाराकारितानि भवन्ति । इत्थम् इन्द्रियाणां विषयाकाररूपेण परिणाम एव विषयस्य प्रकाशनम् इत्युच्यते । एतेषां विषयाणां विशेषतया निर्णयस्तु बुद्ध्या क्रियते, न इन्द्रियैः । कारिकायाः उत्तरार्द्धे पञ्चकर्मेन्द्रियाणां कथनम् अस्ति । तत्र वाचः वचनम्, हस्तयोः आदानम्, पादयोः विहरणम्, पायोः मलत्यागः, उपस्थस्य च आनन्दः इति तेषां कार्याणि सन्ति ।

**स्वालक्षण्यं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या ।**
**सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च ॥ 29॥**

**अन्वयः** - त्रयस्य स्वालक्षण्यं वृत्तिः (भवति), सा एषा असामान्या भवति, (एषाम्) सामान्यकरणवृत्तिः प्राणाद्याः पञ्च वायवः (भवन्ति) ।

**सरलार्थः** - मनोबुद्ध्यहङ्काररूपान्तःकरणत्रयस्य स्वस्वलक्षणानुसारेण यः व्यापारविशेषः भवति, सः तेषाम् असाधारणधर्मः अस्ति । एवं मनोबुद्ध्यहङ्कारत्रयाणां प्राणापानादिरूपः साधारणव्यापारः अपि अस्ति ।

मनोबुद्ध्यहङ्काराः अन्तःकरणानि भवन्ति । त्रयाणाम् अन्तःकरणानां वृत्तिः व्यापारः द्विविधो भवति । असाधारणः साधारणश्च । असाधारणा वृत्तिस्तु बुद्धेः अध्यवसायः, अहङ्कारस्य अभिमानः, मनसश्च सङ्कल्पः अस्ति । एतेषां त्रयाणां साधारणा वृत्तिः प्राणापानव्यानोदानसमानपञ्चवायवः सन्ति । प्राणादिपञ्चवायवः अन्तःकरणस्य वृत्तयः अर्थात् जीवनरूपाः सन्ति । यत्र अन्तःकरणस्य सत्ता तत्रैव प्राणादिव्यापारः। प्राणादिव्यापाराभावे अन्तःकरणस्य सत्ता भवितुं न अर्हति ।

एतावता बाह्यान्तःकरणयोः व्यापारविशेषस्य निरूपणं कृतम् । इदानीम् एतेषां क्रियाः एकधा भवन्ति उत युगपद् इति समाधातुम् इयं कारिका उच्यते -

**युगपच्चतुष्टयस्य तु वृत्तिः क्रमशश्च तस्य निर्दिष्टा ।**
**दृष्टे तथाप्यदृष्टे त्रयस्य तत्पूर्विका वृत्तिः ॥ 30॥**

**अन्वयः** - दृष्टे तु तस्य चतुष्टयस्य वृत्तिः युगपत्, क्रमशः च निर्दिष्टा । तथा अदृष्टेऽपि तत्पूर्विका त्रयस्य वृत्तिः (भवति)।।

**सरलार्थः** - प्रत्यक्षविषये मन आदिचतुष्टस्य वृत्तिः क्रमाक्रमभेदात् द्विविधा अभिहिता । परोक्षविषये तु बाह्येन्द्रियाणां प्रवृत्त्यभावात् मनोऽहङ्कारमहत्तत्त्वानां व्यापारस्तु एकस्मिन् कालेऽपि भवति एवं क्रमेणापि भवति ।

प्रत्यक्षिवषये मनोबुद्ध्यहङ्काररूपान्तःकरणत्रयस्य तथा बाह्येन्द्रियाणां क्रिया कदाचित् युगपत् अर्थात् एकस्मिन् काले भवति, कदाचिच्च क्रमशः भवति इति सांख्याचार्यैः निर्दिष्टम् । यथा मेघाच्छन्नरात्रौ गहनान्धकारे सहसा विद्युत्प्रकाशात् सिंहव्याघ्रादिकं समीपे विद्यते इति पश्यति तदा अस्य द्रष्टुः बाह्यकरणानां रूपालोचनात्मकः व्यापारः तथा मनोऽहङ्कारबुद्धीनामन्तःकरणानाञ्च सङ्कल्पाभिमानाऽध्यवसायाख्याः व्यापाराः युगपदेव भवन्ति । तेन च सः ततः उत्प्लुत्य तस्मात् स्थानात् झटिति उपसरति । परोक्षविषये यथा कदाचित् मन्दप्रकाशे किमपि वस्तु दृष्ट्वा ''इदं किम्'' इति प्रश्ने सति ''अयं पशुः अस्ति, मत्समीपे एव आगच्छति, मया इतः पलायनं कर्तव्यम् अन्यथा सः मां हन्येत'' इत्येवं प्रकारेण तस्य बुद्धिः निश्चिनोति । अत्र चक्षुर्भ्याम् आलोचनम्, मनसा सङ्कल्पविकल्पाः, अहङ्कारेण अभिमानः, बुद्ध्या च पलायननिश्चयः क्रमेण यथासंख्यं जायते ।

**स्वाध्यायः**

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) प्रकृतिपुरुषयोः संयोगः कथं भवति ?
(क) कुलालघटवत् (ख) पङ्ग्वन्धवत् (ग) आकाशवत् (घ) कुठारदारुवत्

(2) बुद्धेः लक्षणम् अस्ति -
(क) निश्चयः (ख) संकल्पः (ग) अभिमानः (घ) विकल्पः

(3) मनः अस्ति -
(क) ज्ञानेन्द्रियम् (ख) कर्मेन्द्रियम् (ग) उभयेन्द्रियम् (घ) अनुभयेन्द्रियम्

(4) एकादशेन्द्रियाणि कस्मात् उत्पद्यन्ते ?
(क) प्रकृतेः (ख) पुरुषात् (ग) सात्त्विकाहङ्कारात् (घ) तामसाहङ्कारात्

(5) सांख्यमते कैवल्यं नाम –

(क) स्वर्गः (ख) भोगप्राप्तिः

(ग) आत्यन्तिकदुःखनिवृत्तिः (घ) लोकान्तप्राप्तिः

(6) ''वचनम्'' इति व्यापारः कस्य इन्द्रियस्य ?

(क) पाणेः (ख) शब्दस्य (ग) वाचः (घ) बुद्धेः

(7) अन्तःकरणम् अस्ति –

(क) एकविधम् (ख) द्विविधम् (ग) त्रिविधम् (घ) चतुर्विधम्

**2. रिक्तस्थानं पूरयत ।**

(1) .................... संयोगः तत्कृतः सर्गः ।

(2) वैकृतात् अहङ्कारात् .................... प्रवर्तते ।

(3) अहङ्कारात् .................... विधः सर्गः प्रवर्तते ।

(4) धर्मः ज्ञानम्, विरागः इत्यादिरूपं बुद्धेः .................... रूपम् ।

(5) .................... संकल्पकम् इन्द्रियम् अस्ति ।

(6) स्पर्शस्य ग्रहणम् .................... इन्द्रियेण भवति ।

(7) बाह्यकरणानि .................... सन्ति ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) गन्धग्राहकम् | (1) त्रिगुणात्मिका |
| (2) वाक् | (2) दर्शनशक्तिः |
| (3) मनः | (3) अन्धः |
| (4) पुरुषः | (4) कर्मेन्द्रियम् |
| (5) प्रकृतिः | (5) घ्राणम् |
| | (6) अन्तःकरणम् |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) पञ्च ज्ञानेन्द्रियाणि कानि ?

(2) पञ्च कर्मेन्द्रियाणि कानि ?

(3) सर्गादौ प्रकृतेः किं तत्त्वं जायते ?

(4) किं नाम वैकृतम् ?

(5) पञ्च वायवः के सन्ति ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) अहङ्कारात् जायमाने षोडशके किम् अन्तर्भवति ?

(2) ज्ञानेन्द्रियाणाम् असाधारणवृत्तिं लिखत ।

(3) बुद्धिधर्माः के सन्ति ?

**6. टिप्पणीं लिखत ।**

(1) अहङ्कारस्य द्विविधः सर्गः । (2) पङ्ग्वन्धवत्संयोगः । (3) अन्तःकरणम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) सांख्यमतानुसारं सृष्टौ उत्पत्तिप्रकारं लिखत ।

(2) अहङ्कारलक्षणं विलिख्य तदीयकार्यभेदान् वर्णयत ।

(3) प्रकृतिपुरुषयोः संयोगस्य कारणं लिखत ।

●

# योगदर्शनम्

## ८ योगदर्शनपरिचयः, स्वरूपं प्रकाराश्च

**प्रस्तावना** -

आत्यन्तिकदु:खनिवृत्त्यै प्रवृत्तेषु वैदिकदर्शनेषु अन्यतमं योगदर्शनं वर्तते । न्याय-वैशेषिकादि दर्शनेषु-मनोवृत्तिमाधारीकृत्य, तद् द्वारा भ्रमनिवृत्तिपूर्वकजायमानज्ञानेन दु:खनिवृत्तिविषये चर्चा विहिता अस्ति । किन्तु अस्मिन् योगदर्शने मनोवृत्तिमाधारीकृत्य साधनप्रक्रिया उत्तमाधिकारिणां कृते सम्प्रज्ञात-असम्प्रज्ञातसमाधिप्रक्रिया प्रतिपादिता । तथा मध्यमाधिकारिणां कृते च श्वास-प्रश्वासमाधारीकृत्य विशेषतया अष्टाङ्गयोगप्रक्रिया प्रतिपादिता । आभ्यां द्विविधप्रक्रियाभ्यास् आत्यन्तिकदु:खनिवृत्तिः प्रतिपादिता । योगोऽयं पूर्वं केवलं मुनिभिरेव आश्रित आसीदिति श्रूयते । किन्तु परमकारुणिकेन महर्षिपतञ्जलिना सर्वमानवकल्याणाय अवबोधने दुष्करं योगशास्त्रं पादचतुष्टयेन विभज्य सुगमं कृतम् । ततः सर्वमानवैः नित्यजीवने अभ्यस्यमानं योगशास्त्रम् अद्यापि देशे विदेशे सम्पूर्ण-विश्वे च राराजमानं दृश्यते । प्रकरणेऽस्मिन् योगशब्दार्थविचारः योगदर्शनस्य महत्त्वं तथा योगस्वरूपभेदाः इत्येतावन्तः विषयाः चर्चिताः सन्ति ।

---

**योगशब्दार्थविचारः** -

योगशब्दः युज् समाधौ इति धातोः घञ् प्रत्यये कृते निष्पन्नो भवति । पाणिनीयव्याकरणशास्त्रानुसारेण युजिर् योगे, युज् संयमने इति द्वाभ्यां धातुभ्यांमपि व्युत्पन्नो भवति योगशब्दः । अत्र तु युज् समाधौ इत्यर्थ एव अभीष्टार्थः वर्तते । संस्कृतवाङ्मये धातुत्रयेण व्युत्पादितस्य योगशब्दस्य बहुषु अर्थेषु प्रयोगः कृतो वर्तते यथा -

- प्राणापानयोः संयोगः योग इति हठयोगप्रक्रियायाम् ।
- सूर्यचन्द्रमसोः संयोगः योग इति नाडीशास्त्रे ।
- जीवात्म-परमात्मनोः संयोगः योग इति वेदान्ते ।
- शिवशक्तिसामरस्यं योग इति शैवागमे ।
- द्वयोर्वस्तुनोः संयोगः योग इति व्यावहारिके ।
- प्रकृति-प्रत्यययोः संयोगः योग इति न्यायव्याकरणादि शास्त्रेषु ।

योगशब्दः गीतायाम् उपनिषत्सु च वारं वारं प्रयुक्तो वर्तते । अत्र तु '**चित्तवृत्तिनिरोध**' एवेति सूत्रकारः पतञ्जलिः कथयति । अर्थात् चित्तवृत्तीनां निरोध एव योगः, समाधिशब्देन कथ्यते । भगवता श्रीकृष्णेन दु:खनिवृत्त्यर्थम् उपायत्वेन योग उपदिष्टः । तथा कर्मसु कुशलं कर्म योग एव भवतीति भगवतो वचनं यथा - ''**योगः कर्मसु कौशलम्**'' इति । तथा ''**प्राणान् प्रपीड्येह स युक्तचेष्टः**'' इति श्वेताश्वतरोपनिषद्वाक्यम् ।

**योगः**
↓
युज् समाधौ | युजिर् योगे | युज् संयमने

**योगदर्शनमहत्त्वम्** -

स च योगः द्विविधः । **( 1 ) सम्प्रज्ञातसमाधिः, ( 2 ) असम्प्रज्ञातसमाधिश्चेति** । तत्र सम्प्रज्ञात इत्युक्ते सम्यक् प्रज्ञायते यस्मिन् ध्येयं साक्षात्क्रियते सः योगः सम्प्रज्ञातः । अर्थात् यस्तु एकाग्रे चेतसि पारमार्थिकं तत्त्वं द्योतयति प्रकाशयति, अविद्यादीन् क्लेशान् नाशयति, कर्मबन्धनानि नाशयति, चित्तं सम्पूर्णतया निरोधाभिमुखं च करोति सः सम्प्रज्ञात-समाधिरित्याख्यायते । निवृत्तसमस्तवृत्तिको यः सः योगः असम्प्रज्ञातः ।

**समाधिः**

↓

सम्प्रज्ञातसमाधिः | असम्प्रज्ञातसमाधिः

योगशास्त्रम् एकम् अद्वितीयरत्नं वर्तते । एतस्य अभ्यासः न केवलं भारते अपि तु सम्पूर्णे जगति येन केन प्रकारेण सर्वधर्मैः समाद्रियते अनुष्ठीयते च । अस्य योगस्य अभ्यासेन साधकेषु अलौकिकी मानसिकी शारीरकी च शक्तिरुत्पद्यते । योगस्य प्रभावेन योगिनः अतिश्रेष्ठाभिः दैविशक्तिभिः सम्पन्नाः मानवैः अशक्यान्यपि कार्याणि कर्तुं प्रभवन्ति । योगिनः योगशक्तिभिः यं कमपि वस्तु प्राप्तुं शक्नुवन्ति । अलौकिकदृष्टिसम्पन्नो योगी परमाणुमपि द्रष्टुं शक्नोति, खगा इव खे उड्डयते, दुर्गममपि स्थानं गन्तुं शक्नोति । योगाभ्यासद्वारा योगिभिः ईदृश्यः अनेकः विद्याः सिद्धयश्च प्राप्यन्ते । किन्तु एताः सिद्धयः केवलं साधनमात्रादुत्पद्यमानाः अवान्तरफलाः, योगी तावत् आसु अलौकिकशक्तिषु मोहम् अप्राप्य वास्तविकं लक्ष्यं मोक्षमेव प्राप्तुम् अग्रेसरो भवति ।

योगदर्शने अष्टाङ्गयोगेन ईश्वरप्रणिधानेन च समाधौ पराकाष्ठां स्थितिमवाप्नोति सा एव मोक्ष इत्युच्यते । सिद्धान्तपक्षदृष्ट्या व्यावहारिकदृष्ट्या च सांख्यदर्शनापेक्षया योगदर्शनस्य महत्त्वम् अधिकं वर्तते इत्यत्र नास्ति अतिशयोक्तिः। यतो हि दर्शनेऽस्मिन् ईश्वरस्य सत्तायाः स्वीकरणात् तथा वास्तविकानुभवैः साधकेषु विश्वासमुत्पाद्यमनत्वाच्च ।

योगदर्शनमिदं संयमादिभिः आत्मप्रत्यक्षे महत् सहायकं भवति । बुद्धेश्च स्वस्थतानिर्माणपूर्वकं मोक्षप्रापकं किमपि शास्त्रमस्ति तर्हि तत् योगदर्शनमेवास्ति । अत एव इदं योगदर्शनं भारतीयदर्शनेषु अनन्यमसाधारणं च स्थानं प्राप्तवत् ।

योगशास्त्रमिदं चिकित्साशास्त्रवत् चतुर्व्यूहात्मकं भवति । अर्थात् चिकित्साशास्त्रे "**रोगः, रोगहेतुः, आरोग्यम्, भैषज्यम्**" इति चत्वारो व्यूहाः प्रतिपादिताः । तथैव **योगशास्त्रे**ऽपि चत्वारो व्यूहाः भवन्ति । ते यथा- '**संसारः, संसारहेतुः, मोक्षः, मोक्षहेतुश्चे**'ति ।

**चतुर्व्यूहात्मकत्वम्**

↓

चिकित्साशास्त्रम् | योगशास्त्रम्

चिकित्साशास्त्रम् ↓ रोगः | रोगहेतुः | आरोग्यम् | आरोग्यहेतुः

योगशास्त्रम् ↓ संसारः | संसारहेतुः | मोक्षः | मोक्षहेतु

यथा रोगी दुःखबाहुल्यात् रोगाद्विमुक्तो भवितुं वाञ्छति तथैव दुःखबाहुल्यात् **संसारो**ऽपि हेयः । हेयस्य **संसारस्य कारणं** तु द्रष्टृ-दृश्ययोः पुरुषप्रधानयोः संयोग एव । **मोक्षः** - उक्तसंयोगस्य आत्यन्तिकीनिवृत्तिरेव मोक्षः । (हानम्) । **मोक्षोपायः** - सम्यग्दर्शनमेव मोक्षोपाय इति ।

**प्रधानतया दुखं त्रिप्रकारकम्** -

**(1) आध्यात्मिकदुःखम्, (2) आधिदैविकदुःखम्, (3) आधिभौतिकदुःखम् ।**

- **शरीरसम्बद्धानि ज्वरादीनि, मानसानि शोकसन्तापादीनि च आध्यात्मिकदुःखानि ।**
- **उल्कापात-भूकम्प-अतिवृष्ट्यनावृष्ट्यादीनि आधिदैविकदुःखानि ।**
- **सर्पव्याघ्रादि हिंस्रभूतेभ्य उत्पद्यमानदुःखानि आधिभौतिकदुःखानि ।**

एतेषां दुःखत्रयाणां निरसनायैव प्राणिनां सन्तताऽविरता च प्रवृत्तिः प्रचलति । एतेषां दुःखत्रयाणां क्षणिकनिवृत्त्या न मोक्षप्राप्तिः । दुःखनिवृत्तावपि पुनस्तदनुवर्तनात् । एवमेव मानसिकक्लेशनिवृत्तावपि एते क्लेशाः पौनःपुन्येन भवन्त्येव ।

एवं यावतः इन्द्रियजन्यानि सांसारिकानि सुखानि तानि अपि क्षणिकमात्रावस्थायीनि । एकस्मात् सुखात् परं तदितराभिलाषो सुतरां विजृम्भते एव । अत अचिरस्थायित्वात् सुखान्यपि नोपादेयानि भवन्ति । अतो या दुःखानामात्यन्तिकी

निवृत्तिः तामेव परमपुरुषार्थत्वेन कैवल्यमिति च अभिप्रयन्ति तत्त्वज्ञाः । तत्कैवल्यप्रदर्शनात् अस्य शास्त्रस्य परमं महत्त्वम् अनुभूयते । कैवल्यं चतुर्भिः व्यूहैरेव प्राप्तुं शक्यते ।

तत्र चतुर्व्यूहे अतीतं व्यतिक्रान्तं वा दुःखं न हेयकोटौ आयाति । नापि भोगारूढतया वर्तमानं क्षणान्तरेऽतीतपक्षे आयाति । अपि च केवलमनागतदुःखमेव हेयपक्षम् आलम्बते । सूत्रयति आचार्यः **'हेयं दुःखमनागतम्'** इति । तच्च दुःखं पुरुषम् अतिक्लिश्नाति । तस्मात् तस्य आत्यन्तिकनिवृत्तिरपेक्षिता । तन्निवृत्त्यर्थमेव योगदर्शनं प्रवर्तते । सर्वदर्शनेषु केवलयोगदर्शनस्यैवेदं वैशिष्ट्यम् अस्ति यत् योगाभ्यासद्वारा भुक्तिमुक्ती च उभे अपि प्राप्तुं शक्यते । यैः योगिभिः योगाग्निमयं शरीरम् अवाप्तं तेषां न रोगः नापि जरा न च मृत्युः सम्भवति इति श्लोको यथा -

**'न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्' ।**

**योगस्वरूपम्** -

योगस्य विचारे क्रियमाणे सति शारीरिक-मानसिक-बौद्धिक-आध्यात्मिकदृष्टिभिः साधकानां सामर्थ्येन अभिरुच्या वा साधनरूपयोगस्य नैके भेदाः दृष्टिगोचराः भवन्ति । स्वाभाविकाधारभेदेन साधनेऽपि भेदाः बहवो भवन्ति । यथा नरस्य नारायणेन सह ऐक्यसम्पादकं साधनं सर्वेषां समानं भवितुं नार्हति । परन्तु साधकाः स्वस्वाधिकारानुसारं साधनं निश्चित्य प्रवर्तन्ते । तस्मात् साधनरूपो योगोऽनेकप्रकारको द्रष्टुं शक्यते यथा - (1) क्रियायोगः, (2) समाधियोगः, (3) जपयोगः, (4) मन्त्रयोगः, (5) हठयोगः, (6) लययोगः, (7) राजयोगः, (8) कुण्डलिनीयोगः, (9) वाग्योगः, (10) शब्दयोगः, (11) श्रद्धायोगः, (12) कर्मयोगः, (13) अभ्यासयोगः, (14) पाशुपतयोगश्चेत्यादि । तथा श्रीमद्भगवद्गीतायां भगवता श्रीकृष्णेन अनेकयोगानां प्रकाराः प्रदर्शिताः ते यथा -

(1) समत्वयोगः (अ-2), (2) ज्ञानयोगः (अ-4), (3) भक्तियोगः (अ-12), (4) कर्मयोगः (अ-3), कर्मसन्न्यासयोगः (5) इत्यादि ।

योगशास्त्रस्यास्य सेश्वरसांख्यमिति अपरं नामधेयमपि वर्तते । शास्त्रमिदं पूर्वं हिरण्यगर्भादिभिः समुपदिष्टं, पश्चात् पतञ्जलिना मुमुक्षूणां कल्याणाय सुष्ठु-बोधार्थञ्च सूत्ररूपेण जग्रन्थ । पतञ्जलिमुनिना प्रणीतत्वात् पातञ्जलयोगदर्शनमिति नाम्नापि अभिधीयते । शास्त्रमिदं पादचतुष्टयसम्मिलितं वर्तते । ते -

**(1) समाधिपादः, (2) साधनपादः, (3) विभूतिपादः, (4) कैवल्यपादः ।**

**योगसूत्राणि**

**( 195 सूत्राणि )**

↓

| समाधिपादः | साधनपादः | विभूतिपादः | कैवल्यपादः |
|---|---|---|---|
| ↓ | ↓ | ↓ | ↓ |
| 51 सूत्राणि | 55 सूत्राणि | 55 सूत्राणि | 34 सूत्राणि |

**प्रथमपादः समाधिपादः** - चतुष्पादात्मके योगशास्त्रे प्रथमपादः समाधिपादः । पादेऽस्मिन् **'अथ योगानुशासनम्'** इति सूत्रादारभ्य **'योगः चित्तवृत्तिनिरोधः'** इति योगलक्षणमभिलक्ष्य चित्तवृत्तिनिरोधकाले चित्तस्य स्वरूपावस्थानं व्युत्थानकाले च वृत्तिसारूप्यं निरूपितम् । ततः **'वृत्तयः पञ्चतय्यः'** इति वृत्तीनां पञ्चसंख्याकत्वं प्रतिपादितम् । पुनः पञ्चवृत्तीनां क्लिष्टाऽक्लिष्टभेदेन द्वैविध्यपूर्वकम् उद्देश्य-प्रमाण-विभागलक्षणानि विवृतानि । वृत्तीनां निरोधोपायेन अभ्यासवैराग्ययोः स्वरूपकथनं कथितम् । तयोः अवान्तरभेद-लक्षणप्रतिपादनपुरस्सरं सम्प्रज्ञात-असम्प्रज्ञातसमाध्योः स्वरूपञ्च सुष्ठु प्रतिपादितम् ।

तदनु तदधिकारी-अधिकारानुगुण-फल-लाभ-समयतारतम्यादिकं प्रतिपाद्य प्रसङ्गसङ्गत्या प्राप्तम् ईश्वरमभिलक्ष्य तत्स्वरूपं निरूपितम् । तद्वाचकप्रणवजप-उपासन-ध्यानविधिश्च निरूपिता । विधौ प्राप्यमानान् अन्तरायान् तन्निरासोपायांश्च सम्यक् निरूपितवन्तः । ततः सवितर्क-निर्वितर्क-सविचार-निर्विचारसमापत्तीनां स्वरूपं निर्दिश्य तासां सबीजत्वं निरोधः

निर्बीजसमाधिश्च व्याख्यातः । ईदृशा अतिगम्भीराः विषयाः महर्षिपतञ्जलिना समाधिपादनामके एकपञ्चाशत्सूत्रगुम्फिते प्रथमपादे निर्दिष्टाः ।

**द्वितीयपादः साधनपादः** – **'नातपस्विनो योगः सिद्ध्यति'** इत्यार्योक्तिमनुश्रुत्य तपःस्वाध्यायेश्वरप्रणिधानानि क्रियायोग इति क्रियायोगस्य स्वरूपं प्रयोजनञ्च प्रतिपादितम् । ततः पञ्चक्लेशानाम् उद्देश-लक्षण-विभागान् सम्परीक्ष्य तेषां निरासोपायाश्च निरूपिताः । ततः हेयादिव्यूहचतुष्टयं सम्यक् अवबोध्य अष्टाङ्गयोगे बहिरङ्गसाधनीभूतं यमनियमादिपञ्चकं फलसहितं सुस्पष्टं पञ्चपञ्चाशत्सूत्रात्मके अस्मिन् द्वितीयपादे प्रतिपादितम् अस्ति ।

**तृतीयपादः विभूतिपादः** – **'देशबन्धश्चित्तस्य धारणा'** इति सूत्रादारभ्यते । ततः ध्यान-धारण-समाधीनां लक्षणप्रयोजनानि अभिलक्षितानि । पश्चात् संयमस्य लक्षणं निरूप्य परिणामभेदाः तत्फलरूपाः अतीतानागत-भुवनज्ञानं, कायव्यूहज्ञानादिरूपाः विभूतीः परिलक्षिताः । इन्द्रियजयादिरूपसिद्धीः निरूप्य योगफलभूताः तारकसंज्ञित-विवेकज्ञानसिद्ध्यादि विषयैः पञ्चपञ्चाशत्सूत्रात्मकमिदं तृतीयपादं पर्यवसितवान् महर्षिः पतञ्जलिः ।

**चतुर्थपादः कैवल्यपादः** – **'जन्मौषधि-मन्त्र-तप-समाधिजाः सिद्धयः'** इति सूत्रादारभ्य सिद्धिपञ्चकं सप्रपञ्चं निरूपितम् । योगशास्त्रस्य मुख्योद्देश्यं सर्वप्राणिभिरभिलषितं परमपुरुषार्थं च कैवल्यम् अस्ति इति निरूपितम् । एवं **चतुस्त्रिंशत्सूत्रैः** पादोऽयं समलङ्कृतः ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) अभीष्टः योगशब्दार्थः वर्तते –

(क) संयमनम् (ख) योगः (ग) समाधिः (घ) न कोऽपि

(2) योगदर्शनस्य प्रवर्तको आचार्यः वर्तते–

(क) पतञ्जलिः (ख) व्यासः (ग) भोजः (घ) पाणिनिः

(3) योगशास्त्रे प्रतिपादितव्यूहाः सन्ति–

(क) 2 (ख) 3 (ग) 4 (घ) 5

(4) समाधिः अस्ति–

(क) द्विविधः (ख) त्रिविधः (ग) चतुर्विधः (घ) पंञ्चविधः

(5) योगशास्त्रे विभागः अस्ति–

(क) अध्यायः (ख) पादः (ग) काण्डः (घ) पर्व

(6) योगशब्दस्य प्रयोगः श्रूयते अत्र–

(क) संस्कृतवाङ्मये (ख) गीतायाम् (ग) उपनिषत्सु (घ) सर्वत्र

(7) अध्यात्मिकम्–आधिभौतिकम्–आधिदैविकमिति भेदाः सन्ति –

(क) सुखस्य (ख) संसारस्य (ग) मोक्षस्य (घ) दुःखस्य

**2. रिक्तस्थानं पूरयत ।**

(1) पतञ्जलिः .......... दर्शनस्य प्रवर्तको वर्तते ।

(2) .......... कर्मसु कौशलम् ।

(3) योगशास्त्रस्य .......... इति अपरं नामधेयमस्ति ।

(4) .......... आध्यात्मिकदुखानि ।

(5) इन्द्रियजन्यानि सांसारिकाणि तानि अपि .......... ।

(6) तृतीयपादे .......... सूत्राणि सन्ति ।

(7) यैः योगाग्निमयं शरीरमवाप्तं तेषां .......... न सम्भवन्ति ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) तपःस्वाध्यायेश्वरप्रणिधानानि | (1) दुःखमनागतम् |
| (2) वृत्तयः | (2) दुःखनिवृत्तिः |
| (3) योगः | (3) धारणा |
| (4) हेयम् | (4) चित्तवृत्तिनिरोधः |
| (5) देशबन्धश्चित्तस्य | (5) क्रियायोगः |
| | (6) पञ्च |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) योगः केषां न सिद्ध्यति ?

(2) योगशास्त्रस्य मुख्योद्देश्यं किम् ?

(3) आधिदैविकदुःखानि कानि ?

(4) असम्प्रज्ञातसमाधिः कः ?

(5) प्रथमपादस्यारम्भः कस्मात् सूत्रात् भवति ?

**5. द्वित्रिवाक्यैः उत्तरं लिखत ।**

(1) योगशास्त्रे प्रतिपादितव्यूहचतुष्टयं किम् ?

(2) योगशब्दार्थः कथं व्युत्पादितः ?

(3) तत्त्वज्ञाः कं कैवल्यं कथयन्ति ?

**6. टिप्पणीं लिखत ।**

(1) सम्प्रज्ञातसमाधिः ।

(2) असम्प्रज्ञातसमाधिः ।

(3) हेयम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) योगदर्शनस्य वैशिष्ट्यं लिखत ।

(2) समाधिपादे प्रतिपादितविषयान् साधयत ।

(3) साधन-विभूति-कैवल्यपादेषु के विषयाः प्रतिपादिताः ?

●

# ९ योगदर्शनस्य ग्रन्थकर्तॄणां परिचयः

**प्रस्तावना**

विज्ञानप्राप्त्यर्थं प्राप्तविज्ञानमस्मत्सु स्थिरत्वप्राप्त्यर्थं फलप्राप्त्यर्थञ्च श्रेष्ठम् आचार्यं गुरुम् आश्रयेत् **''तद्विज्ञानार्थं सगुरुमेवाभिगच्छेत्समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्''** इति श्रुतिवाक्यम् । तद्द्वारा अस्माकं लक्ष्यप्राप्तिः सुगमं भवति । गुरूपदिष्टवाक्येषु विश्वासः भवेत् । तैः दर्शितमार्गेषु सुलभगामिनः वयम् । तदर्थम् अस्माकं गुरवः शास्त्रकर्तारः ये ज्येष्ठाः पूज्याः सन्ति तेषां परिचयः अत्यन्तमावश्यको भवति । तेषां जीवनविधानेन देश-कालादिज्ञानद्वारा तैः ग्रथितग्रन्थपठने अस्माकं रुचिः वर्धते । तथा ग्रन्थस्य प्राशस्त्यं प्रामुख्यञ्च ग्रन्थकर्तुः परिचयात् अभिवर्धते । तस्मात् प्रस्तुतप्रकरणे वयं पतञ्जलि-महर्षिव्यास-राजाभोजस्य च परिचयान् कुर्मः ।

---

**पतञ्जलिः**



योगदर्शनस्य प्रवर्तकः महर्षिपतञ्जलिरिति प्राचीन-अर्वाचीनानां मतं वर्तते । यद्यपि योगविद्या प्रप्रथमं हिरण्यगर्भेण ऋषिभ्य उपदिष्टा । हिरण्यगर्भोक्तयोगम् आश्रित्यैव पतञ्चलिः प्रकृतयोगशास्त्रं प्रणीतवान् इति सम्प्रदायः । अत्र केचन एवं मन्यन्ते यत्, योगदर्शनस्य आद्यः प्रवक्ता भगवान् कपिल इति-प्रमाणं दर्शयन्ति यथा-

**''कपिलं प्राहुराचार्या सांख्यनिश्चितिनिश्चिताः ।**
**हिरण्यगर्भेण भगवानेष छन्दसि संस्तुतः ॥'' इति ।**

तथा अभ्युपगच्छन्ति च यत् कपिलेन प्रोक्तं योगशास्त्रमेव कालक्रमेण विस्मृतप्रायम्, दुरधिगतं पतञ्जलिमहाभागेन पुनरुज्जीवितम् । परन्तु अत्र बहवो विवदन्तः कथयन्ति यत् श्रुतौ बहुत्र योगविद्या दृश्यते यथा -

**''न तस्य रोगो न जरा न मृत्युः प्राप्तस्य योगाग्निमयं शरीरम्''** (श्वेताश्वतरोपनिषत्-अ.1, मन्त्रः 12) तस्मात् श्रुतिमूलकमेव योगशास्त्रम् इति ।

**पतञ्जलीनां वैविध्यम्** -

भारतावनिमलङ्कुर्वाणाः पतञ्जलिनामधेयाः बहवो विद्वांसः प्रादुर्बभूवुः । तेषु कतमोऽयं सूत्रकारः पतञ्जलिरिति कथनं तु दुःशकम् । तथापि पतञ्जलिप्रणेतृत्वेन प्रसिद्धाः केचन ग्रन्थसन्दर्भाः समुपलभ्यन्ते । तेषां सर्वेषां कर्ता एक एव उत भिन्नः पतञ्जलिरिति जिज्ञासा तु सुतरां भवत्येव । ते ग्रन्थाः यथा -

(1) योगसूत्रम्, (2) व्याकरणमहाभाष्यम्, (3) चरकसंहिता, (4) निदानसूत्रम्, (5) परमार्थसूत्रम्, (6) कोषः ।

''कोषकारोऽपि कश्चन पतञ्जलिरासीत् ।'' इति हेमचन्द्राचार्यप्रणीत अभिधानचिन्तामणिकोषादवगम्यते ।

**''प्रामाण्यं वासुकेर्व्याडेः व्युत्पत्तिर्धनपालतः ।**
**प्रपञ्चो वाचस्पतिप्रभृतेरिह लक्ष्यताम्''।।**

इति श्लोकेन वासुकिपदेन पतञ्जलिरेव अभिलक्षितो भवति । तथा एतेषां सर्वेषामपि ग्रन्थानां प्रणेता सर्वशास्त्रावगाहि भगवान् **'शेष'** इत्यपरनामधेयः पतञ्जलिरेव इति स्वीकारे अपरिहार्यं बाधकं किमपि नास्ति ।

**प्रणेतृनिश्चयः** -

योगदर्शनस्य व्याकरणमहाभाष्ययस्य आयुर्वेदस्य च प्रणेता किमयम् एक एव उत भिन्नः इति विचार्यमाणे सति पक्षद्वयं परिदृश्यते । तत्र एके कथयन्ति स एक एवेति । अपरे चात्र कलहायन्ते । एकत्ववादिनां पक्षे परम्परागतप्रसिद्धश्लोको वर्तते यथा -

**''योगेन चित्तस्य पदेन वाचां मलं शरीरस्य च वैद्यकेन ।**
**योऽपाकरोत्तं प्रवरं मुनीनां पतञ्जलिं प्राञ्जलिरानतोऽस्मि''** ॥

अनेन प्रमाणेन ध्वन्यते यत् शास्त्रत्रयस्य प्रणेता एक एव इति । तथा द्वादशशतकस्थितेन चरकव्याख्यातृणा चक्रपाणिनापि चरकटीकायामुट्टङ्कितम् -

**''पातञ्जलमहाभाष्य-चरकप्रतिसंस्कृतैः ।**
**मनोवाक्कायदोषाणां हन्त्रेऽहिपतये नमः''**॥

इत्यनेन श्लोकप्रमाणेनापि ग्रन्थत्रयकर्ता एक एव पतञ्जलिरिति अवगम्यते । तथा वृत्तिकारेण भोजेनापि योगव्याकरणवैद्यप्रणेतुः पतञ्जलेः एकत्वम् अभिप्रेतम् । एतावद्भिः दर्शितप्रमाणैः सुतरामुपपद्यते यत् सोऽयं योगशास्त्रव्याकरणशास्त्रवैद्यशास्त्रप्रणेता एक एवेति ।

**कालनिर्णयः -**

पतञ्जलेः कालः इदमित्थमिति वक्तुम् अशक्यो भवति । तथापि व्याकरणमहाभाष्यकारः पतञ्जलिस्तु प्राक्ख्रीस्तद्वितीयशतकस्य मध्यकालीन इति कालकोविदैः निर्धार्यते ।

**किंवदन्ती -**

पतञ्जलिमुनेः जीवनविषये काचित् कथा श्रूयते यत् महर्षिपतञ्जलिः आदिशेषस्य अवतार इति । एकस्मिन् समये कश्चनमुनिः स्वभार्यया गोणिकया सह सरोवरे स्नानमग्न आसीत् । तस्मिन् समये गोणिकायाः अञ्जलौ एकः सर्प अपतत् । तेन भीता सा गोणिका तं पप्रच्छ - **'कोर्भवान्'** ? इति । सर्पः कथयामास - 'सप्पोहम्, सप्पोहम्' इति । एतच्छ्रुत्वा सा पुनरपृच्छत् - 'रेफः क्व गतः' ? सर्पः कथयामास - 'त्वया अपहृतः' तदा निजाऽशुद्धिं ज्ञात्वा सा लज्जामनुभूय चिन्तयामास यत् अयं कश्चन महापुरुषो विद्वान् वर्तते स एव गोणीपुत्रेति प्रसिद्धः पतञ्जलिः । अञ्जल्याः पतनात् **पतञ्जलिरिति** नाम्ना प्रसिद्धः । अस्य पतञ्जलेः शब्दशास्त्रे आयुर्वेदशास्त्रे योगशास्त्रे संस्कृतवाङ्मये च महत् स्थानं वर्तते ।

**महर्षिः व्यासः -**

सम्पूर्णस्य वेदवेदानुगतसाहित्यस्य कारणभूतो महर्षिः व्यासः । स एव वेदविभाजनकर्ता, अष्टादशपुराणप्रणेता, योगशास्त्रस्य शास्ता, महाभारतस्य च रचयिता इति सर्वेषां ऐतिह्यविदाम् ऐकमत्यं वर्तते । सोऽयं महर्षिः स्वकार्यमहिम्ना गरिम्णा च पाराशर्यः, वेदव्यासः, कृष्णद्वैपायनः, सत्यवतीसुत इत्यादि नामभिः प्रथितः कीर्तितश्च । अस्य जनकः महर्षिः पराशरः जननी सत्यवती नाम्नी देवी परमविदुषी च आसीत् ।



**कालनिर्णयः -**

महर्षिव्यासः महाभारतस्य युद्धकाले आसीदिति महाभारतस्य अध्ययनात् ज्ञायते । युद्धकालविषये कालविदां भूयान् मतभेदः वर्तते । केचन ख्रीस्तशतकात् पूर्वं 1400, 1500 वर्षसम्मितं कालं निश्चिन्वन्ति । अपरे ख्रीस्तशतकात् पूर्वं त्रिसहस्र (3000) वर्षमितं कथयन्ति । परं ख्रीस्तद्वितीये तृतीये वा शतके ग्रन्थोऽयं विद्यमान आसीदिति सर्वे अङ्गी कुर्वन्ति । प्रमाणत्वेन खैस्ते 442 शतके शिलाफलके लिखितम् - **'शतसाहस्त्र्यां संहितायां वेदव्यासेनोक्तम्'** इति वचनं विनिगमकरूपेण पुरस्कुर्वन्ति । एतैः प्रमाणैः निश्चीयते वेदव्यासस्य समयः ख्रीस्तपूर्वं (442) द्विचत्वारिंशच्चतुश्शतवर्षेभ्यः पूर्वतन इति ।

**व्यासवैशिष्ट्यम् -**

सोऽयं व्यासः पराशरस्य पुत्रत्वात् पाराशरः, वेदस्य शाखानुगुणेन विभाजकत्वात् वेदव्यासः, कृष्णवर्णत्वात् कृष्णः द्विपसम्भवाच्च द्वैपायनः बदरीवनतपस्तप्तत्वात् बादरायण इत्येवं पौराणिकग्रन्थेषु विख्यातो भवति । संस्कृतसाहित्येतिहासजगति

विशालबुद्धीनां ज्ञानमयप्रदीपप्रज्वलयितृणां महर्षिव्यासमुनिपादानाम् अनन्यसाधारणं माहात्म्यं समुल्लसति । सर्वैः पूर्वतनैः कविभिः सभृशं प्रगीतं यशः –

**''अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।**
**अभाललोचनः शम्भुः भगवान् बादरायणः'' ॥**

वेदव्यासः ज्ञानबोधनायैव विकसितकमलदलसमानलोचनः ज्ञानपरम्पराविस्तारकः महामतिः विशालो वर्तते । अत एवायं लक्षश्लोकात्मकं महाभारतनामकं ज्ञानदीपं प्रज्वालयितुं समर्थो बभूव । तत्रैका प्रधानयुक्तिरपि विद्वत्समाजे प्रचलिता श्रूयते –

**'धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ !।**
**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित्' ॥**

अपरमप्येकं वैशिष्ट्यं यत् अनेन महामहिमशालिना समाजाय यथाकालं सरलं सारगर्भितञ्च ज्ञानं धर्मसाधकम्, अर्थहेतुकम्, कामसाधकम्, मोक्षसाधकञ्च वेदविस्तारकर्मभिः पुराणरचनाभिः व्यासस्मृत्या च अदायि । व्यासेन अष्टादशपुराणानां सारः श्लोकमात्रेण प्रत्यपादि यथा –

**'अष्टादशपुराणेषु व्यासस्य वचनद्वयम् ।**
**परोपकारः पुण्याय पापाय परपीडनम् ॥'**

अर्थात् सर्वेषामपि प्राणिकोटीनां भेदभावं विना उपकारकम्, पुण्यकर्म सुखस्य साधनम्, परोपकारपदाभिधेयम् । परेषां मनसा वाचा कर्मणा वा दुःखकारकम् पापकर्मेति उक्तम् । ईदृशश्रेष्ठज्ञानं जगते दत्त्वापि दुष्कर्माणि, पापाचरणानि परपीडनञ्चावलोक्य खिन्नमनाः व्यासोऽवदत् –

**''ऊर्ध्वबाहुर्विरौम्येष न च कश्चित् श्रुणोति मे ।**
**धर्मादर्थश्च कामश्च स धर्मः किन्न सेव्यते ॥''**

अनेन महात्मना योगभाष्यम्, महाभारतम्, ब्रह्मसूत्राणि, पुराणादीनि च नैकानि ग्रन्थरत्नानि प्रणीतानि ।

गुरूणामपि गुरोः महर्षेः व्यासस्य कृतज्ञतासमर्पणार्थं गुरुपूर्णिमामहोत्सवः व्यासपूर्णिमा नाम्नापि आचर्यते । व्यासमहर्षेः यशोवृत्तं गोवर्धनाचार्यवाचि यथा –

**''व्यासगिरां निर्व्यासं सारं विश्वस्य भारतं वन्दे ।**
**भूषणतयैव संज्ञां यदङ्किता भारती भाति ॥''**

**व्यासरचितग्रन्थरत्नानि –**

व्यासोच्छिष्टं जगत्सर्वमिति प्रसिद्धोक्तिः संस्कृतवाङ्मये श्रूयते । तथापि केचन प्रमुखग्रन्थाः निर्दिश्यन्ते अत्र यथा –

**(1) महाभारतम्** – बृहदाख्यानमिदं महाभारतं कौरवपाण्डवयोर्युद्धवर्णनपरम् अनेकव्याख्यानोपाख्यानगाथाभिः गुम्फितम्, धर्मार्थकाममोक्षाणां विशदविवरणात्मकं परमरमणीयं महाकाव्यं व्यासेन त्रिभिः वर्षैः निर्मितमिति महाभारतादेव अवगम्यते ।

**(2) अष्टादशपुराणानि** – ''मद्वयं भद्वयमित्या'' दि अष्टादशपुराणानि भारतीयविज्ञानधाराप्रवाहं कथोपकथाभिः उपदिशतः बोधयतश्च विराजन्ते ।

**(3) व्यासस्मृतिः** – धर्मशास्त्रस्य विस्तृतं विशदञ्च वर्णनम् अस्यां स्मृतौ लभ्यते । तस्मादियं स्मृतिः समादृता ।

**(4) योगदर्शनभाष्यम्** – पतञ्जलिना रचितयोगसूत्राणां विशदं सरलञ्च भाष्यम् अपि सुप्रसिद्धं व्यासरचितं समुपलभ्यते । अद्यापि पठनपाठने भाष्यमिदमेव अधिगच्छन्ति ।

**(5) ब्रह्मसूत्राणि** – सर्वशास्त्राणां दर्शनानाञ्च शिरोभूषणानि इमानि ब्रह्मसूत्राणि अद्वैतज्ञानबोधकानि सर्वथा सर्वसमादृतानि सन्ति ।

पौराणिकैतिह्यदर्शनेन भगवतो ज्ञानावतारः महर्षिः व्यासः अज्ञानान्धकारविनाशाय मोहमायानिरासाय ज्ञानदीपप्रज्वालनाय च भक्तजनानाम् आनन्दहेतुत्वेन अवततार ।

''नमोऽस्तु ते व्यासविशालबुद्धे
फुल्लारविन्दायतपत्रनेत्र ।
येन त्वया भारततैलपूर्णः
प्रज्वालितो ज्ञानमयः प्रदीपः ॥''



**राजाभोजः -**

संस्कृतसाहित्ये बहवः कवयो राजर्षयो महाकवयश्च वर्तन्ते । तेषु अन्यतमः धाराधिपतिः कविराजो भोजदेवोऽपरनामधेयो भोजराजः । अशोकविक्रमादित्याभ्यां परः प्रसिद्धतमः राजा भोज एवेति ऐतिहासिकानां मतम् । विक्रमादिस्य न्यायः, अशोकस्य धर्मप्रचारश्च यथा प्रसिद्धः तथैव भोजस्य साहित्यगौरवं प्रथतेतराम् ।

**कालनिर्णयः -**

भोजराजस्य समयनिर्धारणं कालकोविदैः सुस्पष्टं ख्रैस्त 11 एकादशतमशतकीय इति कथ्यते । भोजस्य अनेकानि दानपत्राणि लब्धानि सन्ति । तत्रैकं 1076 अन्यच्च 1078 विक्रमवर्षस्य वर्तते । तथा मम्मटस्य काव्यप्रकाशे कल्हणस्य राजतरङ्गिण्यां च अस्योल्लेखो लभ्यते । उव्वटः, धनपालः, धनिक इत्येते भोजस्य समकालीनाः सन्ति । प्रो. एस्. के. डे. मते अस्य समयः 1010 - 1055 ई. मध्यगतो वर्तते । डॉ. राघवन् भोजस्य राज्याभिषेकसमयं 1010 एवं मृत्युकालं 1062 ई. मनुते ।

**भोजवंशवृक्षः -**

भोजः **परमारवंशसमुत्पन्नः** राजा आसीत् । अस्य जनकः सिन्धुराजः, जननी च सावित्री, पितामहः सीयकदेवः, पितृव्यः मुञ्जः च आसन् । सीयकदेवात् मुञ्जः ततः सिन्धुराजः ततश्च भोजराज इति राज्यशासनक्रमो आसीत् । भोजस्य पत्नी लीलावती, कन्या भानुमती, पुत्रश्च जयसिंहः आसन् ।

**धर्मगुरुः -**

अयं भोजः शिवभक्त इति गणरत्नमहोदधौ उक्तत्वात् शिवसाक्षात्कारी भोज इति वर्णनेन शैवधर्मानुयायीति सिध्यति । तथा अधिकांशेन भोजग्रन्थमङ्गलानि शिवपरकाणि सन्ति । तेनाप्यस्य शैवत्वं प्राप्यते । तथा अस्य दीक्षागुरुः **उत्तुङ्गशिवः,** यः प्राचीन लाटदेशस्य कल्याणनगरीवास्तव्य आसीत् ।

**साम्राज्यं कार्याणि च -**

भोजः मालवमण्डले धारानगरस्य अधिपतिरासीत् । शिलाफलकेषु भोजराज्यं कैलासादारभ्य आमलयगिरि विस्तृतमिति प्राप्यते । स चाधुना **चेदि - कर्णाट - लाट - गुर्जर - तुष्करप्रदेशाः** कथ्यन्ते । राजाभोजेन धारानगर्यां सरस्वतीकण्ठाभरणनाम्नी पाठशाला अस्थापि । तथा स्वराज्ये अन्यराज्येषु च वापीतडागादिर्निमाणं शिवमन्दिरनिर्माणञ्च कृतम् ।

**भोजग्रन्थाः -**

भोजराजेन नैके प्रबन्धाः निबद्धाः, अयं नृपशिरोमणिः बहुशास्त्रज्ञ आसीत् । आजाद् अनुसारं भोजग्रन्थावलिः चतुरशीतिः (84), या भोजपदव्याधारिता वर्तते । तेषां विषयैः वर्गीकृताः रचनाः प्रतिपाद्यन्ते यथा--

- **काव्यशास्त्रम्** - सरस्वतीकण्ठाभरणम्, श्रृङ्गारप्रकाशः ।
- **व्याकरणम्** - सरस्वतीकण्ठाभरणम्, शब्दानुशासनम्, भर्तृहरिकारिका ।
- **आयुर्वेदः** - आयुर्वेदसर्वस्वम्, राजमृगाङ्कचरितम्, विश्रान्तिविद्याविनोदः, शालिहोत्रम् ।
- **ज्योतिषम्** - आदित्यतापसिद्धान्तः, राजमार्तण्डः, राजमृगाङ्काभरणम्, विद्वज्जनवल्लभप्रश्नज्ञानम् ।

- **शैवदर्शनम्** - सिद्धान्तसंग्रहः, तत्त्वप्रकाशः, शिवतत्त्वरत्नकलिका ।
- **वास्तुशास्त्रम्** - समराङ्गणसूत्रधारः, युक्तिकल्पतरुः ।
- **धर्मनीतिः** - चाणक्यनीतिः, चारुचर्चा, व्यवहारसमुच्चयः, विविधविद्याचतुरा, सिद्धान्तसारपद्धतिः ।
- **दर्शनम्** - योगसूत्रवृत्तिः, राजमार्त्तण्डः (वेदान्ते), द्रव्यानुयोगतर्कटीका ।

**काव्यकथाचम्पवः -**

चम्पूरामायणम्, नाममालिका (कोषः), विद्याविनोदः (काव्यम्), सुभाषितप्रबन्धः, कूर्मशतकम्, अवनिशतकम्, पारिजातमञ्जरी, श्रृङ्गारमञ्जरीकथा, कोदण्डः, अज्ञातनामप्राकृतकाव्यम् ।

भोजः बहुविधकलासम्पन्नः । संस्कृतसाहित्यजगति मणिरिव स्वग्रन्थैः विराजते इत्यत्र नास्ति संशयलवः । अस्य काव्यशैली अतीवमनोज्ञा प्रज्ञामुग्धकरी च आसीत् । सरला प्रसादगुणालङ्कृता भावगर्भिता कस्य चेतो न चमत्करोति ? उदाहरणार्थमेकं श्लोकं पश्यामः -



**'आबालवृद्धमनुगच्छति रामभद्र -**
**मेषा पुरी तदिह मा खलु निर्गुणा स्यात् ।**
**इत्यादरादिव धरा बहुधा विधाय**
**धूलिच्छलान्निजतनुं तमनु प्रतस्थे ॥'**

तथा विदुषां प्रति आदरो अत्यन्तमासीत् तद्यथा --

**'अद्य धारा सदाधारा सदालम्बा सरस्वती ।**
**पण्डिताःमण्डितास्सर्वे भोजराजे भुवङ्गते ॥**
**अद्य धारा निराधारा निरालम्बा सरस्वती ।**
**पण्डिताः खण्डितास्सर्वे भोजराजे दिवङ्गते ॥'**

**स्वाध्यायः**

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) योगदर्शनस्य प्रवर्तकः वर्तते -
(क) पतञ्जलिः (ख) व्यासः (ग) पाणिनिः (घ) भोजः

(2) पतञ्जलेः कालः वर्तते -
(क) तृतीयशतकम् (ख) द्वितीयशतकम् (ग) प्रथमशतकम् (घ) प्राख्रीस्तद्वितीयशतकम्

(3) सोऽयं व्यासः पराशरपुत्रत्वात् अस्ति -
(क) कृष्णः (ख) पाराशरः (ग) बादरायणः (घ) वेदव्यासः

(4) 'अष्टादशपुराणेषु व्यासस्य...' अस्ति -
(क) वचनत्रयम् (ख) वचनद्वयम् (ग) धर्माधर्मद्वयम् (घ) किमपि न

(5) व्यासरचितग्रन्थाः सन्ति -
(क) महाभारतम् (ख) व्यासस्मृतिः (ग) ब्रह्मसूत्राणि (घ) सर्वेऽपि

(6) धाराधिपतिः कविराजोऽस्ति अयम् -
(क) बाणभट्टः (ख) वेदव्यासः (ग) कालिदासः (घ) राजाभोजः

(7) भोजस्य आराध्यदैवं वर्तते -
(क) ब्रह्मा (ख) विष्णुः (ग) शिवः (घ) गणेशः

**2. रिक्तस्थानं पूरयत ।**

(1) प्रज्वालितो .......... प्रदीपः ।

(2) भोजः शिवभक्त इति .......... उक्तम् ।

(3) मनोवाक्कायदोषाणां हन्त्रे .......... नमः ।

(4) वेदस्य .......... वेदव्यासः ।

(5) गुरूणां गुरोः .......... महोत्सवः आचर्यते ।

(6) भोजराज्यमधुना .......... प्रदेशाः सन्ति ।

(7) पण्डिता मण्डिताः सर्वे .......... गते ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) आयुर्वेदसर्वस्वम् | (1) उत्तुङ्गशिवः |
| (2) दीक्षागुरुः | (2) चतुरशीतिः (84) |
| (3) भोजग्रन्थावलिः | (3) हेमचन्द्रः |
| (4) योगदर्शनभाष्यम् | (4) पतञ्जलिः |
| (5) चरकसंहिता | (5) महर्षिव्यासः |
| | (6) राजाभोजः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) भोजस्य समकालीनाः के ?

(2) वासुकिपदेन कः अभिलक्षितो भवति ?

(3) कृष्णद्वैपायनस्य जननी का ?

(4) महाभारतं कतिवर्षेषु लिखितम् ?

(5) गोणीपुत्र इति कस्य अभिधानम् अस्ति ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) उपकारापकारयोः भेदः कः ?

(2) भोजवंशवृक्षः कः ?

(3) पतञ्जलेः कालः कः निश्चीयते ?

**6. टिप्पणीं लिखत ।**

(1) परोपकारः पुण्याय पापाय परपीडनम् ।

(2) अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।

(3) भोजसाम्राज्यं कार्याणि च ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) व्यासस्य ज्ञानवैशारद्यं प्रतिपादयत ।

(2) भोजग्रन्थवैशिष्ट्यं व्याख्यात ।

(3) पतञ्जलेः बहुमुखप्रज्ञां प्रतिपादयत ।

# १० अष्टाङ्गयोगः

**प्रस्तावना** -

योगस्य अङ्गानि योगाङ्गानि, तानि अष्टौ सन्ति, यथा -

''**यम-नियम-आसन-प्राणायाम-प्रत्याहार-धारण-ध्यान-समाधयोऽष्टावङ्गानि**'' इति यो.सू. (2/29) ।

इमानि योगाङ्गानि सम्यगनुष्ठीयमानानि मुमुक्षूणां मोक्षसाधनत्वेन अत्यन्तम् उपकुर्वन्ति । **जातिदेशकालसमयानवच्छिन्नाः सार्वभौमा महाव्रत**मित्यस्मात् (यो.सू. 2/31) सूत्रात् उपदिष्टमस्ति यत् पञ्चयमाः एभिः जाति-देश-काल-समयैः अनवच्छिन्ना अहिंसादयः सर्वथैव परिपालनीयाः । सर्वभूमिषु सर्वविषयेषु सर्वथैव अनुष्ठीयमानं सार्वभौममहाव्रतमित्युच्यते । '**वितर्कबाधने प्रतिपक्षभावनम्**' - वितर्काः हिंसादयः, कृतकारितानुमोदिता लोभक्रोधमोहपूर्वका मृदुमध्याधिमात्रा दुःखाज्ञानान्तफला इति प्रतिपक्षभावनं करणीयमिति यमनियमयोः विशेषस्थानं प्रदत्तं महर्षिपतञ्जलिना ।

---

**यमनियमासनानि** -

**यमः** - यमयति उपरमयति इन्द्रियाणि विषयेभ्यः इति यमाः । यमादिभिः अन्तःकरणं शुद्धं भवति । ततः श्रद्धा उत्पद्यते । तया च साधनतत्परता भवति । यमस्य अनुष्ठानेन साधकः योगस्य प्रथमाङ्गस्य सिद्धिं प्राप्नोति । स च **यमः पञ्चविधः - अहिंसा-सत्यम्-अस्तेयम्-ब्रह्मचर्यम्-अपरिग्रहाः** इति ।

**अहिंसा** - न हिंसा अहिंसा । हिंसा नाम इतरप्राणिपीडनम् । तच्च मनसा वाचा कर्मणा वा येन केनचिदपि पीडनं हिंसेति कथ्यते । तद् राहित्यम् अहिंसा इत्यर्थः । सा मुमुक्षुभिरवश्यमनुष्ठेया भवति ।

अहिंसाव्रतमिदं सर्वप्रधानं भवति । यतो हि सत्यादयः यमाः अहिंसायाः फलाय एव परिपाल्यन्ते । अहिंसाव्रतं यैः अनुष्ठीयते तेषां सम्मुखे जन्मविरोधिनोऽपि सर्प नकुल, मूषक-मार्जार, गो-सिंहादयः स्ववैरभावं परित्यज्य सस्नेहं निवसन्ति । अहिंसाभ्यासात् प्रकर्षमागते सति वैरत्यागः इत्याख्या सिद्धिः सम्भवति । तत्र योगसूत्रं यथा - ''**अहिंसा प्रतिष्ठायां तत्सन्निधौ वैरत्यागः**'' (यो.सू 2/35) इति ।

**सत्यम्** - **सत्यं वाङ्गमनसोर्यथार्थत्वम्** अर्थात् यथा दृष्टं, यथा अनुमितं, यथा श्रुतं तथा वाचा मनसा पालनीयमिति अत्र आशयः । सत्याभ्यासवतः किं भवतीत्याह - सत्याभ्यासात् जायमाना सिद्धिः - ''**सत्यप्रतिष्ठायां क्रियाफलाश्रयत्वम्**'' (यो.सू. 2/36) इति । '**सत्यप्रतिष्ठायां अमोघा वाक्**' अर्थात् अमोघां सफलां वाचं वाक्शुद्धिं वाक्सिद्धिं च योगी विन्दति । यथा **धार्मिको भव** इति कथने सति धार्मिको भवति । **स्वर्गं प्राप्नुहि** इति वचनेनैव स्वर्गं प्राप्नोति ।

**अस्तेयम्** - '**परकीयद्रव्येषु अस्पृहा**' **अस्तेयम्** अर्थात् परद्रव्यं चौर्येणैव स्तेयं भवतीति न, अपि च परकीयद्रव्यापहरणस्पृहा अपि स्तेयम्, तस्मिन्नस्पृहैव अस्तेयम् । अस्तेयाभ्यासात् जायमाना सिद्धिः - ''**अस्तेयप्रतिष्ठायां सर्वरत्नोपस्थानम्**'' (यो.सू. 2/37) इति । योगी यदा अस्तेयम् अभ्यस्यति तदा अभ्यासप्रकर्षात् यद्यपि योगी न अभिलषति तथापि सर्वतः दिव्यानि रत्नानि उपतिष्ठन्ते इति अस्य अभ्यासप्रयोजनम् ।

**ब्रह्मचर्यम्** - **संयमितसर्वेन्द्रियस्य विषयस्मरणकीर्तनादिरहितस्य यमिनः उपस्थेन्द्रियसंयम एव ब्रह्मचर्यम् ।** यः ब्रह्मचर्यमभ्यस्यति तस्य निरतिशयं वीर्यसामर्थ्यमाविर्भवति अर्थात् शरीरम्, मनः, इन्द्रियाणि इत्यादि सर्वाणि तत्त्वानि वीर्यभूयिष्ठानि भवन्तीति सूत्रं यथा - ''**ब्रह्मचर्यप्रतिष्ठायां वीर्यलाभः**'' (यो.सू. 2/38) इति ।

**अपरिग्रहः** - **देहयात्राऽतिरिक्तानां योगसाधनानाम् अस्वीकरणमेव अपरिग्रहः ।** विषयाणाम् आर्जनं-रक्षणं-क्षयः-सङ्गः-हिंसादिषु दोषदर्शनात् अस्वीकरणम् अपरिग्रहः । अपरिग्रहः यदा स्थिरत्वमाप्नोति तदा जन्मान्तरविषयकं सम्यग्ज्ञानं भवति । ''**अपरिग्रहस्थैर्ये जन्मकथन्तासम्बोधः**'' (यो.सू. 2/39) इति ।

**नियमः** - मनसः इन्द्रियाणाञ्च निरोधे परमात्मनः ध्यानं सम्यक् सम्पद्यते । तेन परमात्मनः यथार्थज्ञानोत्पत्तिः भवति । तेन च परमशान्तिः लभ्यते । यमनियमपालनं समाधिसिद्धये परमोपकारकं भवति । **नियमा** अपि **पञ्चैव**- ''**शौच-सन्तोष-तप-स्वाध्याय-ईश्वरप्रणिधानानि** इति ।

**शौचम्** - शुद्धिरेव शौचम् । तच्च द्विविधम्-बाह्यशौचम्, आभ्यन्तरशौचं च । तत्र बाह्यं शौचं शरीरसम्बद्धं मृज्जलादिना क्रियमाणम् । आभ्यन्तरं च मानसम्, चित्तमलानां प्रक्षालनम् ।

**बाह्यशौचात् सिद्धिः** - ''**शौचात् स्वाङ्गजुगुप्सा परैरसंसर्गः**'' (यो.सू. 2/40) अर्थात् बाह्यशौचसिद्धौ स्वाऽङ्गेषु घृणा, परैस्सह असंसर्गः च सिद्ध्यति ।

**अन्तश्शौचात् सिद्धिः** - ''**सत्त्वशुद्धि सौमनस्यैकाग्र्येन्द्रियजयात्मदर्शनयोग्यत्वानि च**'' (यो.सू. 2/41) इति योगसूत्रम् । अर्थात् अन्तश्शौचात् शुचेः सत्त्वशुद्धिः, ततः सौमनस्यम्, तत एकाग्रता, तत इन्द्रियजयः, ततश्च आत्मदर्शनयोग्यता च सिद्ध्यति ।



**सन्तोषः** - **सन्निहितसाधनाधिकस्य अनुपादित्सा** सन्तोषः । स एव आनन्दः । '**सन्तोषादनुत्तमसुखलाभः**' (यो.सू. 2/42) अर्थात् सन्तोषात् उत्तमोत्तमसुखस्य सिद्धिः सम्भवति ।

**तपः** - शीतोष्णादि द्वन्द्वसहिष्णुता एव तपः । कृच्छ्रचान्द्रायणव्रतादीनाम् अनुष्ठानम् च । ''**कायेन्द्रियसिद्धिरशुद्धि-क्षयात्तपसः**'' (यो.सू. 2/43) अर्थात् तपसा अशुद्धेः क्षये जाते सति काय (अणिमादि) सिद्धिः, इन्द्रियसिद्धिश्च सम्भवति ।

**स्वाध्यायः** - **वेदावेदाङ्गोपनिषद्दर्शनादीनां नियमेन अध्ययनं** स्वाध्यायः । ''**स्वाध्यायादिष्टदेवतासम्प्रयोगः**'' (यो.सू. 2/44) अर्थात् स्वाध्यायनियमात् इष्टदेवतायाः सम्बन्धः सञ्जायते ।

**ईश्वरप्रणिधानम्** - विश्वेश्वरे परमगुरौ सकलकर्मफल-सन्न्यासः । ''**समाधिसिद्धिरीश्वरप्रणिधानात्**'' (यो.सू. 2/45) अर्थात् ईश्वरप्रणिधानात् समाधेः सिद्धिः भवति ।

**आसनम्** - आस्यते आस्ते वा इत्यासनम् । उपासनाय यत्किञ्चिदासनम् आवश्यकं भवति । यतो हि सजातीयवृत्तिनैरन्तर्यप्रवाहार्थं शरीरस्य इन्द्रियाणाञ्च निश्चलत्वम् अपेक्षितं भवति । तदेव आसनस्य प्रयोजनं भवति । सा उपासना न गच्छतः, न च धावतः सम्भवति । गमनेन चेतसि विक्षेपसम्भवात् । तिष्ठतः मनसः सूक्ष्मवस्तुनि एकाग्रताऽसम्भवात् उपासना सुष्ठु साधयितुं न शक्यते । अतः आसनेनैव योगी साधको वा एवंविधान् समस्तदोषान् दूरीकर्तुं प्रभवति ।

सूत्रकारेण सूत्रितं सूत्रं यथा - '**स्थिरसुखमासनम्**' (यो.सू. 2/46) इति । स्वस्वरूपे चेतसः स्थापनार्थम् आसनस्य प्राधान्यमस्ति । हठयोगग्रन्थे जीवराशीः आधारीकृत्य चतुरशीति (84) लक्षकान्यासनानि सन्तीति प्रोक्तानि । परन्तु योगदर्शने ध्यानयोगोपभूतान्यासनानि मुख्यतया चतुरशीति 84 प्रसिद्धानि सन्ति । तेषु कानिचन आसनानि यथा -- **पद्मासनम्, वीरासनम्, भद्रासनम्, स्वस्तिकासनम्, दण्डासनम्, सोपाश्रयासनम्, पर्यङ्कासनम्, क्रौञ्चनिषदनम्, हस्तिनिषदनम्, उष्ट्रनिषदनम्, स्थिरसुखम्, यथासुखम्** च इत्येवमादीनि । एतेषु आसनेषु पद्मासनस्य वैशिष्ट्यम् अधिकं विद्यते । अस्मिन् आसने आदिनम् आसप्ताहम्, आमासम्, आवत्सरञ्च स्थातुं शक्यते । यथा वाल्मीकीत्यादिमहर्षयः । पद्मासनेन सर्वाभीष्टसिद्धिः भवति ।

आसनेन विशेषप्राणायामैः सह अनुष्ठीयमानेन नाडीचक्रे तथा शरीरे विभिन्नेषु अङ्गेषु प्रसुप्ताः शक्तयः जागृताः भवन्ति । अतः योगसाधकाय आसनानि अत्यावश्यकानि भवन्ति । आसनेन शरीरं स्वस्थं भवति । चित्तं च निश्चलं जायते । यदा आसनसिद्धिः सम्भवति तदा शीतोष्णसुखदुःखादिभिः द्वन्द्वैः योगी न हन्यते इति सूत्रात् ज्ञायते यथा - '**ततो द्वन्द्वानभिघातः**' (यो.सू. 2/48) ।

**प्राणायामप्रत्याहारौ** -

**प्राणायामः** - आसनप्रतिष्ठाऽनन्तरं प्राणायामाभ्यासाय अर्हाः भवामः । प्राणायामस्य स्वरूपम् एवमुक्तम् -

''**तस्मिन्सति श्वासप्रश्वासयोः गतिविच्छेदः प्राणायामः**'' (यो.सू. 2/49) इति । बाह्यस्थवायोः नासापुटेन अन्तःप्रवेशः **(पूरकं) श्वासः** । कोष्ठस्थवायोः निस्सारणं **(रेचकं)** प्रश्वासः । तयोः रेचकपूरकयोः या स्वाभाविकी गतिः, तस्याः निरोधः प्राणायाम उच्यते । रेचक-पूरक-कुम्भकेनैव प्राणायामाभ्यासः सम्भवति । पूरको श्वासः, रेचको निःश्वासः, **कुम्भकः रेचकान्ते पूरकान्ते वा क्रियतेत्यतः सः द्विविधः** - पूरकान्ते आभ्यन्तरः, रेचकान्ते बाह्यश्च । सर्वेषां मेलकः केवलकुम्भकः कथ्यते । तत्र द्वादश-षोडश-द्वात्रिंशत्-चतुःषष्ठिमात्राभिः पूरकादयः प्राणायामा उत्तरोत्तरं प्रकृष्टाः भवन्ति ।

**स च प्राणायामः चतुष्प्रकारकः** । यथा -

**(1) पुरकः, (2) रेचकः, (3) कुम्भकः, 4) केवलकुम्भकश्चेति**

प्राणायामेन शरीरेन्द्रियाणां दोषाः दूरीभवन्ति । प्राणवायुः **त्रिषु नाडिषु** प्रवहति । ता यथा-**इडानाडी, पिङ्गलानाडी, सुषुम्नानाडी** च । अस्माकं शरीरे दक्षिणनासिकापुटे विद्यमाना नाडी इडा इति, वामनासिकापुटे विद्यमाना नाडी पिङ्गला इति, अनयोर्मध्ये विद्यमाना सुषुम्ना इति च कथ्यते ।

एतस्य प्राणवायोः सञ्चारः सार्धद्वयघटिकापर्यन्तम् इडया, ततः सार्धद्वयघटिकापर्यन्तं पिङ्गलया, पुनरिडया पुनःपिङ्गलया एवं नाडीचक्रम् अहर्निशं नाडीद्वयेनैव सञ्चरति । यदाकदाचित् सुषुम्नानाडी अपि क्षणान्तरकालः प्रचलति । एकस्यां घटिकायां षष्टिः पलानि भवन्ति । एकस्मिन् पले च षट् श्वासप्रश्वासाः भवन्ति । एवम् एकस्यां घटिकायां षष्ट्युत्तरशतत्रयम् (360) श्वासप्रश्वासाः भवन्ति । सार्धघटिकाद्वये समस्ताः श्वास-प्रश्वासाः नवशतम् (900) भवन्ति । सूर्योदयादारभ्य पुनः सूर्योदयपर्यन्तं श्वासप्रश्वासाः षट्शतोत्तरैकविंशतिः (21600) संख्याकाः भवन्ति ।

**प्राणायामफलम्** - प्राणायामेन आलस्य-मौढ्य-शारीरकदौर्बल्यादयः अन्तरायाः दूरीभवन्ति, मनोविकारशमनं च भवति । ततः प्रकाशस्य आवरणम् अपगच्छति शरीरं तेजस्वी च भवति । तत्र सूत्रं यथा - ''**ततः क्षीयते प्रकाशावरणम्**'' (यो.सू. 2/52) इति ।

**प्रत्याहारः** - शब्दादिविषयेभ्यः निवृत्तानि चक्षुरादीन्द्रियाणि चित्तस्य स्वरूपानुसरणमेव प्रत्याहारः । सूत्रयति च ''**स्वविषयासम्प्रयोगे चित्तस्य स्वरूपानुकार इवेन्द्रियाणां प्रत्याहारः**'' (यो.सू 2/55) । यथा प्रधानां मधुमक्षिकामेव अन्यमधुमक्षिका अनुसरन्ति, तथैव इन्द्रियाणि स्वतन्त्रप्रतिपत्तिं विहाय मनोऽनुकूलमेव विषयेषु प्रवर्तन्ते । **प्रत्याहारफलम्** - प्रत्याहारेण इन्द्रियजयः सिद्ध्यति ।

**धारणाध्यानसमाधयः** -

**धारणा**- '**लक्षितस्य लक्षणे चित्तस्य अचञ्चलास्थितिरेव**' धारणा । सा तु नाभिचक्रे हृदयपुण्डरीके नासिकाग्रादि देशेषु बाह्यविषयेषु वा चित्तस्य बन्धः, एकाग्रता सा एव धारणा इति उच्यते । '**देशबन्धश्चित्तस्य धारणा**' (यो.सू 3/1) । शरीरे देशबन्धः यथा--पञ्चमहाभूतेषु याः पञ्चप्रकाराः धारणाः तासु पादादाजानुपर्यन्तं **पृथिवीतत्त्वस्य** स्थानमस्ति । आजानुनाभिपर्यन्तं **जलतत्त्वस्य** स्थानम् । नाभितः हृदयपर्यन्तं **तेजस्तत्त्वस्य** स्थानम् । हृदयादाभ्रुवं **वायुतत्त्वस्य** स्थानम् । भ्रूमध्यान्मूर्धपर्यन्तम् **आकाशतत्त्वस्य** च स्थानं भवति ।

यः योगी पञ्चमहाभूतानां निर्दिष्ट-स्थानेषु धारणां करोति स तानि विजित्य दीर्घजीवी भवति ।



**ध्यानम्** - हृदयादिदेशेषु ध्येयालम्बनस्य वृत्तेः एकतानता, सजातीयवृत्तिनैरन्तर्यप्रवाहः ध्यानम् । **'तत्र प्रत्ययैकतानता ध्यानम्'** (यो.सू 3/2) इति ।

**समाधिः** - अष्टाङ्गयोगस्य अन्तिमं परममहत्त्वपूर्णम् अङ्गं वर्तते समाधिः । यतो हि एतावता योगाभ्यासः त्रिपुटिसहितेन प्रचलितः । समाधिस्तु त्रिपुटिराहित्यस्थितिरिति कथ्यते । सम्यग् आधीयते मनः यत्र सः **समाधिः** । यदा मनः स्वस्वरूपं परित्यज्य सर्वसङ्कल्परहितं सत् केवलं ध्येयवस्तुरूपे अवतिष्ठते स समाधिरिति भण्यते । सूत्रं यथा-- **'तदेवार्थमात्रनिर्भासं स्वरूपशून्यमिव समाधिः'** (यो.सू 3/3) इति । **स च द्विविधः** - 1. सम्प्रज्ञातसमाधिः 2. असम्प्रज्ञातसमाधिश्च इति ।

**(1) सम्प्रज्ञातसमाधिः** - तत्र सम्प्रज्ञातसमाधिर्नाम यत्र ध्यातृ-ध्यान-ध्येयानां पृथक् पृथक् प्रतिभासः स सम्प्रज्ञात-समाधिः । अयमेव सविकल्पसमाधिः वा सबीजसमाधिरिति उच्यते ।

**(2) असम्प्रज्ञातसमाधिः** - असम्प्रज्ञातसमाधिर्नाम यत्र ध्यातृ-ध्यानक्रिययोः प्रतिभासो न भवति, अपि तु ध्येयाकार एक एव वृत्तिर्भवति स असम्प्रज्ञातसमाधिः । अयमेव निर्विकल्पसमाधिः वा निर्बीजसमाधिश्चेति कथ्यते ।

**उपसंहारः** - अष्टाङ्गेषु प्रथमपञ्चसोपानानि यम-नियम-आसन-प्राणायाम-प्रत्याहारः बाह्यविषयकचित्तवृत्तिनिरोधकत्वात् बहिरङ्गयोग इत्युच्यते । धारणा-ध्यान-समाधयः अन्तरङ्गसाधनानि इति हेतोः अन्तरङ्गयोग इत्यभिधीयते । अष्टाङ्गयोगप्रक्रिया योगशास्त्रे हृदयमिव प्रधानमङ्गं भूत्वा हृदयङ्गमं राजते । एषा अन्यशास्त्रेषु अदृष्टा अपूर्वा प्रक्रिया योगशास्त्रे राराजते ।

**''सरित्पतौ निविष्टाम्बु यथा भिन्नं लयं त्वियात् ।**
**तथा भिन्नं मनस्तत्र समाधिं समवाप्नुयात् ॥''**




**स्वाध्यायः**

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) योगस्य अङ्गानि सन्ति -

(क) पञ्च (ख) षड् (ग) सप्त (घ) अष्टौ

(2) योगदर्शने प्राणायामभेदाः सन्ति -

(क) 5 (ख) 4 (ग) 7 (घ) 8

(3) शीतोष्णद्वन्द्वसहिष्णुता एव -

(क) तपः (ख) सन्तोषः (ग) समाधिः (घ) शौचम्

(4) अहिंसाप्रतिष्ठायां तत्सन्निधौ -

(क) वैरम् (ख) वैरत्यागः (ग) हिंसा (घ) अहिंसा

(5) सन्निहितसाधनाधिकस्य अनुपादित्सा -

(क) अहिंसा (ख) सन्तोषः (ग) शौचम् (घ) अस्तेयम्

(6) सजातीयवृत्तिनैरन्तर्यप्रवाहः वर्तते -

(क) ध्यानम् (ख) समाधिः (ग) प्राणायामः (घ) आसनम्

(7) नियमाः सन्ति -

(क) दश (ख) अष्टौ (ग) नव (घ) पञ्च

**2. रिक्तस्थानं पूरयत ।**

(1) यमादिभिः .......... शुद्धं भवति ।

(2) .......... वाङ्मनसोर्यथार्थत्वम् ।

(3) परकीयद्रव्याऽस्पृहा .......... ।

(4) वेदवेदाङ्गोपनिषद्दर्शनादीनां नियमेन अध्ययनम् .......... ।

(5) योगसाधकाय .......... अत्यावश्यकानि भवन्ति ।

(6) अष्टाङ्गयोगप्रक्रिया योगशास्त्रे .......... इव प्रधानमङ्गं भवति ।

(7) प्रत्याहारेण .......... सिद्ध्यति ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) स्वाध्यायात् | (1) अमोघा वाक् |
| (2) अहिंसाप्रतिष्ठायाम् | (2) आसनम् |
| (3) सत्यप्रतिष्ठायाम् | (3) समाधिः |
| (4) स्थिरसुखम् | (4) चित्तवृत्तिनिरोधः |
| (5) स्वरूपशून्यमिव | (5) वैरत्यागः |
| | (6) इष्टदेवतासम्प्रयोगः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) सर्वभूमिषु सर्वथैव अनुष्ठीयमानं किमुच्यते ?

(2) सूर्योदयादारभ्य पुनः सूर्योदयपर्यन्तं श्वास-प्रश्वाससंख्या का ?

(3) मनसा वाचा कर्मणा वा प्राणिपीडनं किमुच्यते ?

(4) ब्रह्मचर्यप्रतिष्ठायां कस्य लाभः ?

(5) अस्तेयसिद्धेः फलं किम् ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) सत्यप्रतिष्ठायां प्रयोजनानि कानि ?

(2) अहिंसा का ?

(3) अपरिग्रहः नाम किम् ?

**6. टिप्पणीं लिखत ।**

(1) ईश्वरप्रणिधानात् ।

(2) प्रत्याहारः ।

(3) समाधिः ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) आसनवैशिष्ट्यं सविस्तरं प्रतिपादयत ।

(2) प्राणायामप्राशस्त्यं व्याख्यात ।

(3) अष्टाङ्गेषु यमाङ्गस्य लक्षणभेदस्वरूपं लिखत ।

●

# ११ तत्त्वविभागः पञ्चकर्मस्वरूपञ्च

**प्रस्तावना -**

योगदर्शने सांख्यदर्शने प्रतिपादित-पञ्चविंशतितत्त्वानि एव याथातथ्येन अङ्गीकृतानि । ततः पञ्चविंशतितत्त्वेभ्यः परं पुरुषविशेषम् ईश्वरं षड्विंशतितत्त्वरूपेण अङ्गीकरोति । तानि तत्त्वानि क्रमशः यथा --

(1) मूलप्रकृतिः (प्रधानम्), (2) पुरुषः, (3) महत् (बुद्धिः), (4) अस्मिता (अहङ्कारः), (5) पञ्चतन्मात्राणि (शब्दस्पर्शरूपरसगन्धाः), 10. एकादशेन्द्रियाणि (घ्राण-रसन-चक्षु-श्रोत्र-त्वक्-वाक्-पाणि-पाद-पायु-उपस्थ-मनांसि), 21. पञ्चमहाभूतानि (पृथिव्यप्तेजोवाय्वाकाशानि), 26. ईश्वरश्चेति ।

---

**ईश्वरः**

↓

↓

मूलप्रकृतिः (प्रधानम्)          पुरुषः

↓

महत् (बुद्धिः)

↓

अस्मिता (अहङ्कारः)   →   (5) पञ्चतन्मात्राणि

↓          ↓

(11) एकादशेन्द्रियाणि          (5) पञ्चमहाभूतानि

योगदर्शनं मुख्यतया तत्त्वत्रयं विचारयति । तानि ईश्वरो जीवः प्रकृतिश्चेति । त्रिगुणात्मिका जडत्वादिगुणवती नानाविधपरिणामशालिनी संसारकारणभूता प्रकृतिः वर्तते । यः जीवधर्माधर्मयोर्व्यवस्थां करोति, अपि च सर्वज्ञः, पुरुषविशेषः सः ईश्वरः । किञ्चिज्ज्ञविशिष्टः पुरुष एव जीवः ।

**योगदर्शनस्य सेश्वरत्वम् -**

सांख्यमताङ्गीकृतयोः प्रकृतिपुरुषयोः भिन्नः एकः सर्वज्ञः पुरुषविशेषः ईश्वरो विद्यते । यथा सूत्रम् - ''**क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषः ईश्वरः**'' (यो.सू. 1/23) । अविद्यादि क्लेशरहितः शुभाशुभकर्मफलसञ्चितराशिभिः असंस्पृष्टः, देशकालातीतः, सर्वशक्तिमान्, परिपूर्णः, विशेषपुरुषः ईश्वरः वर्तते । सः '**प्रणव**' शब्देन वाच्यः भवति । स च ईश्वरः ब्रह्म-विष्णु-शिवेभ्यः भिन्नः विराजते । ''**तज्जपस्तदर्थभावनम्**'' (यो.सू. 1/28) साधकः एकाग्रतासिद्धये प्रणववाच्य ईश्वरस्य पौनःपुन्येन जपप्रक्रियां कुर्वतः तस्य रूपं भावयतश्च तत्सिद्धिं लभते ।

यथा मुक्तस्य पूर्वा बन्धकोटिः प्रज्ञायते नैवमीश्वरस्य । यथा वा प्रकृतिलीनस्योत्तरा बन्धकोटिः सम्भाव्यते नैवम् ईश्वरस्य । स तु सदैव मुक्तः, सदैव ईश्वर इति । स च ईश्वरः ''**सपूर्वेषामपि गुरुः कालेनाऽनवच्छेदात्**'' (यो.सू 1/26) इति ईश्वरस्वरूपं स्फुटं जीवभिन्नत्वेन वेदव्यासेन भाष्ये प्रपञ्चितम् ।

वस्तुतः सांख्ययोगयोः न सैद्धान्तिको भेदः वर्तते । यथा सांख्यैः पञ्चविंशतित्त्वानि अभिमतानि तथैव यौगिकैरपि अभिमतानि । किन्तु पञ्चविंशतितत्त्वेभ्यः भिन्नम् एकम् ईश्वरतत्त्वमङ्गीकृतत्वात् अस्य दर्शनस्य सेश्वरसांख्यदर्शनमिति नामधेयं वर्तते । किन्तु अनयोः साधनप्रक्रिया नितरां भिन्ना विद्यते ।

श्रुतिप्रतिपादितम् ईश्वरम् अनभिलक्ष्य सांख्यैः स्वशास्त्रं प्रतिपादितम् । सांख्यशास्त्रे उल्लेखित उचितविषयान् उद्धृत्य निजशास्त्रे तदतिरिक्त निगमनिगदितम् ''**द्यावाभूमिं जनयन् देव एकः विश्वस्य कर्ता, भुवनस्य गोप्ता**'' इति ईश्वरमपि चूडामणिरिव अलङ्कृतवान् पतञ्जलिः । अत एव पातञ्जलस्य सेश्वरसांख्यमिति स्पष्टम् ।

यस्मात् सांख्यशास्त्रसिद्धान्तान् अदूषयित्वा स्वशास्त्रे विभूषितवान् तस्मादपि इदं सेश्वरसांख्यदर्शनमिति प्रसिद्धम् । एवं प्रकृतिपुरुषयोः संयोगवियोगयोः कारणमपि किञ्चित्स्यादेव । तत्कारणं न केवलं जीवस्य कर्मविपाकः अपि तु ईश्वरोऽपीति सेश्वरसांख्याः ।

**पञ्चकर्मस्वरूपम्** -

**''शरीरमाद्यं खलु धर्मसाधनम्''** इति धर्मादि चतुर्विधपुरुषार्थसाधनीभूतं शरीरमेव मुख्यमिति सर्वैरभिमन्यते । अत एव आयुर्वेदम् अथर्ववेदस्य उपवेदत्वेन प्रथितं लोके । आरोग्यमेव महाभाग्यमिति लोकोक्तिरपि सर्वत्र प्रसिद्धा । अस्मद् वैद्यविधानम् अन्य वैद्यविधानेभ्यः युनानी, पाश्चात्यवैद्यविधानेभ्यः च पृथक्तया प्रतिभाति । सम्भावितानां रोगविनाशने अन्यानि वैद्यशास्त्राणि प्रवृत्तानि । भारतीयानां भिषक् भैषज्यविधानं तु न केवलं सञ्जनितरोगानां विषये अपि तु अनागतरोगानपि निवारयितुं प्रवर्तते । अङ्कुरितरोगानां निवारणाय अलम् अल्पप्रयत्नेन ।

भैषज्येन न केवलं रोगनिवारणम् अपि च भैषज्यकर्मेतरक्रियाकलापैरपि रोगनिवारणं भवतीति, अस्मिन् विषये एव पञ्चकर्मप्रक्रिया प्राधान्यमवाप्ता । पञ्चकर्मवैद्यविधानम् अनागतरोगान् निरोधयति । अङ्कुरितरोगान् अल्पयत्नेन विनाशयति । प्रबलीभूतरोगान् अपि आमूलतया उत्खनयति । शरीरस्थ रोगनिवारणाय मार्गद्वयं दर्शितमस्ति । तत् --

**( 1 ) शमनम् ( 2 ) शोधनम्** इति ।

**( 1 ) शमनम्** - मिताहारविहारेण च प्रकोपितवातादि दोषाऽपाकरणम् । तत्तद्रोगानुगुणम् औषधसेवनेन तदनुकूलरोगशान्तिरपि शमनमिति कथ्यते । अनेन औषधसेवनेन रोगस्य निवारणं सम्पूर्णतया न जायते । अतः द्वितीयप्रक्रियां शोधनप्रक्रियाम् अवलम्बितवन्तः ।

**( 2 ) शोधनम्** - औषधैरनिष्कासितरोगान् विशिष्टचिकित्सापद्धत्या आमूलात् शरीरस्थदोषान् शोधयित्वा बहिः निष्कासनमेव शोधनमिति कथ्यते । एतासु शोधनप्रक्रियासु पञ्चकर्मप्रक्रियायाः स्थानं विशिष्टं वर्तते । अनया प्रक्रियया देहस्थवात-पित्त-दोषान् दूरीकर्तुं शक्यते ।

अस्माकं पूर्ववैद्यविदैः चरकवाग्भटादिभिः शरीरं स्वस्थीकर्तुं वात-पित्त-कफदोषान् शरीरात् बहिः निष्कासनमेव निवारणम् इति सूचितम् । तथा अस्माकं भारतस्य वैद्यविधानमपि दोषत्रयनिवारणार्थमेव प्रवृत्तम् ।

वस्तुतः दोषत्रयमेव अनारोग्यकारणं भवति । अनारोग्यं नाम पित्तादिप्रकोपनम् । प्रकोपनमित्युक्ते अतिशयः । अर्थात् यावद् परिमाणं वातपित्तादिकं भवेत् तावदतिरिच्य यदि भवति तर्हि अनारोग्यहेतुः भवति । तत्साम्यावस्था एव आरोग्यम् । देहे कफादीनां स्थानानि यथा-




- **कफस्थानम्-नासिकारन्ध्रे कपालमाश्रित्य भवति ।**
- **पित्तम्-अन्ननालिकपार्श्वस्थ पित्तकोष्ठे पित्तमवतिष्ठति ।**
- **वातः-मूलाधारस्थाने मूलवातः तिष्ठति ।**

प्रकोपितवात-पित्त-कफदोषान् परिहर्तुं पञ्चकर्मप्रक्रिया प्रवर्तते । पञ्चकर्मप्रक्रियायाः पूर्वं पूर्वकर्मप्रक्रिया आचरणीया भवति । तत्र प्रक्रियाद्वयं भवति ।

**( 1 ) स्नेहनक्रिया ( 2 ) श्वेदनक्रिया** च ।

**( 1 ) स्नेहनक्रिया यथा** - गोघृतेन तिलतैलेन आपादतलमस्तकं लेपयित्वा सूर्याभिमूखीभूत्वा पौनःपुन्येन मर्दनक्रिया एव स्नेहनक्रिया इति कथ्यते ।

**( 2 ) श्वेदनक्रिया यथा** - सुतप्तं सलिलं कलशे संस्थाप्य तत्पार्श्वे उपविश्य सकलशेन पुरुषं कम्बलेन आच्छाद नीयम् । सुतप्तसलिलेन उत्पन्नम् उष्णं वाष्पं शरीरं प्रतप्य श्वेदबिन्दून् उत्पादयति । आभ्याम् उभाभ्याम् स्नेहन-स्वेदनप्रक्रियाभ्यां शरीरं मृदुत्वम् आप्नोति । शरीरस्थ धमनशिराः स्वानुकूलाः भवन्ति । कटिबन्ध-मणिबन्धादयः सरलाः भवन्ति । इतः परं क्रियामाणानां पञ्चकर्मणाम् आनुकूल्यं भविष्यति । तथा असहजरूपेण क्रियमाणपञ्चकर्मप्रक्रियायां वैषम्यदोषान् दूरीकर्तुं पूर्वकर्म सहकारि भवति ।

**वमनविरेचनबस्तिनस्यरक्तमोक्षणानि** -

अधुना पञ्चकर्माणि प्रत्येकशः विचारयामः । तत्र पञ्चकर्माणि यथा -

**(1) वमनम्, (2) विरेचनम्, (3) बस्तिः, (4) नस्यम्, (5) रक्तमोक्षणम्** इति ।

**वमनम्** - सैन्धवनिम्बफलरसयुतं कोष्णं जलम् आकण्ठं पीत्वा, कञ्चित् कालं स्थित्वा, श्रोत्रद्वयं पिधाय, किञ्चिद्विनम्य मुखमार्गेण सावधानतया सलिलनिष्कासनकर्मैव वमनमित्युच्यते । इतोऽपि अनेकौषधयुक्तजलपानैरपि वमनकर्म क्रियते । मदनफलं चूर्णीकृत्य जले क्वथयित्वा कषायसेवनेनापि वमनकर्म क्रियते । ''**वमनद्रव्याणां मदनफलानि श्रेष्ठतमानि आचक्षते अनपायित्वात्**'' (च.सू 1/13) इति ।

**प्रयोजनम्** - मन्दाग्निः, अरुचिः, पित्तोज्जृम्भणम् (ACIDITY), शरीरस्य उष्णत्वम्, इत्यादि रोगाः निवृत्ताः भवन्ति । पित्तस्य शान्तिः भवति ।

**विरेचनम्** - पुरीषस्य उत्सर्जनमेव विरेचनमित्युच्यते । अस्यां प्रक्रियायां न केवलं पुरीषस्य (मलस्य) उत्सर्जनम् अपि तु सम्पूर्णमलाशयस्य पूर्णतया शुद्धीकरणमेव विरेचनमिति कथ्यते । तच्च द्विविधम् । (1) मुखेन सेवित द्रवादिकानां पायुमार्गेण विसर्जनं प्रथमम् (2) पायुमार्गेण प्रेषित द्रवादिकानां पुनः पायुमार्गेणैव विसर्जनं द्वितीयम् ।

तत्र **प्रथमम्,** गोक्षीरे एरण्डतैलं मेलयित्वा मुखमार्गेण सेवनं कृत्वा होरात्मककालं स्थीयते तर्हि सर्वमुदरं मलाशयमपि पूर्णतया शुद्धं भवति । अथवा पञ्चसकारादिचूर्णं मन्दोष्णजले सम्मील्य मुखेन सेवनं कृत्वा कञ्चित्कालानन्तरम् उदरं मलाशयमपि शुद्धं भवति । एवमेव अन्याः काश्चनक्रियाः विरेचने उपयुज्यन्ते । '**सर्वरोगाणां मूलकारणं मलम्**' इति आर्योक्तिः प्रसिद्धा । मलाशयशुद्धीकरणेन सर्वरोगनिवारणं भवति ।

तत्र **द्वितीयम्,** पायुमार्गेण कदुष्णजलं पात्रविशेषैः नालद्वारेण मलाशयं प्रापयित्वा क्रियमाणा प्रक्रिया एव द्वितीया विरेचनप्रक्रिया । इयं प्रक्रिया तावन्न सर्वैरवलम्बनीयमिति अस्मद्भिषजामभिमतम् । किन्तु केवलं वृद्धानां, शरीरदौर्बल्ययुक्तानां, प्रबलरोगग्रस्तानां, बालकानाञ्च कृते प्रोक्ता वर्तते । एषा प्रक्रिया असहजप्रक्रिया इति कथ्यते । प्रक्रियामिमामेव योगशास्त्रे घेरण्डसंहिता-हठयोगप्रदीपिकादि ग्रन्थेषु **मातङ्गमुद्रेति** नाम्ना अभिहितवन्तः । मतङ्ग इत्युक्ते गजः । यदा गजः मलबद्धकेन पीडितो भवति तदा प्रवहन्तीं नदीं प्रविश्य शरीरं निमज्य पायुमार्गेण संकोच-विकोचप्रक्रियया जलं गृहीत्वा पुनः तेनैव मार्गेण सजलमलं विसृज्य मलाशयं शुद्धं कुरुते । तामेव प्रक्रियां केचन योगिनः अरण्यवासिनः अलभ्यमौषधकारणेन मातङ्गमुद्रामवलम्ब्य रोगनिवारणं कुर्वन्ति स्म । इमां प्रक्रियामेव एनेमा (ENEMA) इति पाश्चात्याः कथयन्ति । एषा विरेचनप्रक्रिया वातदोषशमने मुख्यप्रक्रिया वर्तते ।

**प्रयोजनम्** - मूलरोगः, मलबद्धकम्, आलस्यम्, जाड्यम्, वातप्रकोपम्, अजीर्णम्, हृदयस्पन्दनबन्धनम्, अशक्तता, तन्द्रावस्था, अतिनिद्रा इत्यादयः रोगाः निवृत्ताः भवन्ति । एतानि विरेचनकर्मणः प्रयोजनानि ।

**बस्तिः** - वसति मूत्रादिकम् अत्र इति बस्तिः । मूत्राशयस्य पर्यायवाची शब्दः बस्तिः । मूत्राशयस्य शुद्धीकरणम् अनया प्रक्रियया सम्पाद्यते । केनचित् नालीमार्गेन लोहविशेषेण सरन्ध्रयुक्तशलाकां उपस्थमार्गेन बस्तिं प्रापयित्वा तच्छिद्रेण औषधविशेषघृतादि स्निग्धपदार्थान् प्रेषयित्वा बस्तिं शुद्धं कुर्वन्ति । इयं प्रक्रिया केवलं भिषजैरेव सम्पाद्यमाना वर्तते । न तु स्वतन्त्रप्रक्रिया अस्ति । इदं बस्तिकर्मैव घेरण्डसंहिता-हठयोगादिग्रन्थेषु '**वज्रोलिप्रक्रिया**' इति नाम्ना प्रसिद्धा । ते योगिनः उपस्थेन्द्रियनिग्रहणार्थं कुर्वन्ति । भिषजस्तु बस्तिगतरोगान् निवारयितुं कुर्वन्ति । एषा वातदोषशमने गौणप्रक्रिया वर्तते ।

**प्रयोजनम्** - भगन्दरव्याधिः, अतिमूत्रव्याधिः, मूत्रशूली, मधुमेहः, पाषाणीकरणव्याधिः (Kidney Stone) इत्यादि रोगानां निवारणं भवति ।

''**भूरिठा इति ख्यातः, अरिष्टो बस्तिकर्म्माढ्यो वेणीरः फेनिलः क्षूणः**'' इति शब्दचन्द्रिकायाम् ।

**नस्यम्** - नासिकायै हितं नस्यम् । नासिकाद्वारा दीयमानम् औषधविशेषमेव नस्यम् । नासिकायाः पृष्ठभागे कपालमावृत्य कफः तिष्ठति । प्रकोपितकफं शमयितुं नस्यप्रक्रिया प्रारभ्यते । नस्यानि अनेकविधानि प्रसिद्धानि । अनेकान्यौषधानि जले दशांशपर्यन्तं सम्यक्क्वथयित्वा तदवशिष्टजलम् इडापिङ्गलनालिकयोः बिन्दुरूपेण परिवर्त्य अभिप्राशयति । इत्थमेव कटुकषायादि औषधानि तिल-घृत-स्निग्धद्रव्येषु किञ्चित्समयम् उष्णीकृत्य अनन्तरं किञ्चिदुष्णावशिष्ट औषधयुततैलघृतादीन् पूर्ववत् अभिप्राशयति । इयं प्रक्रिया योगशास्त्रे सूत्रनेति, जलनेतिरूपेण प्रतिभाति । नस्यप्रक्रियाद्वारा प्रवर्धितकपालस्थकफनिवारणं भवति । इदमेव मुख्यं प्रयोजनम् । कफादिकेन सञ्जनिताः समस्तरोगाः शान्ताः भवन्ति । होरहोरात्मकप्रचलितश्वास-प्रश्वासयोः नैरन्तर्यप्रक्रिया अविरुद्धेन प्रचलति ।

**प्रयोजनम्** - आंशिकपक्षघातः विभिन्नकारणेभ्यः उत्पद्यमाना शिरोवेदना, गन्धग्रहणे न्यूनता इत्यादयः रोगाः निर्गच्छन्ति ।

नस्यमुद्दिश्य कश्चन श्लोकः प्रस्तूयते --

''**तीक्ष्णभेषजसिद्धैर्वा स्नेहैः क्वाथै रसैस्तथा ।**
**नासिकारन्ध्रयोरष्टौ षड्चत्वारश्च बिन्दवः ॥**'' इति ।

**रक्तमोक्षणम्** – शरीरे दूषितरक्तमोचनमेव रक्तमोक्षणम् । इयं प्रक्रिया सर्वेभ्यः नोपदिश्यते वैद्यविद्भिः । येषां केषाञ्चिदेव इयं प्रक्रिया वैद्यविदः स्वसम्मुखे एव कुर्वन्ति । वैद्यानुपस्थितौ अविधेया प्रक्रिया एषा । औषधशास्त्रे रक्तशोधनप्रक्रिया अनेकधा उक्ता । खदिरारिष्टसेवनेन रक्तशुद्धिः भवति । मधुनिम्बरसयुक्तजलं पीत्वा पञ्च वा षड्दिनानि लङ्घनं कृत्वापि रक्तं शुद्धीकर्तुं शक्यते । तथा तत्तत्प्रदेशेषु जलौकैरपि दूषितरक्तं निष्कासयन्ति । एषा पद्धतिः अतिप्राचीनकालात् प्रचलन्ती अस्ति ।

अद्यतनकाले रक्तमोचनप्रक्रिया आभास इव प्रतिभाति । केचन वैद्याः रक्तमोचनप्रक्रियां न कारयन्ति । पूर्वं शस्त्रचिकित्सायाः बहुत्र अप्राप्तेरिदं रक्तमोक्षणं कुर्वन्ति स्म । वर्तमाने तु शस्त्रचिकित्सायाः सर्वत्र उपलभ्यमानत्वात् पञ्चकर्मोक्त रक्तमोक्षणकर्म पृथगभूत् ।

**प्रयोजनम्** – कण्डूतिः, स्फोटकाः, व्रणानि, श्वेतकुष्ठुः, पाण्डुरोगः, चर्मसम्बन्धिनः समस्तरोगा अदृश्या भवन्ति ।

**उपसंहार** – उपर्युक्त पञ्चकर्मविधानपरिसमाप्त्यनन्तरं मनुष्यः यथापूर्वम् आहारविहारादिकं नैव कर्तव्यम् । अल्पाहारः अल्पघृतसहितेन समतिक्त-लवण-कटु-मधुरादियुत्त आहार एव सेवनीयः । किं बहुना हितमितममेद्यम् आहार निसेवनीयः इति ।




## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) योगदर्शने तत्त्वानि सन्ति –

(क) 25 (ख) 26 (ग) 11 (घ) 5

(2) सेश्वरसांख्यदर्शनमस्ति –

(क) न्यायः (ख) सांख्यम् (ग) मीमांसा (घ) योगः

(3) अथर्ववेदस्य उपवेदः अस्ति –

(क) धनुर्वेदः (ख) गान्धर्ववेदः (ग) आयुर्वेदः (घ) स्थापत्यवेदः

(4) शरीरस्थदोषान् शोधयित्वा बहिर्निष्कासनम् –

(क) शोधनम् (ख) शमनम् (ग) स्नेहनम् (घ) श्वेदनम्

(5) पञ्चकर्मसु अन्तर्गतं नास्ति –

(क) वमनम् (ख) नस्यम् (ग) रक्तमोक्षणम् (घ) श्वेदनम्

(6) योगिभिः उपस्थेन्द्रियनिग्रहणार्थम् इदं कर्म क्रियते –

(क) बस्ति (ख) नस्यम् (ग) वमनम् (घ) ध्यानम्

(7) रक्तशुद्धिरनेन सिद्ध्यति –

(क) खदिरारिष्टसेवनेन (ख) मधुनिम्बरसयुक्तजलपानेन

(ग) जलौकैः (घ) सर्वैः

**2. रिक्तस्थानं पूरयत ।**

(1) क्लेशकर्मविपाकाशयैरपरामृष्टः .......... ईश्वरः ।

(2) .......... पुरुष एव जीवः ।

(3) पञ्चकर्मवैद्यविधानं .......... निरोधयति ।

(4) .......... अनारोग्यकारणं भवति ।

(5) विरेचनप्रक्रिया .......... शमने मुख्यप्रक्रिया भवति ।

(6) ईश्वरः .......... शब्देन वाच्यः भवति ।

(7) वमनद्रव्याणां .......... श्रेष्ठतमानि आचक्षते ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) पुरुषविशेषः | (1) त्रयः |
| (2) दोषाः | (2) षड्विंशतिः |
| (3) कर्माणि | (3) एकादश |
| (4) तत्त्वानि | (4) ईश्वरः |
| (5) इन्द्रियाणि | (5) पञ्चविंशतिः |
| | (6) पञ्च |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) बस्तिक्रियायाः नामान्तरं किम् ?

(2) नासिकायै हितं किम् ?

(3) पित्तं कुत्र अवतिष्ठति ?

(4) विरेचनकर्म घेरण्डसंहितायां केन नाम्ना अभिहितम् ?

(5) पञ्चमहाभूतानि कानि ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) शमनप्रक्रिया का वर्तते ?

(2) श्वेदनकर्म कथं सम्पाद्यते ?

(3) षड्विंशतितत्त्वानि कानि ?

**6. टिप्पणीं लिखत ।**

(1) वमनम् । (2) बस्ति । (3) नस्यम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) सेश्वरसांख्यदर्शनं सविस्तरं निरूपयत ।

(2) पञ्चकर्मवैशिष्ट्यं प्रतिपादयत ।

(3) विरेचनकर्मणः स्वरूपप्रयोजनानि व्याख्यायत ।

●

# १२ पातञ्जलयोगसूत्रस्य प्रथमपादः-१ ( सू. १-२५ )

**प्रस्तावना** -

**'युजिर्'** - योगे इति धातोः निष्पन्नोऽयं योगशब्दः समाधिसूचकोऽस्ति । भारतीयदर्शनपरम्परायां समाधिः ईश्वरप्राप्तिर्वा मानवस्य चरमं लक्ष्यमस्तीति सर्वेऽपि आमनन्ति । तत्कथं प्राप्यते ? के उपायाः ? इत्यादिप्रश्नानाम् उत्तरमस्ति योगशास्त्रे । पाठेऽस्मिन् पातञ्जलयोगसूत्रस्य प्रथमपादस्य आदितः पञ्चविंशतिसूत्राणि वर्तन्ते । तत्र एतेषामेव पूर्वोक्तानां प्रश्नानाम् उत्तरं प्राप्यते ।

---

**(1) अथ योगानुशासनम् ॥**

**सरलार्थः** - अस्मिन् सूत्रे **'अथ'** शब्दः अधिकारद्योतकः, आरम्भार्थकः, मङ्गलार्थकश्च । **'युज - समाधौ'** अनुशिष्यते व्याख्यायते लक्षणभेद उपायफलैः येन तदनुशासनम् । योगस्य अनुशासनं योगानुशासनम् । अनेन सूत्रेण अस्य शास्त्रस्य अधिकारि-विषय-सम्बन्ध-प्रयोजनानि व्याख्यायन्ते ।

**अधिकारी** - योगशास्त्रविषये जिज्ञासुः ।

**विषयः** - योग एव ।

**सम्बन्धः** - उपायोपेयभावसम्बन्धः साध्यसाधनभावश्च ।

**प्रयोजनम्** - कैवल्यप्राप्तिः ।

**(2) योगश्चित्तवृत्तिनिरोधः ॥**

**सरलार्थः** - चित्तस्य प्रमाणविपर्ययविकल्पनिद्रास्मृतिरूपाः समस्तवृत्तयः, तासां निरोधो निवर्तनं योग इत्यर्थः । चित्तस्य निर्मलसत्त्वपरिणामरूपस्य या वृत्तयः अङ्गाङ्गिभावपरिणामरूपाः तासां निरोधो बहिर्मुखतया प्रतिलोमपरिणामेन स्वकारणे लयो योग इति ।

**(3) तदा द्रष्टुः स्वरूपेऽवस्थानम् ॥**

**सरलार्थः** - यदा चित्तस्य शान्तघोरमूढरूपाणां प्रमाणादीनां सर्वासां वृत्तीनां निरोधः जायते, तदा द्रष्टुः जीवात्मनः पुरुषस्य स्वस्य स्वरूपे चिन्मात्ररूपतायाम् अवस्थानं स्थितिर्भवति । अर्थात् सर्वासां चित्तवृत्तीनां निरोधे जाते सति पुरुषः स्वचैतन्यमात्रे स्वरूपे स्थिरो भवति ।

**(4) वृत्तिसारूप्यमितरत्र ॥**

**सरलार्थः** - योगात् इतरत्र अन्यस्मिन् काले सुखदुःखमोहात्मिकाः वृत्तयः प्रादुर्भवन्ति, तादृक् रूपम् एव पुरुषस्य संवेद्यते । तदेवं यस्मिन् एकाग्रतया परिणते विविक्तः स्वस्मिन् रूपे प्रतिष्ठितो भवति । यथा - जलतरङ्गेषु चलत्सु चन्द्रः चलन् इव प्रतिभाति ।

**वृत्तयः ।**

**(5) वृत्तयः पञ्चतय्यः क्लिष्टाऽक्लिष्टाः ॥**

**सरलार्थः** - चित्तपरिणामाः वृत्तयः पञ्चतय्यः पञ्चावयवाः पञ्चप्रकाराः भवन्ति । रागद्वेषमोहादिक्लेशानां कारणीभूताः वृत्तयः क्लिष्टाः । रागद्वेषमोहादिक्लेशनाशिन्यः मुक्तिफलाः वृत्तयः अक्लिष्टाः ॥

**(6) प्रमाणविपर्ययविकल्पनिद्रास्मृतयः ॥**

**सरलार्थः** - प्रमाण-विपर्यय-विकल्प-निद्रा-स्मृतयः पञ्चप्रकाराः वृत्तयः सन्ति । तदतिरिक्तवृत्तयः न सन्ति इति उद्देशसूत्रस्य फलम् ॥

**प्रमाणानि ।**

**(7) प्रत्यक्षानुमानागमाः प्रमाणानि ॥**

**सरलार्थः** - प्रत्यक्षम्, अनुमानम्, आगमः, इति त्रीण्येव प्रमाणानि सन्ति ।

अत्र प्रमाकरणत्वं प्रमाणसामान्यलक्षणम् । प्रमायाः करणं साधनमेव प्रमाणमित्यर्थः ।

* इन्द्रियसम्बन्धद्वारा चित्तस्य घटादिसम्बन्धे सति सामान्यविशेषात्मकेऽर्थे, व्यक्तिरूपविशेषनिर्धारणप्रधाना वृत्तिः 'प्रत्यक्षम्' प्रमाणम् ।

* व्याप्तिग्रहे सति पक्षवृत्तिलिङ्गज्ञानात् इदमित्थत्वेन साध्यनिर्धारणवृत्तिः अनुमानम् ।

* आप्तेन दृष्टः अनुमितो अर्थः येन शब्देन उपदिश्यते तस्मात् शब्दात् श्रोतुः तदर्थविषया वृत्तिः आगमः ।

**(8) विपर्ययो मिथ्याज्ञानमतद्रूपप्रतिष्ठम् ॥**

**सरलार्थः** - तद्रूपे स्वविषये प्रतिष्ठाशून्यं बाधविरोधात्मकं मिथ्याज्ञानमेव विपर्ययः । अर्थात् अतथाभूते अर्थे तथा उत्पद्यमानं ज्ञानं विपर्ययः । यथा शुक्तौ रजतज्ञानम् । अतद्रूपप्रतिष्ठमिति, तस्यार्थस्य यद्रूपं तस्मिन् रूपे न प्रतितिष्ठति तस्यार्थस्य यत्पारमार्थिकं रूपं न तत्प्रतिभासयतीति संशयस्यापि अतद्रूपप्रतिष्ठत्वात् मिथ्याज्ञानत्वं सिद्ध्यति । यथा - स्थाणुर्वा पुरुषो वेति ।

**(9) शब्दज्ञानानुपाती वस्तुशून्यो विकल्पः ॥**

**सरलार्थः** - शब्दजनितं ज्ञानं शब्दज्ञानं, तदनुपतितं शीलं यस्य स शब्दज्ञानानुपाती । वस्तुनः तथात्वम् अनपेक्षमाणो यः अध्यवसायः स विकल्प उच्यते । अयं विकल्पः वस्तुशून्यत्वात् न प्रमाणम् । यथा - चैतन्यमेव पुरुषः इत्यत्र अभेदनिश्चयेऽपि पुरुषस्य चैतन्यभेदः विकल्पः । भावपदार्थात् अतिरिक्तः अभावो नास्तीति निश्चयेऽपि **सर्वधर्माभाववान् पुरुषः** इत्यत्र अभाववान् एवं पुरुषः इत्यनयोः विशेषणविशेष्यभावविकल्पः ।

**(10) अभावप्रत्ययालम्बना वृत्तिर्निद्रा ॥**

**सरलार्थः** - कार्यं प्रत्ययते गच्छतीति '**प्रत्ययो**' हेतुः । जाग्रत्स्वप्नवृत्तीनाम् अभावे हेतुः तमः । तदेवालम्बनं विषयो यस्याः सा वृत्तिः निद्रा इति । समस्तविषयपरित्यागेन या तमोमयी वृत्तिः सा निद्रा इत्यर्थः ।

**(11) अनुभूतविषयासम्प्रमोषः स्मृतिः ॥**

**सरलार्थः** - प्रमाणादिपञ्चवृत्तिभिः अनुभूतस्य विषयस्य असम्प्रमोषः (अधिकाग्रहः - अनुभूतमात्रग्रहः) एव स्मृतिरित्यर्थः। पूर्वानुभूतस्यैव ग्रहणं भवति । नान्यस्य इति ।

**(12) अभ्यासवैराग्याभ्यां तन्निरोधः ॥**

**सरलार्थः** - तासां पञ्चवृत्तीनां निरोधः निवर्तनम् अभ्यासेन वैराग्येण च भवति इत्यर्थः । अभ्यासेन बाह्यविषयेषु चित्तवृत्तीः निरुध्य वैराग्येण तासां वृत्तीनाम् अन्तः प्रवाहनिर्माणमेव चित्तवृत्तिनिरोधः ।

**(13) तत्र स्थितौ यत्नोऽभ्यासः ॥**

**सरलार्थः** - वृत्तिरहितस्य चितस्य स्वरूपनिष्ठः परिणामः स्थितिः तस्यां यत्न उत्साहः पुनः पुनः तथात्वेन चेतसि निवेशनम् अभ्यासः इति उच्यते ।

**(14) स तु दीर्घकालनैरन्तर्यसत्कारासेवितो दृढभूमिः ॥**

**सरलार्थः** - स अभ्यासः दीर्घकालं तपोब्रह्मचर्यविद्याश्रद्धारूप-सत्कारेण नैरन्तर्येण च आसेवितो दृढसंस्कारः इति ।

**(15) दृष्टाऽऽनुश्रविकविषयवितृष्णस्य वशीकारसंज्ञा वैराग्यम् ॥**

**सरलार्थः** - विषयः द्विविधः वर्तते । दृष्टः विषयः, आनुश्रविकविषयश्च । अस्मिन् लोके उपलभ्यमानः शब्दादि-विषयाः दृष्टविषयाः, देवलोकात् अथवा गुरुमुखात् अनुश्रवो वेदः तत आगताः विषयाः आनुश्रविकाः विषयाः । तयोः द्वयोरपि विषययोः परिणामविरहसत्त्वदर्शनात् वितृष्णस्य चित्तस्य रागद्वेषशून्या या उपेक्षाबुद्धिः सा वशीकारसंज्ञा "**ममैते वश्या नाहमेतेषां वश्य**" इति योऽयं विमर्शः तद्वैराग्यम् इत्युच्यते ।

**(16) तत्परं पुरुषख्यातेर्गुणवैतृष्णम् ॥**

**सरलार्थः** - वशीकारसंज्ञकपूर्ववैराग्यस्य अपरवैराग्यं प्रति कारणत्वनियमः । तथा हि यमनियमादि - योगानुष्ठानात्

अत्यन्तशुद्धचित्तस्य विषयेषु दोषदर्शनं भवति । ततः वशीकारसंज्ञक-वैराग्यस्य उत्पत्तिः जायते । तदनन्तरम् आगमप्रमाणेन ज्ञातपुरुषस्य ज्ञानमवाप्य सात्त्विकशुद्धस्य परवैराग्यस्य प्राप्तिः भवति ।

**सम्प्रज्ञातसमाधिः असम्प्रज्ञातसमाधिश्च ।**

**(17) वितर्कविचारानन्दास्मितारूपानुगमात्संप्रज्ञातः ॥**

**सरलार्थः** - वितर्क-विचार-आनन्द-अस्मितानां स्वरूपैः अनुगमात् साक्षात्कारात् सम्प्रज्ञातः । सम्यक् संशयविपर्ययरहितत्वेन प्रकारेण विशेषरूपेण ज्ञायते (भाव्यस्य रूपं येन भावना) विशेषेण स सम्प्रज्ञातः ।

* यथा लोके प्राथमिकः योगी चतुर्भुजादि-ध्येयमूर्तौ चित्तस्य आभोगं करोति । तद्विषयकसाक्षात्कारवती प्रज्ञा एव वितर्कः ।

* चित्तस्य आलम्बनसूक्ष्मशरीरे आभोगः स्थूलकारणीभूतं यत् सूक्ष्मतन्मात्रादिकं, तस्य साक्षात्कारः एव विचारः ।

* इन्द्रियाणि स्थूलानि सत्त्वरूपाणि तेषां ध्यानेन यः साक्षात्कारः स एव आनन्दः ।

* इन्द्रियाणां कारणं बुद्धिः । अतः बुद्धिः ग्रहणकर्त्री पुरुषेण सह सामान्यम् एकीभूता सति ध्यानेन साक्षात्कारोऽपि अस्मिताशब्देन उच्यते ।

**(18) विरामप्रत्ययाभ्यासपूर्वः संस्कारशेषोऽन्यः ॥**

**सरलार्थः** - विरम्यते अनेनेति विरामः । वितर्कादिचिन्तापरित्यागः वृत्तीनाम् अभावो वा तस्य कारणं परं वैराग्यम्, तस्य अभ्यासः पौनःपुन्येन अनुष्ठानं (तत्र या काचित् वृत्तिः उल्लसति) तस्या नैरन्तर्येण पर्युदासनं स विरामप्रत्ययाभ्यासः । तत्पूर्वं कारणं यस्य स विरामप्रत्ययाभ्यासपूर्वः संस्कारः सम्प्रज्ञातसमाधिः । संस्कारशेषः अन्यः तद्विलक्षणः, अयम् असम्प्रज्ञात इत्यर्थः ।

उक्तं च -

**मनसो वृत्तिशून्यस्य ब्रह्माकारतया स्थितिः ।**<br>**असम्प्रज्ञातनामासौ समाधिरभिधीयते ॥**

**(19) भवप्रत्ययो विदेहप्रकृतिलयानाम् ॥**

**सरलार्थः** - भवन्ति जायन्ते जन्तवः अस्मिन् अनेन वा इति भवः संसारः । स एव प्रत्ययः कारणं यस्य स भवप्रत्ययः । आविर्भूत एव संसारे ते तथाविध-समाधिभाजो भवन्ति, तेषां परतत्त्वादर्शनात् योगाभ्यासोऽयम्, अतः परतत्त्वज्ञो तद्भावनायां च मुक्तिकामेन पुरुषेण महान्यत्नो विधेयः इति भावः ॥

**(20) श्रद्धावीर्यस्मृतिसमाधिप्रज्ञापूर्वकं इतरेषाम् ॥**

**सरलार्थः** - विदेहप्रकृतिलयव्यतिरिक्तानां योगिनां (श्रद्धादिपूर्वकः श्रद्धादयः पूर्वे उपायाः यस्य स श्रद्धादिपूर्वकः), ते च श्रद्धादयः क्रमात् उपायोपेयभावेन प्रवर्तमानाः सम्प्रज्ञातसमाधेः उपायतां प्रतिपद्यन्ते । तत्र श्रद्धा योगविषये चेतसः प्रसादः वीर्यमुत्साहः, स्मृतिरनुभूतः असम्प्रमोषः, समाधिरेकाग्रता, प्रज्ञा प्रज्ञातव्यविवेकः, तत्र श्रद्धावतो वीर्यं जायते योगविषय उत्साहवान्भवति, सोत्साहस्य च पाश्चात्त्यासु भूमिषु स्मृतिरुत्पद्यते । तत्स्मरणात् चेतः समाधीयते । समाधिचित्तः भाव्यं सम्यक् विवेकेन जानाति । एते सम्प्रज्ञातसमाधेः उपायाः तस्या अभ्यासात् वैराग्यात् च असम्प्रज्ञातसमाधिः भवति ।

**(21) तीव्रसंवेगानामासन्नः ॥**

**सरलार्थः** - तीव्राः संवेगो वैराग्यं येषां, तेषामधिकमात्रोपायतीव्रसंवेगानां योगिनां समाधिलाभः शीघ्रं भवति । संवेग क्रियाहेतुः दृढतरः संस्कारः, स तीव्रो येषाम् अधिमात्रोपायानां तेषां समाधिलाभः शीघ्रमेव सम्पद्यते इत्यर्थः ।

**(22) मृदुमध्याधिमात्रत्वात्ततोऽपि विशेषः ॥**

**सरलार्थः** - तीव्रसंवेगस्यापि मृदुमध्याधिमात्रत्वात् तद्भेदात् विशेषः भवति । मृदुर्मध्योऽधिमात्र इति उपायभेदाः । ते प्रत्येकं मृदुसंवेग-मध्यसंवेग-तीव्रसंवेगभेदात् त्रिधा, तद्भेदेन च नव योगिनो भवन्ति ।

* **मृदूपायो** मृदुसंवेगो मध्यसंवेगः तीव्रसंवेगश्च ।
* **मध्योपायो** मृदुसंवेगो मध्यसंवेगः तीव्रसंवेगश्च ।
* **अधिमात्रोपायो** मृदुसंवेगो मध्यसंवेगः तीव्रसंवेगश्च ।

अधिमात्रोपाये तीव्रसंवेगे च महान्यत्नः कर्तव्यः इति भावः ।

**(23) ईश्वरप्रणिधानाद्वा ॥**

**सरलार्थः** – ईश्वरस्य प्रणिधानादपि समाधिः भवति । ईश्वरो वक्ष्यमाणलक्षणः, तत्र प्रणिधानं भक्तिविशेषो विशिष्टमुपासनं सर्वक्रियाणां तत्र अर्पणं विषयसुखादिकं फलम् अनिच्छन् सर्वाः क्रियाः तस्मिन् परमगुरौ अर्पयति । तत्प्रणिधानं, समाधेः अपरोऽर्थ उत्कृष्टः उपाय इति ।

**(24) क्लेशकर्मविपाकाशयैरपरामृष्टः पुरुषविशेषो ईश्वरः ॥**

**सरलार्थः** – क्लिश्नन्तीति क्लेशाः, अविद्यादयः । पञ्च कर्माणि कुशलाकुशलजनकक्रियाः । विपाकः तत्क्रियाफलं जात्यायुर्भोगैः, विपाकानुगुणवासना आशयाः आफलविपाकात् चित्तभूमौ शेरते इति व्युत्पत्तेः । तैरपामृष्टः त्रिष्वपि कालेषु न संस्पृष्टः । पुरुषविशेषः अन्येभ्यः पुरुषेभ्यः विशिष्यत इति विशेषः ईश्वरः दर्शनशीलः इच्छामात्रेण सकलजगदुद्धरणक्षम इति ।

**(25) तत्र निरतिशयं सर्वज्ञबीजम् ॥**

**सरलार्थः** – तस्मिन् भगवति सर्वज्ञत्वस्य यद् बीजम् अतीतानागतादिग्रहणस्य अल्पत्वं महत्त्वं च मूलत्वात् । बीजमिव बीजं तत्तत्र निरतिशयं काष्ठां प्राप्तम्, दृष्टा हि अल्पत्वमहत्त्वादीनां धर्माणां सातिशयानां पराकाष्ठाप्राप्तिः । यथा परमाणौ अल्पत्वस्य आकाशे परममहत्वस्य । एवं ज्ञानादयोऽपि विशेषा अवगन्तव्याः । क्वचित् अनिरतिशयताम् आसादयन्ति । यत्र च एते निरतिशयाः स ईश्वरः इति ।

तथा च उक्तम् वायुपुराणे –

**सर्वज्ञता तृप्तिरनादिबोधः स्वतन्त्रता नित्यमलुप्तशक्तिः ।**
**अनन्तशक्तिश्च विभोर्विधिज्ञाः षडाहुरङ्गानि महेश्वरस्य ॥**
**ज्ञानवैराग्यमैश्वर्यं तपः सत्यं क्षमा धृतिः ।**
**स्रष्टृत्वमात्मसम्बोधो ह्यधिष्ठातृत्वमेव च ।**
**अव्ययानि दशैतानि नित्यं तिष्ठन्ति शङ्करे ॥**
**अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।**
**लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ॥**

### स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) अभावप्रत्ययालम्बनावृत्तिः भवति ।

(क) स्मृतिः (ख) निद्रा (ग) भूमिः (घ) प्रतिष्ठा

(2) निरोधः केन भवति ?

(क) अभ्यासेन (ख) वैराग्येण (ग) उभयेन (घ) एकेनापि न

(3) कति प्रमाणानि सन्ति ।

(क) त्रीणि (ख) चत्वारि (ग) पञ्च (घ) सप्त

(4) अनुभूतविषयासम्प्रमोषः का ?

(क) निद्रा (ख) वर्षा (ग) श्रद्धा (घ) स्मृतिः

(5) समाधिः कतिविधः ?

(क) एकविधः (ख) त्रिविधः (ग) द्विविधः (घ) पञ्चविधः

(6) चित्तवृत्तिनिरोधः कः ?

(क) योगः (ख) विरोधः (ग) प्रबोधः (घ) कुबोधः

**2. रिक्तस्थानं पूरयत ।**

(1) क्लेशकर्मविपाकाशयैरपरामृष्टः .......... ईश्वरः ।

(2) अभ्यासवैराग्याभ्यां तत् .......... ।

(3) .......... प्रमाणानि ।

(4) .......... सम्प्रज्ञातः ।

(5) मृदुमध्याधिमात्रत्वात्ततोऽपि .......... ।

(6) तत्र स्थितौ .......... अभ्यासः ।

**3. युग्मानि योजयत ।**

| **( अ )** | **( ब )** |
|---|---|
| (1) वस्तुशून्यः | (1) अभ्यासः |
| (2) यत्नः | (2) विकल्पः |
| (3) वशीकारसंज्ञा | (3) ईश्वरः |
| (4) क्लेशकर्मादयः | (4) स्मृतिः |
| (5) अनुभूतविषया | (5) वैराग्यम् |
| | (6) विशेषः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) का नाम श्रद्धा ?

(2) क्रमशः प्रमाणानां नामानि लिखत ।

(3) पञ्चवृत्तयः काः ?

(4) विकल्पस्य लक्षणं किम् ?

(5) वैराग्यस्य स्वरूपं लिखत ।

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) अभ्यासवैराग्याभ्यां कथं निरोधः सम्भवति ?

(2) असम्प्रज्ञातसमाधेः लक्षणं लिखत ।

(3) सोदाहरणं विपर्ययस्य स्वरूपं लिखत ।

**6. टिप्पणीं लिखत ।**

(1) ईश्वरः

(2) प्रमाणानि

(3) योगः

**7. सविस्तरमुत्तरं लिखत ।**

(1) समाधेः द्वैविध्यं प्रतिपादयत ।

(2) पञ्चवृत्तीनां स्वरूपं सलक्षणं लिखत ।

(3) ईश्वरप्रणिधानात् कथं समाधिः प्राप्यते ?

●

# १३ पातञ्जलयोगसूत्रस्य प्रथमपादः-२ ( सू. २६-५१ )

**प्रस्तावना -**

'संयोगो योग इत्युक्ते जीवात्मपरमात्मनोः' इति याज्ञवल्क्यस्मृतेरनुगुणमेव पतञ्जलिना योगशास्त्रं रचितम् । तत्र योगशास्त्रे प्रथमपादे निर्बीजादि-समाधेः लक्षणमपि जीवात्मपरमात्मनोः ऐक्यं प्रतिपादयति । तादृशः योग एव मिथ्याज्ञानं दूरीकरोति । ईश्वरस्य जगतः कारणत्वं, सर्वज्ञबीजत्वादि विषयाः प्रथमपादे निरूपिताः । एते विषयाः पाठेऽस्मिन् निरूपिताः ।

**जलसैन्धवयोः साम्यं यथा भवति योगतः । तथात्ममनसोरैक्यं समाधिरिह कल्प्यते ॥**

---

**ईश्वरस्य सर्वश्रेष्ठत्वम् ।**

**(26) स पूर्वेषामपि गुरुः कालेनानवच्छेदात् ॥**

**सरलार्थः** - पूर्वे हि सर्गादौ उत्पन्नाः गुरवः ब्रह्मादयः सृष्टिकर्तारः कालेन अनवच्छिद्यन्ते स एव तेषामपि गुरुः उपदेष्टा । कुतः कालेन वर्षशतादिना तस्य अनवच्छेदः भवति ? अनादित्वात् इति । तथा च श्रुतिः -

''**यो ब्रह्माणं विदधाति पूर्वं यो वेदांश्च प्रहिणोति तस्मै**'' इति ।

**(27) तस्य वाचकः प्रणवः ॥**

**सरलार्थः** - प्रकर्षेण नूयते स्तूयते अनेनेति प्रणवः, नौति स्तौति वा प्रणवः ॐ कारः इति । प्रणवेश्वरयोः वाच्यवाचकभावसम्बन्धः नित्यः । संकेतेन प्रकाश्यते संकेतो हि अस्मात् पदात् अयमर्थो बोद्धव्य इति ईश्वरेच्छारूपः ईश्वरः वाच्यः । यथा श्रुतिः -

''**विष्णुबुद्धिवदोंकारो ब्रह्मबुद्ध्योपास्यमानो ब्रह्मप्रतिपत्त्युपायो भवत्यतः प्रतीकत्वेन तस्य वाचकः प्रणवः एतदालम्बनं श्रेष्ठतरालम्बनं परम्**'' इति । उक्तञ्च याज्ञवल्क्यस्मृतौ -

''**अदृष्टविग्रहो देवो भावग्राह्यो मनोमयः .**
**तस्योंकारः स्मृतो नाम तेनाहूतः प्रसीदति ॥**''

**(28) तज्जपस्तदर्थभावनम् ॥**

**सरलार्थः** - तस्य सार्धत्रिमात्रिकस्य प्रणवस्य जपो यथावद् उच्चारणं तद्वाच्यस्य ईश्वरस्य भावनं पुनः पुनः चेतसि विनिवेशनम् एकाग्रताया उपायः । अतः समाधिसिद्धये योगिना प्रणवो जप्यः तदर्थ ईश्वरस्य भावनीयम् इत्युक्तं भवति ।

**(29) ततः प्रत्यक्चेतनाधिगमोऽप्यन्तरायाभावश्च ॥**

**सरलार्थः** - तस्मात् जपात् तदर्थ-भावनात् च योगिनः प्रत्यक्चेतनाधिगमो भवति । यथा ईश्वरः शुद्धः सम्पन्नः केवलः अनुपसर्गः तथा अयमपि बुद्धेः प्रतिसंवेदी प्रत्यक्चेतनः अविद्यावान् पुरुषो जीवः अस्य ईश्वरस्य स्वरूपतो भवति ।

**(30) व्याधिस्त्यानसंशयप्रमादालस्याविरतिभ्रान्तिदर्शनालब्धभूमिकत्वानवस्थितत्त्वानि चित्तविक्षेपास्तेऽन्तरायाः ॥**

**सरलार्थः** - ये चित्तं योगात् विक्षिपन्ति भ्रंशयन्ति ते चित्तविक्षेपाः । योगस्य अन्तरायाः विघ्नाः नव वर्तन्ते । व्याधिः, स्त्यानम्, संशयः, प्रमादः, आलस्यम्, अविरतिः, भ्रान्तिदर्शनम्, अलब्धभूमिकत्वम्, अनवस्थितत्वम् एते नव चित्तस्य विघ्नाः वर्तन्ते । एते नव विघ्नाः रजसः, तमसः बलात् प्रवर्तमानाः भवन्ति ।

**(31) दुःखदौर्मनस्याङ्गमेजयत्वश्वासप्रश्वासा विक्षेपसहभुवः ॥**

**सरलार्थः** - दुःखम्, दौर्मनस्यम्, अङ्गमेजयत्वम्, श्वास-प्रश्वासाः । एते विक्षेपैः सह उत्पन्नाः भवन्ति ।

- दुःखं चित्तस्य राजसः परिणामो बाधनालक्षणः, यद्बाधात्प्राणिनः तदपघाताय प्रवर्तन्ते ।
- दौर्मनस्यं बाह्याभ्यन्तरैः कारणैः मनोदौःस्थ्यम् ।
- अङ्गमेजयत्वं नाम अङ्गानां कम्पनम् इति ।
- प्राणो यद्बाध्यं वायुमाचामति स श्वासः ।
- तत्कौष्ठ्यं वायुं निश्वसिति स प्रश्वासः ।

**(32) तत्प्रतिषेधार्थमेकतत्त्वाभ्यासः ॥**

**सरलार्थः** - विक्षेपानां नाशार्थम् एकतत्त्वस्य ईश्वरस्य 'अभ्यासो' ध्यानं कार्यमित्यर्थः ।

**चित्तप्रसादनोपायाः ।**

**(33) मैत्रीकरुणामुदितोपेक्षाणां सुखदुःखपुण्यापुण्यविषयाणां भावनातश्चित्तप्रसादनम् ॥**

**सरलार्थः** - मैत्री सौहार्दम्, करुणा कृपा, मुदिता हर्षः, उपेक्षा औदासीन्यम् । एते यथाक्रमं सुखदुःखपापपुण्यविषयाः भवन्ति । तया भावनया सर्वदा चित्तं प्रसन्नं भवति ।

**(34) प्रच्छर्दनविधारणाभ्यां वा प्राणस्य ॥**

**सरलार्थः** - नासिकापुटाभ्यां प्राणनाम् 'प्रच्छर्दनं' रेचनं, बहिरेव यथाशक्ति विधरणंम्कुम्भकम् । ताभ्यां चित्तमेकत्र लक्ष्ये स्थितिं लभते इति भावः ।

**(35) विषयवती वा प्रवृत्तिरुत्पन्ना मनसः स्थितिनिबन्धनी ॥**

**सरलार्थः** - विषयाः गन्धरसरूपस्पर्शशब्दास्ते विद्यन्ते फलत्वेन यस्याः सा विषयवती प्रवृत्तिर्मनसः स्थैर्यं करोति । तथा हि - नासाग्रे चित्तं धारयतो दिव्यगन्धसंविद् उपजायते । तादृश्येव जिह्वाग्रे रससंवित्, ताल्वाग्रे रूपसंवित्, जिह्वामध्ये स्पर्शसंवित्, जिह्वामूले शब्दसंवित् । तदेवं तत्तदिन्द्रियद्वारेण तस्मिन् दिव्ये विषये जायमाना संवित् चित्तस्य एकाग्रतायाः हेतुर्भवति ।

**(36) विशोका वा ज्योतिष्मती ॥**

**सरलार्थः** - उत्पन्ना प्रवृत्तिः चित्तस्य स्थितिनिबन्धिनीति वाक्यशेषः । ज्योतिःशब्देन सात्त्विकः प्रकाश उच्यते । स प्रशस्तः भूयः अनतिशयवांश्च विद्यते यस्यां सा ज्योतिष्मती प्रवृत्तिः । विशोका विगतः यत्सत्त्वाभ्यासवशात् शोको रजः परिणामो यस्याः सा विशोका चेतसः स्थितिनिबन्धिनी । अयमर्थः - हृत्पद्मसंपुटमध्यं प्रशान्तकल्लोलक्षीरोदधिप्रख्यं चित्तसत्त्वं भावयतः प्रज्ञालोकात् सर्ववृत्तिपरिक्षये चेतसः स्थैर्यम् उत्पद्यते ।

**(37) वीतरागविषयं वा चित्तम् ॥**

**सरलार्थः** - वीतरागाः कृष्णद्वैपायन-प्रभृतयः तेषां चित्तं तदेव विषयः अवलम्बनं यस्य तत् योगिनः चित्तं स्थितिपदं लभते इत्यर्थः ।

**(38) स्वप्ननिद्राज्ञानालम्बनं वा ॥**

सरलार्थः - यत्र भोक्तृत्वमात्मनः स स्वप्नः, निद्रा पूर्वोक्तलक्षणा, तदालम्बनं निद्रालम्बनं वा ज्ञानम् आलम्ब्यमानं चेतसः स्थितिं करोति ।

**(39) यथाभिमतध्यानाद्वा ॥**

**सरलार्थः** - यथाभीष्टम् अभिमतं शिवरामकृष्णादिरूपं तत्र तेषां ध्यानेन चेतः स्थिरीभवति इत्यर्थः ।

**(40) परमाणुपरममहत्त्वान्तोऽस्य वशीकारः ॥**

**सरलार्थः** - एभिः उपायैः चित्तस्य स्थैर्यं भावयतो योगिनः सूक्ष्मविषयभावनाद्वारेण परमाण्वन्तो वशीकारो अप्रतिघातरूपो जायते । न क्वचित् परमाणुपर्यन्ते सूक्ष्मे विषयेऽस्य मनः प्रतिहन्यत इत्यर्थः ।

**(41) क्षीणवृत्तेरभिजातस्येव मणेर्ग्रहीतृग्रहणग्राह्येषु तत्स्थतदञ्जनता समापत्तिः ॥**

**सरलार्थः** - क्षीणा वृत्तयः यस्य तत्क्षीणवृत्तिः तस्य ग्रहीतृग्रहणग्राह्येषु आत्मेन्द्रियविषयेषु तत्स्थतदञ्जनता समापत्तिर्भवति, तत्स्थत्वं तत्रैकाग्रता, तदञ्जनता तन्मयत्वम् । चित्ते विषयस्य भाव्यमानस्यैव उत्कर्षः । यथा - अभिजातस्य मणेः । अभिजातस्य निर्मलस्य स्फटिकमणेः तदुपाधिवशात् निर्मलस्य चित्तस्य तद्भावनीय-वस्तूपरागात् तद्रूपापत्तिः ।

**(42) तत्र शब्दार्थज्ञानविकल्पैः संकीर्णा सवितर्का समापत्तिः ॥**

**सरलार्थः** - श्रोत्रेन्द्रियग्राह्यः स्फोटरूपो वा शब्दः, अर्थो जात्यादिः, ज्ञानं सत्त्वप्रधाना बुद्धिवृत्तिः, विकल्प उक्तलक्षणः, तैः संकीर्णा यस्याम् एते शब्दादयः परस्पराध्यासेन प्रतिभासन्ते "गौः इत्यर्थो गौरिति" ज्ञानमित्यनेन आकारेण सा वितर्का समापत्तिरुच्यते ।

**(43) स्मृतिपरिशुद्धौ स्वरूपशून्येवार्थमात्रनिर्भासा निर्वितर्का ॥**

**सरलार्थः** – स्मृतिपरिशुद्धौ शब्दसङ्केतस्य श्रुतस्य अनुमेयस्य च ज्ञानमेव विकल्पः । तस्मात् जाता स्मृतिः । तस्याः परिशुद्धौ अपगमे सति या स्वरूपशून्या इव अर्थमात्रनिर्भासा चित्तस्थितिः सा निर्वितर्का समापत्तिः इत्यर्थः ।

**(44) एतयैव सविचारा निर्विचारा च सूक्ष्मविषया व्याख्याता ॥**

**सरलार्थः** – एतयैव सवितर्कया निर्वितर्कया च समापत्त्या सूक्ष्मविषयाः सविचारात्मकाः निर्विचारात्मकाः निरूपिताः इति । सूक्ष्मविषयाः सूक्ष्मः प्रत्येकपञ्चतन्मात्रेन्द्रियादि-विषयो यस्याः सा तथोक्ता । एतेन सवितर्काया निर्वितर्कायाश्च स्थूलविषयत्वं प्रतिपादितं भवति ।

**(45) सूक्ष्मविषयत्वं चालिङ्गपर्यवसानम् ॥**

**सरलार्थः** – सविचारनिर्विचारयोः समापत्त्योः च सूक्ष्मविषयत्वम् उक्तं तदलिङ्गपर्यवसानं न क्वचिल्लीयते । तथा हि – गुणानां परिणामे चत्वारि पर्वाणि विशिष्टलिङ्गम् अविशिष्टलिङ्गं लिङ्गमात्रम् अलिङ्गं – चेति । विशिष्टलिङ्गं भूतानि, अविशिष्टलिङ्गं तन्मात्रेन्द्रियाणि, लिङ्गमात्रं बुद्धिः, अलिङ्गं प्रधानमिति । न अतः परं सूक्ष्मम् अस्तीत्युक्तं भवति ।

**(46) ता एव सबीजः समाधिः ॥**

**सरलार्थः** – उक्तलक्षणाः समापत्तयः सह बीजेन आलम्बनेन वर्तत इति सबीजः सम्प्रज्ञातः समाधिः इत्युच्यते । सर्वासां सालम्बनत्वात् ।

**(47) निर्विचारवैशारद्येऽध्यात्मप्रसादः ॥**

**सरलार्थः** – निर्विचारायाः प्रकृष्टाभ्यासवशात् वैशारद्ये नैर्मल्ये सति अध्यात्मप्रसादः समुपजायते । चित्तं क्लेशवासनारहितं स्थितिप्रवाहयोग्यं भवति, एतद्देशचित्तस्य वैशारद्यं यत् स्थितौ दाढ्र्यम् इति ।

**ऋतंभरा प्रज्ञा ।**

**(48) ऋतम्भरा तत्र प्रज्ञा ॥**

**सरलार्थः** – यदा निर्विचारसमाधेः वैशारद्यं समुत्पन्नं भवति तदा अध्यात्मप्रसादाधिगमः भवति । तस्यां दशायां योगिनः या प्रज्ञा, सा एव ऋतम्भरा प्रज्ञा उच्यते । यथा –

**आगमेनानुमानेन ध्यानाभ्यासरसेन च ।**
**त्रिधा प्रकल्पयन् प्रज्ञां लभते योगमुत्तमम् ॥ इति ।**

**(49) श्रुतानुमानप्रज्ञाभ्यामन्यविषया विशेषार्थत्वात् ॥**

**सरलार्थः** – आगमजनितविज्ञानं, अनुमानजनितविज्ञानञ्च सामान्यविषयकं भवति । एताभ्यां जायमाना या प्रज्ञा ताभ्यां पुरुषगतो यो विशेषः सः ऋतम्भराख्याग्राह्यः विशेषार्थत्वात् इति ।

**(50) तज्जः संस्कारोऽन्यसंस्कारप्रतिबन्धी ॥**

**सरलार्थः** – तया प्रज्ञया जनितो यः संस्कारः सः अन्यान् प्रतिबध्नाति । स्वकार्यकरणे बाधको भवतीत्यर्थः ।

**निर्बीजसमाधिदशा**

**(51) तस्यापि निरोधे सर्वनिरोधान्निर्बीजसमाधिः ॥**

**सरलार्थः** – तस्यापि संप्रज्ञातस्य निरोधे प्रविलये सति सर्वासां चित्तवृत्तीनां स्वकारणे प्रविलयाद्या या संस्कारमात्रात् वृत्तिरुदेति तस्याः 'नेति नेतीति' केवलं पर्युदासनात् निर्बीजः समाधिः आविर्भवति ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) तस्य वाचकः अस्ति ।

(क) प्रणवः (ख) सम्बन्धः (ग) उपायः (घ) प्राणः

(2) ऋतम्भरा का ?

(क) रसना (ख) अप्रज्ञा (ग) प्रज्ञा (घ) सम्प्रज्ञा

(3) चित्तप्रसादनोपायाः कति सन्ति ?

(क) दश (ख) पञ्च (ग) नव (घ) चत्वारः

(4) कति व्याधयः सन्ति ?

(क) दश (ख) सप्त (ग) नव (घ) एकादश

(5) तत्स्थत्वस्यार्थः अस्ति ।

(क) विज्ञानता (ख) तत्रैकाग्रता (ग) तज्ज्ञानता (घ) प्रबोधता

(6) श्रोत्रेन्द्रियग्राह्यः पदार्थः ।

(क) शब्दः (ख) धर्मः (ग) रसः (घ) गन्धः

**2. रिक्तस्थानं पूरयत ।**

(1) स पूर्वेषामपि गुरुः .......... ।

(2) तत् प्रतिषेधार्थम् .......... ।

(3) तत्र शब्दार्थज्ञानविकल्पैः .......... .......... समापत्तिः ।

(4) तस्यापि निरोधे सर्वनिरोधात् .......... ।

(5) सूक्ष्मविषयत्वञ्च .......... ।

(6) तस्य .......... प्रणवः ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) प्रणवः | (1) ऋतम्भरा |
| (2) प्रज्ञा | (2) नव |
| (3) अन्तरायाः | (3) वाचकः |
| (4) चित्तम् | (4) सवितर्का |
| (5) समापत्तिः | (5) प्रतिबन्धी |
| | (6) वीतरागविषयम् |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) प्रणवः कति मात्रिकः ?

(2) सबीजः कः ?

(3) किन्नाम विरेचनम् ?

(4) कति अन्तरायाः ?

(5) निर्बीजसमाधेः सूत्रम् लिखत ।

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) क्रमशः नव अन्तरायाणां नामानि लिखत ।

(2) किन्नाम एकतत्त्वाभ्यासः ?

(3) चित्तप्रसादनोपायाः के सन्ति ?

**6. टिप्पणीं लिखत ।**

(1) सबीजसमाधिः ।

(2) समापत्तिः ।

(3) ईश्वरप्रणिधानम् ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) ईश्वरस्य सर्वज्ञत्वं सर्वश्रेष्ठत्वञ्च साधयत ।

(2) स्थितचित्तस्य उपायान् विवृणुत ।

(3) ‘‘ऋतम्भरा तत्र प्रज्ञा’’ सूत्रमिदं व्याख्यायत ।

●

# १४ पातञ्जलयोगसूत्रस्य द्वितीयपादः ( सू. १-२५ )

**प्रस्तावना** -

इदं योगदर्शनं सेश्वरसाङ्ख्यदर्शननाम्ना अपि प्रसिद्धमस्ति । अत एव पतञ्जलिमहर्षिणा **योगश्चित्तवृत्तिनिरोधः** इत्यनेन सूत्रेण योगद्वारा ईश्वरस्य प्राप्त्युपायाः कथिताः । अर्थात् चित्तस्य (मनसः अन्तःकरणस्यवा) वृत्तेः सर्वतोभावेन निरोधः एव योगः । इदमेव खलु दर्शनं प्राधान्येन भारतस्य भारतीयतायाः प्रकाशकः विस्तारकः ग्राहकः अनुग्राहकश्च वर्तते । पाठेऽस्मिन् क्रमशः क्रियायोगादीनां स्वरूपम्, अविद्यास्मितादिक्लेशानां लक्षणादिकं समधिगम्य, तेभ्यः क्लेशेभ्यः कथम् अपवर्गप्राप्तिः सम्भवतीति विषयाः निरूपिताः वर्तन्ते ।

---

**क्रियायोगः ।**

**(1) तपः स्वाध्यायेश्वरप्रणिधानानि क्रियायोगः ॥**

**सरलार्थः** - क्रियैव योगः क्रियायोगः योगसाधनत्वात् । अत एव विष्णुपुराणे **योगयुक्तप्रथमं योगी युजमानोऽभिधीयत** इत्युपक्रम्य तपःस्वाध्यायादयो दर्शिताः । तपः शास्त्रान्तरोपदिष्टं कृच्छ्रचान्द्रायणादि, स्वाध्यायः प्रणवपूर्वाणां मन्त्राणां जपः, ईश्वरप्रणिधानं सर्वक्रियाणां तस्मिन् परमगुरौ फलनिरपेक्षतया समर्पणम्, एतानि क्रियायोग इत्युच्यन्ते ।

**कामतोऽकामतो वापि यत्करोमि शुभाऽशुभम् ।**
**तत्सर्वं त्वयि संन्यस्तं त्वत्प्रयुक्तं करोम्यहम् ॥**

**(2) समाधिभावनार्थः क्लेशतनूकरणार्थश्च ॥**

**सरलार्थः** - एते तपःप्रभृतयः अभ्यस्यमानाः चित्तगतान् अविद्यादीन् शिथिलीकुर्वन्तः समाधेः उपकर्तृत्वं भजन्ते । तस्मात् प्रथमं क्रियायोगावधानपरेण योगिना भवितव्यम् इति उपदिष्टमस्ति ।

**(3) अविद्याऽस्मितारागद्वेषाभिनिवेशाः पञ्च क्लेशाः ॥**

**सरलार्थः** - अविद्या, अस्मिता, रागः, द्वेषः, अभिनिवेशश्च एते पञ्च क्लेशाः । एते क्लेशाः चेतसि प्रवर्तमानाः संसारलक्षणं गुणपरिमाणं द्रढयन्ति ।

**(4) अविद्या क्षेत्रमुत्तरेषां प्रसुप्ततनुविच्छिन्नोदाराणाम् ॥**

**सरलार्थः** - उत्तरेषाम् अस्मितादीनां चतुर्विधकल्पितानां प्रसुप्ततनुविच्छिन्नोदाराणाम् अविद्याक्षेत्रं प्रसवभूमिः इत्यन्वयः । सा क्षेत्रं प्रसवभूमिः इतरेषाम् अस्मितादीनां प्रत्येकं प्रसुप्ततन्वादिभेदेन चतुर्विधा भवति । यत्र अविद्या विपर्ययज्ञानरूपा शिथिलीभवति तत्र क्लेशानाम् अस्मितादीनां न उद्भवो दृश्यते । यत्र अस्मदादीनां क्लेशानां विपर्ययज्ञानसद्भावेऽपि उद्भवदर्शनात् तत्र स्थितमेव मूलत्वम् अविद्यायाः । ये क्लेशाः चित्तभूमौ स्थिताः प्रबोधकाभावे स्वकार्यं न आरभन्ते ते प्रसुप्ताः इत्युच्यन्ते । यथा वा बाल्यावस्थायां, बालस्य हि वासनारूपेण स्थिता अपि क्लेशाः प्रबोधकसहकार्यभावे नाभिव्यज्यन्ते ।

**प्रसुप्तास्तत्त्वलीनानां तन्ववस्थाश्च योगिनाम् ।**
**विच्छिन्नोदाररूपाश्च क्लेशा विषयसङ्गिनाम् ॥**

**पञ्चक्लेशाः ।**

**(5) अनित्याशुचिदुःखानात्मसु नित्यशुचिसुखात्मख्यातिरविद्या ॥**

**सरलार्थः** - अतस्मिंस्तद्बुद्धिः अविद्या । यथा - अनित्येषु घटादिषु नित्यत्वाभिमानः अविद्या इति । एवम् अशुचिषु कायादिषु शुचित्वाभिमानः, दुःखेषु विषयेषु सुखत्वाभिमानः, अनात्मनि शरीरे आत्मत्वाभिमानः इत्यर्थः । तदुक्तं भगवता वेदव्यासेन -

**स्थानाद्बीजादुपष्टम्भान्निष्यन्दान्निधनादपि ।**
**कायमाधेयशौचत्वात्पण्डिता ह्यशुचिं विदुः ॥**

**(6) दृग्दर्शनशक्त्योरेकात्मतेवास्मिता ॥**

**सरलार्थः** - दृक्शक्तिः पुरुषः, दर्शनशक्तिः रजस्तमोभ्याम् अनभिभूतः सात्त्विकः परिणामः अन्तःकरणस्वरूपः, अनयोः भोग्यभोक्तृत्वेन जडाजडत्वेन अत्यन्तभिन्नरूपयोः एकताभिमाना अस्मिता इत्युच्यते । यथा - प्रकृतिः वस्तुतः कर्तृत्वभोक्तृत्वरहिताऽपि कर्ताहम्, भोग्यहम् इत्यभिमन्यते । सोऽयम् अस्मिताख्यो विपर्यासः क्लेशः ।

**(7) सुखानुशयी रागः ॥**

**सरलार्थः** – सुखप्राप्तेरनन्तरं जायमाना या अभिलाषा तृष्णा वा स एव रागः इति ।

**(8) दुःखानुशयी द्वेषः ॥**

**सरलार्थः** – दुःखस्य अनुभवान्तरं जायमानः क्रोधविशेषः एव द्वेष शब्देन उच्यते ।

**(9) स्वरसवाही विदुषोऽपि तथारूढोऽभिनिवेशः ॥**

**सरलार्थः** – मूर्खस्य विदुषः, जन्तुमात्रस्य वा यः मरणत्रासः स अभिनिवेशः । यथा – मूर्खस्य अहं सदा स्याम् इति रूढत्रासः तथा विदुषोऽपि रूढो दृश्यते । स्वरसवाही – स पूर्वजन्मस्वसकृन्मरणदुःखानुभवजन्यवासना सङ्कः स्वरसः, तेन वहति प्रवहतीति स्वरसवाही । अनेन भयेन देहातिरिक्तात्मा इति दर्शितः भाष्यादिग्रन्थेषु इति ।

**(10) ते प्रतिप्रसवहेयाः सूक्ष्माः ॥**

**सरलार्थः** – ते सूक्ष्माः क्लेशाः ये वासनारूपेणैव स्थिताः न वृत्तिरूपं परिणाममारभन्ते । ते प्रतिप्रसवेन प्रतिलोमपरिणामेन हेयाः त्यक्तव्याः । स्वकारणास्मितायां कृतार्थं सवासनं चित्तं यदा प्रविष्टं भवति तदा कुतः तेषां निर्मूलानां सम्भवः इति भावः ।

**(11) ध्यानहेयास्तद्वृत्तयः ॥**

**सरलार्थः** – तेषां क्लेशानां आरब्धकार्याणां याः सुखदुःखमोहात्मिकाः वृत्तयः ताः ध्यानेनैव चित्तैकाग्रतालक्षणेन हेया हातव्या इत्यर्थः । यथा – वस्त्रादौ स्थूलो मलः प्रक्षालनमात्रेणैव निवर्तते ।

**(12) क्लेशमूलः कर्माशयो दृष्टाऽदृष्टजन्मवेदनीयः ।।**

**सरलार्थः** – कर्माशय इत्यनेन कर्मणः स्वरूपम् अभिहितम्, यतो वासनारूपाण्येव कर्माणि, **क्लेशमूल** इत्यनेन कारणम् अभिहितम्, यतः कर्मणां शुभाशुभानां क्लेशा एव निमित्तम्, दृष्टाऽदृष्टजन्मवेदनीय इत्यनेन फलमुक्तम् । अस्मिन्नेव जन्मनि अनुभवनीयो दृष्टजन्मवेदनीयः, जन्मान्तरे अनुभवनीयो अदृष्टजन्मवेदनीयः । तथा हि – कानिचित् पुण्यकर्माणि देवताराधनादीनि, तीव्रसंवेगेन कृतानि, अस्मिन् जन्मनि जात्यायुर्भोगलक्षणं फलं प्रयच्छन्ति । यथा – नन्दीश्वरस्य भगवन्महेश्वराराधनबलात् इहैव जन्मनि जात्यादयो विशिष्टाः प्रादुर्भूताः एवञ्च दुष्टकर्मकृतां नहुषादीनां जात्यन्तरादिपरिणामः ।

**(13) सति मूले तद्विपाको जात्यायुर्भोगाः ॥**

**सरलार्थः** – मूलमुक्तलक्षणाः क्लेशाः तेषु अनभिभूतेषु सत्सु कर्मणां कुशलाकुशलरूपाणां विपाकः फलं जात्यायुर्भोगाः भवन्ति । यथा – जातिर्मनुष्यत्वादिः आयुः चिरकालम् एकशरीरसम्बन्धः । भोगाः विषयाः इन्द्रियाणि सुखसंवित् दुःखसंविच्च भवन्ति ।

**(14) ते ह्लादपरितापफलाः पुण्यापुण्यहेतुत्वात् ॥**

**सरलार्थः** – ह्लादः सुखम्, परितापः दुःखम्, ह्लादपरितापौ फलं येषाम् ते ह्लादपरितापफलाः । पुण्यं कुशलं कर्म, तद्विपरीतम् अपुण्यम् । ते पुण्यापुण्ये कारणं येषाम् इत्यर्थः । पुण्यकर्मारब्धा जात्यायुर्भोगाः ह्लादफलाः, अपुण्याकर्मारब्धाः परितापफलाः भवन्ति ।

**(15) परिणामतापसंस्कारदुःखैर्गुणवृत्तिविरोधाच्च दुःखमेव सर्वं विवेकिनः ॥**

**सरलार्थः** – परिणामश्च तापश्च संस्कारश्च तान्येव दुःखानि। तैः अनुविद्धं सर्वं सुखं गुणवृत्तिविरोधात् विवेकिनः दुःखमपि इत्यन्वयः । विवेकिनः पुरुषस्य परिज्ञातक्लेशादिविवेकस्य परिदृश्यमानं सकलमेव भोगसाधनं दुःखमेव । यस्मात् अत्यन्ताभिजातो योगी दुःखक्लेशेनापि उद्विजते । यथा – अक्षिपात्रमूर्णातन्तुस्पर्शमात्रेणैव महतीं पीडाम् अनुभवति, न इतरदङ्गं तथा विवेकी स्वल्पदुःखानुबन्धेनापि उद्विजते ।

**(16) हेयं दुःखमनागतम् ॥**

**सरलार्थः** – भूतस्य अतिक्रान्तत्वात् अनुभूतमानस्य च त्यक्तुम् अशक्यत्वात् अनागतमेव संसारदुःखं हातव्यम् इति ।

**द्रष्टुर्विवेचनम् ।**

**(17) द्रष्टृदृश्ययोः संयोगो हेयहेतुः ॥**

**सरलार्थः** – द्रष्टा चिद्रूपः पुरुषः, दृश्यं बुद्धिसत्त्वं, तयोः अविवेकख्यातिपूर्वकः यः असौ संयोगो भोग्यभोक्तृत्वेन सन्निधानं स हेयस्य दुःखस्य गुणपरिणामस्य संसारस्य हेतुः कारणं तन्निवृत्त्या संसारनिवृत्तिः भवति इत्यर्थः ।

**(18) प्रकाशक्रियास्थितिशीलं भूतेन्द्रियात्मकं भोगापवर्गार्थं दृश्यम् ॥**

**सरलार्थः** – प्रकाशशीलं सत्त्वं, क्रियाशीलं रजः, स्थितिशीलं तमः एते गुणाः परस्परोपरक्तप्रविभागाः । सत्त्वस्य हि भागः प्रकाशः राजसेन भागेन दुःखेन वा तामसेन भागेन दैन्येन वा अनुरच्यते इति । पुरुषेण सह संयोगवियोगधर्माणः यथा आम्नायते–

**अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाः सृजमानां सरूपाः ।**
**अजा ह्येको जुषमाणोऽनुशेते जहात्येनां भुक्तभोगामजोऽन्यः ॥**

दिव्यशरीरे जनयितव्ये सत्त्वं गुणः प्रधानः अङ्गे रजस्तमसी । एवं मनुष्यशरीरे जनयितव्ये रजः प्रधानम् अङ्गे सत्त्वतमसी । एवं तिर्यक्शरीरे जनयितव्ये तमः प्रधानम् अङ्गे सत्त्वरजसी । तदेतत्प्रधानं दृश्यमुच्यते ।

**(19) विशेषाविशेषलिङ्गमात्रलिङ्गानि गुणपर्वाणि ॥**

**सरलार्थः** – गुणानां पर्वाण्यवस्थाविशेषाः चत्वारो ज्ञातव्या इत्युपदिष्टं भवति । तत्र विशेषा महाभूतेन्द्रियाणि, अविशेषाः तन्मात्रान्तःकरणानि । लिङ्गमात्रं बुद्धिः, अलिङ्गम् अव्यक्तम् । सर्वत्र त्रिगुणरूपस्य अव्यक्तस्य अन्वयित्वेन प्रत्यभिज्ञानात् अवश्यं ज्ञातव्यत्वेन योगकाले चत्वारि पर्वाणि निर्दिष्टानि इत्यर्थः ।

**(20) द्रष्टा दृशिमात्रः शुद्धोऽपि प्रत्ययानुपश्यः ॥**

**सरलार्थः** – द्रष्टा पुरुषो दृशिमात्रः चेतनामात्रः । केचन आत्मनः धर्मम् इच्छन्ति । स शुद्धोऽपि परिणाममित्यादि अभावेन स्वप्रतिष्ठोऽपि प्रत्ययानुपश्यः प्रत्यया विषयोपरक्तानि ज्ञानानि, तानि अनु अव्यवधानेन प्रतिसंक्रमादिना अभावेन पश्यति । जातविषयोपरागायामेव बुद्धौ सन्निधिमात्रेणैव पुरुषस्य द्रष्टृत्वमिति भावः ।

**(21) तदर्थ एव दृश्यस्यात्मा ॥**

**सरलार्थः** – दृशिरूपस्य प्रागुक्तलक्षणस्य आत्मनः भोक्तृत्वसंपादनं नाम स्वार्थपरिहारमेव प्रयोजनम् । न हि प्रधानं प्रवर्तमानम् आत्मनः किञ्चित्प्रयोजनमपेक्ष्य प्रवर्तते, किन्तु पुरुषस्य भोगं संपादयामि इति ।

**(22) कृतार्थं प्रति नष्टमप्यनष्टं तदन्यसाधारणत्वात् ॥**

**सरलार्थः** – यद्यपि विवेकख्यातिपर्यन्तात् भोगसंपादनात् कमपि कृतार्थं पुरुषं प्रति तन्नष्टम् इत्यनुभूतिः । तथाऽपि सर्वपुरुषसाधारणत्वात् अन्यान् प्रति अनष्टव्यापारम् अवतिष्ठते । अतः प्रधानस्य सकलभोक्तृसाधारणत्वात् न कदाचिदपि विनाशः एकस्य मुक्तौ न सर्वमुक्तिप्रसङ्गः इत्युक्तं भवति ।

**(23) स्वस्वामिशक्त्योः स्वरूपोपलब्धिहेतुः संयोगः ॥**

**सरलार्थः** – कार्यद्वारेणास्य लक्षणं करोति, स्वशक्तिदृश्यस्य स्वभावः, स्वामिशक्तिद्रष्टुः स्वरूपम्, तयोः द्वयोरपि संवेद्यसंवेदकत्वेन व्यवस्थितयोः या स्वरूपोपलब्धिः तस्याः कारणं यः स संयोगः इति ।

**(24) तस्य हेतुरविद्या ॥**

**सरलार्थः** – या पूर्वं विपर्यासात्मिका मोहरूपाऽविद्या व्याख्याता सा तस्य विवेकाख्यातिरूपस्य संयोगस्य कारणम् ।

**कैवल्यम् ।**

**(25) तदभावात्संयोगाभावो हानं तद्दृशेः कैवल्यम् ॥**

**सरलार्थः** – तस्याः अविद्यायाः स्वरूपविरुद्धेन सम्यक् ज्ञानेनोन्मूलिताया यो अयमभावः तस्मिन् सति तत्कार्यस्य संयोगस्यापि अभावः तद्धानं इत्युच्यते । न एतस्य मूर्तद्रव्यवत् परित्यागो युज्यते किन्तु जातायां विवेकख्यातौ अविवेकनिमित्तः संयोगः स्वयमेव निवर्तत इति तस्य हानम् इत्यर्थः ।

## स्वाध्यायः

**1. प्रदत्तविकल्पेषु योग्यं विकल्पं चित्वा उत्तरं लिखत ।**

(1) अविद्याऽस्मितारागद्वेषाभिनिवेशाः सन्ति ।

(क) क्लेशाः (ख) मोहाः (ग) योगाः (घ) रागाः

(2) रागः अस्ति ।

(क) दुःखानुशयी (ख) सुखानुशयी (ग) मोहानुशयी (घ) क्रोधानुशयी

(3) कति क्लेशाः वर्तन्ते ?

(क) सप्त (ख) दश (ग) पञ्च (घ) नव

(4) विशेषाविशेषलिङ्गमात्रलिङ्गानि सन्ति ।

(क) प्रमालिङ्गनि (ख) वस्तुलिङ्गनि (ग) कर्मलिङ्गनि (घ) गुणपर्वाणि

(5) तस्य हेतुः अस्ति ।

(क) अविद्या (ख) विद्या (ग) प्रमा (घ) अप्रमा

(6) तपः स्वाध्यायेश्वरप्रणिधानानि वर्तते ।

(क) भक्तियोगः (ख) क्रियायोगः (क) ज्ञानयोगः (घ) विद्यायोगः

**2. रिक्तस्थानं पूरयत ।**

(1) तदर्थ एव .......... आत्मा ।

(2) स्वस्वामिशक्त्योः .......... संयोगः ।

(3) .......... .......... तदन्यसाधारणत्वात् ।

(4) द्रष्टृदृश्ययोः संयोगो .......... ।

(5) .......... अनागतम् ।

(6) ते .......... सूक्ष्माः ।

**3. युग्मानि योजयत ।**

| (अ) | (ब) |
|---|---|
| (1) दुःखानुशयी | (1) क्लेशाः |
| (2) प्रतिप्रसवहेयाः | (2) द्वेषः |
| (3) अविद्यादयः | (3) सूक्ष्माः |
| (4) ईश्वरप्रणिधानानि | (4) रागः |
| (5) सुखानुशयी | (5) क्रियायोगः |
| | (6) संयोगः |

**4. एकवाक्येन उत्तरं लिखत ।**

(1) रागस्य लक्षणं किम् ?

(2) कति क्लेशाः ?

(3) हेयहेतुः कः ?

(4) अस्मिता नाम का ?

(5) कः द्वेषः ?

**5. द्वित्रवाक्यैः उत्तरं लिखत ।**

(1) क्रियायोगस्य का आवश्यकता ?

(2) संयोगस्य स्वरूपं लिखत ।

(3) गुणपर्वाणि कानि ?

**6. टिप्पणीं लिखत ।**

(1) अविद्या । (2) क्रियायोगः । (3) रागद्वेषौ ।

**7. सविस्तरमुत्तरं लिखत ।**

(1) सलक्षणं क्लेशाः निरूपणीयाः ।

(2) 'ते प्रतिप्रसवहेयाः सूक्ष्माः' व्याख्यायत ।

(3) कैवल्यस्वरूपं प्रतिपादयत ।

●